याजुषरत्नाकरम्

(प्रसिद्धमन्त्रसङ्ग्रहः)

7/26/2012

अशोधिता परिष्कार्या कृतिः

खण्डानुक्रमणिका

सर्वविषयानुक्रमणिका

संकेताक्षरसूची

सं॰	संहिता
ब्रा॰	ब्राह्मणम्
आ॰	आरण्यकम्
ऋ॰	ऋग्वेदः
तै॰	यजुर्वेदः (तैत्तिरीयशाखा)
ए॰	एकाग्निकाण्डः
खि॰	खिलमन्त्राः
सौ॰	सौत्रमन्त्राः
परि॰	परिष्करणीयम्
बो॰	बोधायनीयम्
आ॰	आपस्तम्बीयम्
गृ॰	गृह्यसूत्राणि
ध॰	धर्मसूत्राणि

संयुक्ताक्षरबोधः

त्व=त्+व। स्व=स्+व। प्त=प्+त। स्त्र=स्+त्+र। प्त्र=प्+त्+र।

द्ध=द्+ध। द्भ्य=द्+भ्+य। श्य=श्+य। श्ल=श्+ल। श्म=श्+म।

ट्य=ट्+य। ट्प=ट्+प। ट्व=ट्+व। ष्ट्य= ष्+ट्+य। ष्ट्प=ष्+ट्+प।

ष्ट्व=ष्+ट्+व। ङ्म=ङ्+म। ङ्भ=ङ्+भ। ड्घ=ड्+घ ड्ध=ड्+ध। च्च=च्+च।

ज्ज=ज्+ज। ध्र=ध्+र। ध्न=ध्+न। ग्र=ग्+र। ग्न=ग्+न।

मुद्रणशैली

	अत्र प्रयुक्ता	अपरत्र प्रयुक्ता
स्वरचिह्नानि प्रायेण स्वरबद्धानि	यजू॑ꣳषि शुष्क᳚म् । शत्रू॑न् । स॒ꣳ सदा᳚ स॒ह॒स्र॒शी॑र्षम्	यजू॑ꣳषि शुष्कम्᳚ । शत्रून्॑ । स॒ꣳ॒ सदा᳚ स॒ह॒स्र॒शीर्॑षम्
अल्पप्राणित्वं रक्षितम्	स॒ह॒स्रा॒क्षः तत्सृ॒ष्ट्वा	स॒ह॒स्रा॒ख्षः तथ्सृ॒ष्ट्वा
अनुनासिकत्वं नाङ्कितम्	भूमिं॑ वि॒श्वतः॑ ये॑ऽमुं लो॒कम्	भूमिं॑व्विँ॒श्वतः॑ ये॑ऽमुल्लोँ॒कम्
अयुक्तं द्वित्त्वं त्यक्तम्	दू॒षय॑न् । मध्ये	दू॒षयन्न्॑ । मद्ध्ये
अनुस्वारः रक्षितः	प्रसि॑तिं॒ न पृ॒थ्वीम् अरं॑ गमाम	प्रसि॑ति॒न्न पृ॒थ्वीम् अर॑ङ्गमाम
शब्दावसानानि रक्षितानि	नम॑स्ते अ॒ग्निरायु॑ष्मान् वि॒द्वाꣳस᳚म् ।	नम॑ स्ते अ॒ग्निरा यु॑ष्मान् वि॒द्वाꣳ स᳚म् ।
शब्दावसानद्वित्त्वे विसर्गः रक्षितः	नम॒ः सद॑से नम॑ः शि॒वाय॑ देवी᳚ः षडुर्वीः	नम॒स्सद॑से नम॑श्शि॒वाय॑ देवी᳚ष्षडुर्वीः
रेफः परतन्त्रः	स॒हस्र॑शीर्षा॒ पुरु॑षः निर्ऋ॑त्यै	स॒हस्र॑शीर्॒षा पुरु॑षः निर्‌ऋ॑त्यै

विकीर्णमन्त्राः

गणेशप्रार्थना

तै॰सं॰ २.३.१४

ग॒णानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम्।
ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ नः॑ शृ॒ण्वन्नू॒तिभिः॑ सीद॒
साद॑नम्॥

सरस्वतीप्रार्थना

तै॰सं॰ १.८.२२॥ १.८.२२॥ ३.१.१०॥

प्र णो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। धी॒नाम॑वि॒त्र्य॑वतु॥ आ
नो॑ दि॒वो बृ॑ह॒तः पर्व॑ता॒दा सर॑स्वती यज॒ता ग॑न्तु य॒ज्ञम्। हवं॑ दे॒वी
जु॑जुषा॒णा घृ॒ताची॑ श॒ग्मां नो॒ वाच॑मुश॒ती शृ॑णोतु॥ जुष्टो॑ वा॒चो
भू॑यास॒ं जुष्टो॑ वा॒चस्पत॑ये॒ देवि॑ वाक्। यद्वा॒चो मधु॑म॒त् तस्मि॑न् मा
धा॒ः स्वाहा॒ सर॑स्वत्यै॥

वेदादयः

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्॥
इ॒षे त्वो॒र्जे त्वा॑ वा॒यवः॑ स्थोपा॒यवः॑ स्थ दे॒वो वः॑ सवि॒ता प्रार्प॑यतु॒
श्रेष्ठ॑तमाय॒ कर्म॑णे॥ अग्न॒ आ या॑हि वी॒तये॑ गृना॒नो ह॒व्यदा॑तये। नि
होता॑ सत्सि ब॒र्हिषि॑॥ शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑। शं
योर॒भिस्र॑वन्तु नः॥

तैत्तिरीसंहितादिः

ॐ इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑ः स्थोपा॒यव॑ः स्थ दे॒वो व॑ः सवि॒ता
प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑ण॒ आ प्या॑यध्वमघ्निया देवभा॒गमूर्ज॑स्वतीः॒
पय॑स्वतीः प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्मा मा व॑ः स्ते॒न ई॑शत॒
माऽघश॑ꣳसो रु॒द्रस्य॑ हे॒तिः परि॑ वो वृणक्तु ध्रु॒वा अ॒स्मिन् गोप॑तौ
स्यात ब॒ह्वीर्यज॑मानस्य प॒शून् पा॑हि॥

य॒ज्ञस्य॑ घो॒षद॑सि॒ प्रत्यु॑ष्ट॒ꣳ रक्षः॒ प्रत्यु॑ष्टा॒ अरा॑तयः॒ प्रेयम॑गाद्धि॒षणा॑
ब॒र्हिरच्छ॒ मनु॑ना कृ॒ता स्व॒धया॒ वित॑ष्टा॒ त आव॑हन्ति क॒वय॑ः
पु॒रस्ता᳚द्दे॒वेभ्यो॒ जुष्ट॑मि॒ह ब॒र्हिरा॒सदे॑ दे॒वाना᳚ं परिषू॒तम॑सि
व॒र्षवृ॑द्धमसि॒ देव॑बर्हि॒र्मा त्वा॒ऽन्वङ्मा ति॒र्यक्पर्व॑ ते राध्यासमाच्छे॒त्ता
ते॒ मा रि॑षं॒ देव॑बर्हिः श॒तव॑ल्शं॒ वि रो॑ह स॒हस्र॑वल्शा॒ः वि व॒यꣳ
रु॑हेम पृथि॒व्याः सं॒पृच॑ः पाहि सुसं॒भृता᳚ त्वा॒ सं भ॑रा॒म्यदि॑त्यै॒
रास्ना॑ऽसीन्द्रा॒ण्यै सं॒नह॑नं पू॒षा ते᳚ ग्र॒न्थिं ग्र॑थ्नातु॒ स ते॒
माऽऽस्था॒दिन्द्र॑स्य त्वा बा॒हुभ्या॒मुद्य॑च्छे बृह॒स्पते᳚र्मू॒र्ध्ना
ह॑राम्यु॒र्व॑न्तरि॑क्ष॒मन्वि॑हि दे॒वं॒ग॒मम॑सि॥

शुन्ध॑ध्वं॒ दैव्या॑य॒ कर्म॑णे देवय॒ज्यायै॑ मात॒रिश्व॑नो घ॒र्मो॑ऽसि॒ द्यौर॑सि
पृथि॒व्य॑सि वि॒श्वधा॑या असि पर॒मेण॒ धाम्ना॒ दृꣳह॑स्व॒ मा ह्वा॒र्वसू॑नां
प॒वित्र॑मसि श॒तधा॑रं॒ वसू॑नां प॒वित्र॑मसि स॒हस्र॑धारꣳ हु॒तः स्तो॒को
हु॒तो द्र॒प्सो᳚ऽग्नये॑ बृह॒ते नाका॑य॒ स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒ꣳ सा
वि॒श्वायु॒ः सा वि॒श्वव्य॑चा॒ः सा वि॒श्वक॑र्मा॒ सं
पृ॑च्यध्वमृतावरीरू॒र्मिणी॒र्मधु॑मत्तमा म॒न्द्रा धन॑स्य सा॒तये॒ सोमे॑न॒
त्वाऽऽत॑न॒च्मीन्द्रा॑य॒ दधि॒ विष्णो॑ ह॒व्यꣳ र॑क्षस्व॥

कर्म॑णे वां दे॒वेभ्य॑ः शकेयं॒ वेषा॑य त्वा॥

गणेशाथर्वशीर्षम्

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्नराजो गणाधिपः॥ धूम्रकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ अभीप्सितार्थसिध्यर्थं पूजितो यः सुरैरपि। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥ हरिद्राभं चतुर्बाहुं हरिद्रवदनं प्रभुम्। पाशाङ्कुशधरं देवं मोदकं दन्तमेव च॥

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः। भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः। स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभि॑ः। व्यशे॑म दे॒वहि॑तं॒ यदायु॑ः॥ स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः। स्व॒स्ति न॑ः पू॒षा वि॒श्ववे॑दाः। स्व॒स्तिन॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः। स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥

नम॑स्ते ग॒णप॑तये। त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि। त्वमे॒व के॒वलं॒ कर्ता॑ऽसि। त्वमे॒व के॒वलं॒ धर्ता॑ऽसि। त्वमे॒व के॒वलं॒ हर्ता॑ऽसि। त्वमेव सर्वं॑ खल्विदं॑ ब्रह्मा॒सि। त्वं साक्षादात्मा॑ऽसि नि॒त्यम्। ऋ॑तं व॒च्मि। स॑त्यं व॒च्मि। अ॒व त्व॒ं माम्। अव॑ व॒क्तार॑म्। अव॑ श्रो॒तार॑म्। अव॑ दा॒तार॑म्। अव॑ धा॒तार॑म्। अवानूचानम॑व शि॒ष्यम्। अव॑ प॒श्चात्ता॑त्। अव॑ पु॒रस्ता॑त्। अवोत्त॒रात्ता॑त्। अव॑ दक्षि॒णात्ता॑त्। अव॑ चो॒र्ध्वात्ता॑त्। अवाध॒रात्ता॑त्। सर्वतो मां पाहि पाहि॑

समन्तात्। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाँक्पदानि। त्वं गुणत्रयातीतः। त्वमवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारे स्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःस्वरोम्।

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्। एतत् तव मनुस्वरूपम्। गकारः पूँर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चाँन्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। सꣳहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्रीच्छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात् परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः॥ य एवं वेद। इत्युपनिषत्॥

सुमुखाय नमः। एकदन्ताय नमः। कपिलाय नमः। गजकर्णाय नमः। लम्बोदराय नमः। विकटाय नमः। विघ्नराजाय नमः। विनायकाय नमः। धूमकेतवे नमः। गणाध्यक्षाय नमः। फालचन्द्राय नमः। गजाननाय नमः। वक्रतुण्डाय नमः। शूर्पकर्णाय नमः। हेरम्बाय नमः। स्कन्दपूर्वजाय नमः। सिद्धिविनायकाय नमः॥

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ अविघ्नमस्तु॥

विप्रप्रशंसा

कर्मणः प्रागनुज्ञाप्राप्तौ विनियोगः

तै०ब्रा १.४.४

भागधेयेनैवैनं प्रणयति। ब्राह्मण आर्षेय उद्धरेत्। ब्राह्मणो वै सर्वा देवताः। सर्वाभिरेवैनं देवताभिरुद्धरति॥ [1]

तै०आ २.१५

ये अर्वाङुत वा पुराणे वेदं विद्वाꣳसमभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हꣳसमिति यावतीर्वै

[1] नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति॥ [2]

ऋ॰सं॰ १.२७.१३॥ तै॰सं॰ ३.२.४॥ तै॰आ॰ १०.१॥ तै॰ब्रा॰ १.२.१॥

(ऋ) नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान् यदि शक्नवाम मा ज्यायसः शं समावृक्षि देवाः॥ नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्॥ सप्रथ सभां मे गोपाय। ये च सभ्याः सभासदः। तानिन्द्रियावतः कुरु। सर्वमायुरुपासताम्। अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदाविदुः। ऋचः सामानि यजूꣳषि। सा हि श्रीरमृता सताम्॥ नमः सभाभ्यः सभापतिभ्यश्च वो नमः॥३॥

सुमुहूर्तप्रार्थना

सुमुहूर्तप्रार्थनायां विनियोगः। योग्यता मृग्या।

तै॰ब्रा॰ २.४.२.२२

पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठ। इह राष्ट्रमु धारय। अभितिष्ठ पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ॥ सुमुहूर्तोऽस्तु। सुप्रतिष्ठितमस्तु॥

[2] आब्रह्मलोकादाशेषादालोकालोकपर्वतात्।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमो नमः॥

स्वस्तिसूक्तम् (ऋ०)

कर्मणः प्राक् स्वस्तिवाचने, उपनिष्क्रमणे च विनियोगः

ऋ०सं० ५.५१.११

स्व॒स्ति नोँ मिमीताम॒श्विना॒ भगः॑ स्व॒स्ति दे॒व्यदि॑तिरन॒र्वणः॑।
स्व॒स्ति पूषा असु॑रो दधातु नः स्व॒स्ति द्यावाँपृथि॒वी सु॑चे॒तुनाँ॥
स्व॒स्तयेँ वा॒युमुप॑ ब्रवामहै॒ सोमँ॑ स्व॒स्ति भुव॑नस्य॒ यस्पतिः॑।
बृह॒स्पतिं॒ सर्व॑गणं स्व॒स्तयेँ स्व॒स्तय॑ आदि॒त्यासोँ भवन्तु नः॥
विश्वेँ दे॒वा नोँ अ॒द्या स्व॒स्तयेँ वैश्वान॒रो वसु॑र॒ग्निः स्व॒स्तयेँ। दे॒वा
अ॑वन्त्वृ॒भवः॑ स्व॒स्तयेँ स्व॒स्ति नोँ रु॒द्रः पा॒त्वंह॑सः॥ स्व॒स्ति
मि॑त्रावरुणा स्व॒स्ति प॑थ्ये रेवति। स्व॒स्ति न॒ इन्द्र॑श्चा॒ग्निश्च॑ स्व॒स्ति
नोँ अदिते कृधि॥ स्व॒स्ति पन्था॒मनु॑ चरेम सूर्याचन्द्र॒मसाँविव।
पु॒नर्द॒दताघ्न॑ता जान॒ता सं ग॑मेमहि॥

ऋ०खि०

स्व॒स्त्यय॑न॒ं ता॒र्क्ष्यँम॒रि॑ष्टनेमिं म॒हद्भूँतं वा॒यसं दे॒वताँनाम्।
अ॒सु॒र॒घ्नमिन्द्र॑सखं स॒मत्सु॑ बृ॒हद्यशो॒ नाव॑मि॒वा रु॑हेम॥
अं॒हो॒मुच॑मा॒ङ्गिर॑सं॒ गयँ॑ च स्व॒स्त्याँत्रे॒यं मन॑सा च॒ ताक्ष्यँ॑म्। प्रय॑त
पाणिः शर॒णं प्र प॑द्ये स्व॒स्ति सँ॑ बा॒धेष्वभ॑यं नो अस्तु॥

तै०आ० १.१

स्व॒स्ति न॒ इन्द्रो॑ वृद्धश्र॑वाः। स्व॒स्ति नः॑ पूषा वि॒श्ववे॑दाः। स्व॒स्ति
न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः। स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥

शुद्धिपुण्याहमन्त्राः

श्रोत्रियाभावे पुण्याहवाचनाशक्तौ विनियोगः

आपो॒ हि ष्ठा म॑यो॒ भुव॒स्ता न॑ ऊ॒र्जे द॑धातन। म॒हे रणा॑य॒ चक्ष॑से॥
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑ः। उ॒श॒तीरि॑व मा॒तर॑ः॥
तस्मा॒ अर॑ं गमामवो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च
नः॥

ऋ॒तं च॑ स॒त्यं चा॒भीँद्धा॒त् तप॒सोध्य॑जायत। ततो॒ रात्रि॑रजायत॒
तत॑ः समु॒द्रो अ॑र्ण॒वः॥ स॒मु॒द्राद॑र्ण॒वादधि॑ संवत्स॒रो अ॑जायत।
अ॒हो॒रा॒त्राणि॑ वि॒द॒ध॒द् विश्व॑स्य मि॒ष॒तो व॒शी॥ सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता
य॑था पू॒र्वम॑कल्पयत्। दिव॑ं च पृथि॒वीं चा॒न्तरि॑क्ष॒मथो॒ सुव॑ः॥

वास्तोँष्पते॒ प्रति॑ जानीह्य॒स्मान् स्वा॑वे॒शो अ॑नमी॒वो भ॑वा नः।
यत्त्वेम॑हे॒ प्रति॒ तं नो॑ जुषस्व॒ शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे॥
वास्तोँष्पते श॒ग्मया॑ स॒ꣳसदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गातु॒मत्या॑ँ।
आ व॒ः क्षेम॑ उ॒त योगे॒ वर॑ं नो यू॒यं पा॑तः स्व॒स्तिभि॒ः सदा॑ नः॥
वास्तोँष्पते प्र॒तर॑णो न एधि॒ गोभि॒रश्वे॑भिरिन्दो। अ॒जरा॑सस्ते स॒ख्ये
स्या॑म पि॒तेव॑ पु॒त्रान् प्रति॑ नो जुषस्व॥ अ॒मी॒व॒हा वास्तोँष्पते॒
विश्वा॑ रू॒पाण्या॑ वि॒शन्। सखा॑ सु॒शेव॑ एधि नः। शि॒वꣳ शि॒वम्॥

पुण्याहमन्त्राः

पुण्याहवाचने विनियोगः

तै०ब्रा० १.५.२॥ तै०ब्रा० १.५.२॥

यत्पुण्यं॒ नक्ष॑त्रम्। तद्बट्कु॑र्वीतोपव्यु॒षम्। य॒दा वै सूर्य॑ उ॒देति॑। अथ॒
नक्ष॑त्रं॒ नैति॑। याव॑ति॒ तत्र॒ सूर्यो॒ गच्छे॑त्। यत्र॑ जघ॒न्यं॑ पश्ये॑त्।
ताव॑ति कुर्वीत यत्का॒री स्यात्। पु॒ण्या॒ह ए॒व कु॑रुते॥ तानि॒ वा
ए॒तानि॑ यमनक्ष॒त्राणि॑। यान्ये॒व दे॑वनक्ष॒त्राणि॑। तेषु॑ कुर्वीत यत्का॒री
स्यात्। पु॒ण्या॒ह ए॒व कु॑रुते॥

तै०आ० १.१॥ तै०ब्रा० ३.१.२॥

स्व॒स्ति न॒ इन्द्रो॑ वृद्धश्र॑वाः। स्व॒स्ति नः॑ पूषा वि॒श्ववे॑दाः। स्व॒स्ति
न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः। स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॒॥ अ॒ष्टौ दे॒वा
वसं॑वः सो॒म्यासः॑। चत॑स्रो दे॒वीर॒जराः॒ श्रवि॑ष्ठाः। ते य॒ज्ञं पा॑न्तु॒
रज॑सः प॒रस्ता॑त्। सं॒व॒त्स॒रीण॑म॒मृत॑ꣳ स्व॒स्ति॥

तै०ब्रा० ३.१.२॥ तै०ब्रा० १.५.६॥

ऋ॒ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑। मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु।
अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धय॑न्तः। श॒तं जी॑वेम श॒र॒दः सवी॑राः॥ त्रीणि॑
त्रीणि॒ वै दे॒वाना॑मृ॒द्धानि॑। त्रीणि॒ छन्दा॑ꣳसि। त्रीणि॒ सव॑नानि। त्रयं॑
इ॒मे लो॒काः। ऋ॒ध्यामे॒व तद्वी॒र्य॑ ए॒षु लो॒केषु॒ प्रति॑तिष्ठति॥

ऋ०सं० ९.९४.४॥ मृग्यम् ॥ तै०आ० १.२॥ तै०आ० १०॥

श्रिये॑ जा॒तः श्रिय॒ आनि॑र्याय॒ श्रियं॒ वयो॑ जनि॒तृभ्यो॑ दधातु। श्रियं॒
वसा॑ना अमृत॒त्वमा॑य॒न् भज॑न्ति स॒द्यः स॑वि॒ता वि॒दध्यू॑न्॥ श्रियं॑
एवैनं तच्छ्रि॒यामा॑दधा॒ति। स॒न्त॒त॒मृ॒चा व॑षट्कृ॒त्यं सन्ध॑त्तं॒ सन्धी॑यते
प्रज॒या प॒शुभिः॑। य ए॒वं वे॒द॥ यस्मि॒न् ब्रह्मा॒भ्य ज॑य॒त्सर्व॑मे॒तत्।

अ॒मुं च॑ लो॒कमि॒दमू॑च॒ सर्व᳚म्। तन्नो॒ नक्ष॑त्रमभि॒जिद् वि॒जित्य॑।
श्रियं॑ दधा॒त्वहृ॑णीयमानम्॥ अहे॑ बुध्निय॒ मन्त्रं॑ मे गोपाय।
यमृष॑यस्त्रै वि॒दा वि॒दुः। ऋच॒ः सामा॑नि॒ यजू॑ꣳषि। सा हि
श्रीर॒मृता॑स॒ताम्॥

प्रतिसरबन्धनमन्त्रः

प्रतिसरबन्धने विनियोगः

तै॰सं॰ ४.४.१२.२

बृ॒हत्साम॑ क्ष॒त्रभृद्वृ॒द्ध वृ॑ष्णियम्। त्रि॒ष्टुभौज॑ः शुभि॒तमु॒ग्रवी॑रम्।
इन्द्र॒स्तोमे॑न पञ्चद॒शेन॑। मध्य॑मि॒दं वाते॑न॒ सग॑रेण रक्ष॥

उल्लेखनमन्त्राः

सर्वकर्मसु स्थलशुद्ध्यर्थमुल्लेखने विनियोगः

तै॰ब्रा॰ १.२.१

उ॒द्ध॒न्यमा॑नम॒स्या अ॑मे॒ध्यम्। अप॑ पा॒प्मानं॒ यज॑मानस्य हन्तु।
शि॒वा न॑ः सन्तु प्र॒दिश॒श्चत॑स्रः। शं नो॑ मा॒ता पृ॑थि॒वी तोक॑साता॥
शं नो॑ दे॒वीर॒भिष्ट॑ये। आपो॑ भवन्तु पी॒तये᳚। शं योर॒भि स्र॑वन्तु नः॥

तै॰आ॰ १०॥ तै॰आ॰ ६.३.१॥ तै॰सं॰ ३.२.५॥

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द्वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स
बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑ः॥ नाके॑
सुप॒र्णमु॑प॒यत्पत॑न्तꣳ हृ॒दा वेन॑न्तो अ॒भच॑क्षतत्वा। हिर॑ण्यपक्षं॒
वरु॑णस्य दू॒तं य॒मस्य॒ योनौ᳚ शकु॒नं भु॑र॒ण्युम्॥ आ प्या॑यस्व॒ समे॑तु
ते वि॒श्वत॑ः सोम॒ वृष्णि॑यम्। भवा॒ वाज॑स्य सङ्ग॒थे॥

तै॰सं॰ ५.५.९॥ तै॰सं॰ १.२.१३॥ तै॰सं॰ ४.६.३॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुरे॥ इन्द्रं विश्वा अवीवृधन् समुद्र व्यचसं गिरः। रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम्।

सुवर्णघर्मसूक्तम्

विष्णोः (सत्यनारायणस्य) अभिषेचने विनोयोगः

तै॰आ॰ ३.११

सुवर्णं घर्मं परिवेद वेनम्। इन्द्रस्यात्मानं दशधा चरन्तम्। अन्तः समुद्रे मनसा चरन्तम्। ब्रह्माऽन्वविन्दद् दशहोतारमर्णे। अन्तः प्रविष्टः शास्ता जनानाम्। एकः सन् बहुधा विचारः। शतꣳ शुक्राणि यत्रैकं भवन्ति। सर्वे वेदा यत्रैकं भवन्ति। सर्वे होतारो यत्रैकं भवन्ति। स मानसीन आत्मा जनानाम्।

अन्तः प्रविष्टः शास्ता जनानाꣳ सर्वात्मा। सर्वाः प्रजा यत्रैकं भवन्ति। चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः। स मानसीन आत्मा जनानाम्। ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम्। दिव आत्मानꣳ सवितारं बृहस्पतिम्। चतुर्होतारं प्रदिशोऽनुक्लृप्तम्। वाचो वीर्यं तपसाऽन्वविन्दत्। अन्तः प्रविष्टं कर्तारमेतम्। त्वष्टारꣳ रूपाणि विकुर्वन्तं विपश्चिम्।

अमृतस्य प्राणं यज्ञमेतम्। चतुर्होतृणामात्मानं कवयो निचिक्युः। अन्तः प्रविष्टं कर्तारमेतम्। देवानां बन्धु निहितं गुहासु। अमृतेन क्लृप्तं यज्ञमेतम्। चतुर्होतृणामात्मानं कवयो निचिक्युः। शतं

नियुतः परिवेद विश्वा विश्ववारः। विश्वमिदं वृणाति। इन्द्रस्यात्मा निहितः पञ्चहोता। अमृतं देवानामायुः प्रजानाम्।

इन्द्रꣳ राजानꣳ सवितारमेतम्। वायोरात्मानं कवयो निचिक्युः। रश्मिꣳ रश्मीनां मध्ये तपन्तम्। ऋतस्य पदे कवयो निपान्ति। य आण्डकोशे भुवनं बिभर्ति। अनिर्भिण्णः सन्नथ लोकान् विचष्टे। यस्याण्डकोशꣳ शुष्ममाहुः प्राणमुल्बम्। तेन क्लृप्तोऽमृतेनाहमस्मि। सुवर्णं कोशꣳ रजसा परीवृतम्। देवानां वसुधानीं विराजम्॥

अमृतस्य पूर्णां तामु कलां विचक्षते। पादꣳ षड्ढोतुर्न किला विवित्से। येनर्तवः पञ्चधोत क्लृप्ताः। उत वा षड्ढा मनसोत क्लृप्ताः। तꣳ षड्ढोतारमृतुभिः कल्पमानम्। ऋतस्य पदे कवयो निपान्ति। अन्तः प्रविष्टं कर्तारमेतम्। अन्तश्चन्द्रमसि मनसा चरन्तम्। सहैव सन्तं न विजानन्ति देवाः। इन्द्रस्यात्मानꣳ शतधा चरन्तम्।

इन्द्रो राजा जगतो य ईशे। सप्तहोता सप्तधा विक्लृप्तः। परेण तन्तुं परिषिच्यमानम्। अन्तरादित्ये मनसा चरन्तम्। देवानाꣳ हृदयं ब्रह्माऽन्वविन्दत्। ब्रह्मैतद् ब्रह्मण उज्जभार। अर्कꣳ श्चोतन्तꣳ सरिरस्य मध्ये। आ यस्मिन् सप्त पेरवः। मेहन्ति बहुलाꣳ श्रियम्। बह्वश्वामिन्द्र गोमतीम्।

अच्युतां बहुलाꣳ श्रियम्। स हरिर्वसुवित्तमः। पेरुरिन्द्राय पिन्वते। बह्वश्वामिन्द्र गोमतीम्। अच्युतां बहुलाꣳ श्रियम्। मह्यमिन्द्रो नियच्छतु। शतꣳ शता अस्य युक्ता हरीणाम्। अर्वाङायातु वसुभी

र॒श्मिरिन्द्र॑ः। प्रमꣳह॑माणो बहु॒लाꣳ श्रिय᳚म्। र॒श्मिरिन्द्र॑ः सवि॒ता मे॒
निय॑च्छतु॥

घृ॒तं॑ तेजो॒ मधु॑मदिन्द्रि॒यम्। मय्य॒यम॒ग्निर्द॑धातु। हरि॑ः पत॒ङ्गः प॑ट॒री
सु॑प॒र्णः। दि॒वि॒क्षयो॒ नभ॑सा॒ य एति॑। स न॒ इन्द्र॑ः कामव॒रं द॑दातु।
पञ्चा॑रं च॒क्रं परि॑वर्तते पृ॒थु। हिर॑ण्यज्योतिः सरि॒रस्य॒ मध्ये᳚॥
अज॑स्रं॒ ज्योति॒र्नभ॑सा॒ सर्प॑देति। स न॒ इन्द्र॑ः कामव॒रं द॑दातु। स॒प्त
यु॑ञ्जन्ति॒ रथ॒मेक॑चक्रम्॥

एको॒ अश्वो॑ वहति स॒प्तना॒मा। त्रि॒नाभि॑ च॒क्रम॒जर॒मनर्व॑म्। येने॒मा
विश्वा॒ भुव॑नानि तस्थुः। भ॒द्रं पश्य॑न्त॒ उप॑सेदु॒रग्रे᳚। तपो॑
दी॒क्षामृष॑यः सुव॒र्विद॑ः। तत॑ः क्ष॒त्रं बल॒मोज॑श्च जा॒तम्। तद॒स्मै दे॒वा
अ॒भि सं न॑मन्तु। श्वे॒तꣳ र॒श्मिं बो॑भु॒ज्यमा॑नम्। अ॒पां ने॒तारं॒
भुव॑नस्य गो॒पाम्। इन्द्रं॒ निचि॑क्युः पर॒मे व्यो॑मन्॥

रोहि॑णीः पिङ्ग॒ला एक॑रूपाः। क्षर॑न्तीः पिङ्ग॒ला एक॑रूपाः। श॒तꣳ
स॒हस्रा॑णि प्रयु॒ता॑नि॒ नाव्या॑नाम्। अ॒यं यः श्वे॒तो र॒श्मिः। परि॒
सर्व॑मि॒दं जग॑त्। प्र॒जां प॒शून् धना॑नि। अ॒स्माक॑ं ददातु। श्वे॒तो
र॒श्मिः परि॒ सर्वं᳚ बभूव। सुव॒न्मह्यं᳚ प॒शून् वि॒श्वरू॑पान्।
प॒त॒ङ्गम॒क्तमसु॑रस्य मा॒याया᳚।

हृ॒दा प॑श्यन्ति॒ मन॑सा मनी॒षिण॑ः। स॒मु॒द्रे अ॒न्तः क॒वयो॒ विच॑क्षते।
मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः। प॒त॒ङ्गो वाचं॒ मन॑सा बिभर्ति। तां
ग॑न्ध॒र्वो॑ऽवद॒द् गर्भे॑ अ॒न्तः। तां द्योत॑मानाꣳ स्व॒र्यं᳚ मनी॒षाम्।

ऋतस्य॑ प॒दे क॒वयो॒ निपा॑न्ति। ये ग्रा॒म्याः प॒शवो॑ वि॒श्वरू॑पाः।
विरू॑पाः॒ सन्तो॑ बहु॒धैक॑रूपाः। अ॒ग्निस्ता॑ँ अग्रे॒ प्रमु॑मोक्तु दे॒वः॥

प्र॒जाप॑तिः प्र॒जया॑ संविदा॒नः। वी॒तङ् स्तु॑केस्तुके। यु॒वम॒स्मासु॑
निय॑च्छतम्। प्रप्र॑ य॒ज्ञप॑तिं तिर। ये ग्रा॒म्याः प॒शवो॑ वि॒श्वरू॑पाः।
विरू॑पाः॒ सन्तो॑ बहु॒धैक॑रूपाः। तेषा॑ँ स॒प्ता॒नामि॒ह रन्ति॑रस्तु।
रा॒यस्पोषा॑य सुप्रजा॒स्त्वाय॑ सु॒वीर्या॑य। य आ॑र॒ण्याः प॒शवो॑
वि॒श्वरू॑पाः। विरू॑पाः॒ सन्तो॑ बहु॒धैक॑रूपाः।

वा॒युस्ता॑ँ अग्रे॒ प्रमु॑मोक्तु दे॒वः। प्र॒जाप॑तिः प्र॒जया॑ संविदा॒नः।
इडा॑यै सृ॒प्तं घृ॒तव॑च्चरा॒चरम्। दे॒वा अन्व॑विन्द॒न्गुहा॑ हि॒तम्। य
आ॑र॒ण्याः प॒शवो॑ वि॒श्वरू॑पाः। विरू॑पाः॒ सन्तो॑ बहु॒धैक॑रूपाः।
तेषा॑ँ स॒प्ता॒नामि॒ह रन्ति॑रस्तु। रा॒यस्पोषा॑य सुप्रजा॒स्त्वाय॑
सु॒वीर्या॑य॥

पुरुषसूक्तम्

इमे महान्यासान्तर्गतमन्त्राः 420 तमे पुटे द्रष्टव्याः

स॒हस्र॑शीर्षा॒ ००० ॥ पुरुषसूक्तं शिरसे स्वाहा।

उत्तरनारायणम्

इमे महान्यासान्तर्गतमन्त्राः 422 तमे पुटे द्रष्टव्याः

अ॒द्भ्यः संभू॑तः ००० ॥ उत्तरनारायणं शिखायै वषट्।

ब्रह्मसूक्तम्

प्रतिसरबन्धने शान्तिकर्मसु च विनियोगः

तै॰ब्रा॰ २.८.८.२१

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॓त्। वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्नियां॑ उप॒मा अ॑स्य वि॒ष्ठाः। स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑॥ पि॒ता वि॒राजा॑मृष॒भो र॑यी॒णाम्। अ॒न्तरि॑क्षं वि॒श्वरू॑प॒ आवि॑वेश। तम॒र्कैर॒भ्य॑र्चन्ति व॒त्सम्। ब्रह्म॒सन्त॒ं ब्रह्म॑णा व॒र्धय॑न्तः॥ ब्रह्म॑ दे॒वान॑जनयत्। ब्रह्म॒ विश्व॑मि॒दं जग॑त्। ब्रह्म॑णः क्ष॒त्रं निर्मि॑तम्। ब्रह्म॑ ब्राह्म॒ण आ॒त्मना॓॥ अ॒न्तर॑स्मिन्नि॒मे लो॒काः। अ॒न्तर्विश्व॑मि॒दं जग॑त्। ब्रह्मै॒व भू॒ताना॒ं ज्येष्ठ॓म्। तेन॒ को॑ऽर्हति॒ स्पर्धि॑तुम्॥ ब्रह्म॑न् दे॒वास्त्रय॑स्त्रि॒ꣳशत्। ब्रह्म॑न्निन्द्रप्रजाप॒ती। ब्रह्म॑न् ह॒ विश्वा॑ भू॒तानि॑। ना॒वीवा॒न्तः स॒माहि॑ता॥ चत॑स्र॒ आशा॒ः प्रच॑रन्त्व॒ग्नय॑ः। इ॒मं नो॑ य॒ज्ञं न॑यतु प्रजा॒नन्। घृ॒तं पिन्व॑न्न॒जर॑ꣳ सु॒वीर॓म्। ब्रह्म॑ स॒मिद्भ॑व॒त्याहु॑तीनाम्॥

विष्णुसूक्तम्

प्रतिसरबन्धने शान्तिकर्मसु च विनियोगः

सं १.२.१३॥ ब्रा २.४.६॥ २.४.३॥ २.८.३॥ २.४.३॥ २.४.३॥

विष्णो॒र्नु कं॑ वी॒र्या॑णि॒ प्र वो॑चं॒ यः पार्थि॑वानि वि॒ममे रजा॑ꣳसि॒ यो अस्क॑भाय॒दुत्त॑रꣳ स॒धस्थ॑ं विचक्रमा॒णस्त्रे॒धोरु॑गा॒यः। (विष्णो॑र॒राट॑मसि॒ विष्णो॓ः पृ॒ष्ठम॑सि॒ विष्णो॒ः श्नप्त्रे॓ स्थो॒ विष्णो॒ः स्यूर॑सि॒ विष्णो॓र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा॥) तद॑स्य प्रि॒यम॒भि पाथो॑ अश्याम्। नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति। उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था। विष्णो॓ः प॒दे प॑र॒मे मध्व॒ उत्स॑ः॥ प्र तद्विष्णु॑ः

स्तवते वी॒र्या॑य। मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः। यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु। अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा᳚॥ प॒रो मात्र॑या त॒नुवा॑ वृधान। न ते॑ महि॒त्वमन्व॑श्नुवन्ति। उ॒भे ते॑ विद्म॒ रज॑सी पृथि॒व्या विष्णो॑ देव॒ त्वम्। प॒र॒मस्य॑ वित्से॥ विच॑क्रमे पृथि॒वीमे॒ष ए॒ताम्। क्षेत्रा॑य॒ विष्णु॒र्मनु॑षे दश॒स्यन्। ध्रु॒वासो॑ अस्य की॒रयो॒ जना॑सः। उ॒रु॒क्षि॒तिꣳ सु॒जनि॑मा चकार॥ त्रिर्दे॒वः पृ॑थि॒वीमे॒ष ए॒ताम्। विच॑क्रमे श॒तर्च॑सं महि॒त्वा। प्र विष्णु॑रस्तु त॒वस॒स्तवी॑यान् त्वे॒षꣳ ह्य॑स्य॒ स्थवि॑रस्य॒ नाम॑॥

विष्णुसूक्तम् (ऋ०)

विष्णोः पूजने षडङ्गन्यासे विनियोगः

ऋ०सं० १.२२.१६

अतो᳚ दे॒वा अ॑वन्तु नो॒ यतो॒ विष्णु॑र्विचक्र॒मे। पृ॒थि॒व्याः स॒प्त धाम॑भिः॥ इ॒दं विष्णु॒र्विच॑क्रमे त्रे॒धा नि द॑धे प॒दम्। समू᳚ढमस्य पाꣳसु॒रे॥ त्रीणि॑ प॒दा वि च॑क्रमे॒ विष्णु॑र्गो॒पा अदा᳚भ्यः। ततो॒ धर्मा᳚णि धा॒रय॑न्॥ विष्णोः॒ कर्मा᳚णि पश्यत॒ यतो᳚ व्र॒तानि॑ पस्प॒शे। इन्द्र॑स्य॒ युज्यः॒ सखा᳚॥ तद्विष्णोः᳚ पर॒मं प॒दꣳ सदा᳚ पश्यन्ति सू॒रयः॑। दि॒वी॒व॒ चक्षु॒रात॑तम्॥ तद्विप्रा᳚सो विप॒न्यवो᳚ जागृ॒वाꣳस॒ः समि᳚न्धते। विष्णो॒र्यत् प॑र॒मं प॒दम्॥

रुद्रसूक्तम्

प्रतिसरबन्धने शान्तिकर्मसु च विनियोगः

सं ४.५.१०॥ ४.५.१०॥ ४.५.१०॥ आ ४.५॥ सं १.३.१४॥ १.३.१४॥

परि॑णो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दुर्म॒तिर॑घा॒योः। अव॑स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृडय॥ स्तु॒हि श्रु॒तं ग॑र्त॒सदं॒ युवा॑नं मृ॒गं न भी॒मम॑ुपह॒त्नुमु॒ग्रम्। मृ॒डा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो अ॒न्यन्ते॑ अ॒स्मन्निव॑पन्तु॒ सेनाः॑॥ मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑ सु॒मना॑ भव। प॒र॒मे वृ॒क्ष आयु॑धं नि॒धाय॒ कृत्तिं॒ वसा॑न॒ आच॑र॒ पिना॑कं॒ बिभ्र॒दाग॑हि॥ अर्ह॑न् बिभर्षि॒ साय॑कानि॒ धन्व॑। अर्ह॑न्नि॒ष्कं य॑ज॒तं वि॒श्वरू॑पम्। अर्ह॑न्नि॒दं द॑यसे॒ विश्व॒मभ्भु॑वम्। न वा ओजी॑यो रुद्र॒ त्वद॑स्ति॥ त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्व॑ꣳ शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे। त्वं वातै॑ररु॒णैर्या॑सि शङ्ग॒यस्त्वं पू॒षा विं॑ध॒तः पा॑सि॒ नु त्मना॑। आ वो॒ राजा॑नमध्व॒रस्य॑ रु॒द्रꣳ होता॑रꣳ सत्य॒यज॒ꣳ रोद॑स्योः। अ॒ग्निं पु॒रात॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरू॒पमव॑से कृणुध्वम्॥

श्रीसूक्तम्

प्रतिसरबन्धने शान्तिकर्मसु च विनियोगः

हिर॑ण्यवर्णा॒ं हरि॑णीं सु॒वर्णर॑ज॒तस्र॑जाम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह। तां म॒ आव॑ह जातवेदो ल॒क्ष्मीमन॑पगा॒मिनी॑म्। यस्या॒ं हिर॑ण्यं वि॒न्देय॒ं गाम॒श्वं॒ पुरु॑षान॒हम्। अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑दप्र॒बोधि॑नीम्। श्रिय॑ं दे॒वीमुप॑ह्वये॒ श्रीर्मा॑दे॒वीर्जु॑षताम्। कां॒सो॒ऽस्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम्। प॒द्मे॒स्थि॒तां प॒द्मव॑र्णां ता॒मि॒होप॑ह्वये॒ श्रिय॑म्। च॒न्द्रां

प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रिय॑ं लो॒के दे॒वजु॑ष्टामुदा॒राम्। तां
प॒द्मिनी॑मीं॒ शर॑णम॒हं प्रप॑द्ये॒ऽलक्ष्मीर्मे॑ नश्यता॒ं त्वां वृ॑णे।
आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः।
तस्य॒ फला॑नि॒ तप॒सानु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः।
उपै॑तु॒मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह। प्रा॒दु॒र्भू॒तोऽस्मि॑
रा॒ष्ट्रेऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे। क्षुत्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॒लक्ष्मीं
ना॑शया॒म्यहम्। अभू॑ति॒मस॑मृद्धिं॒ च सर्वा॒न्निर्णु॑दमे॒ गृहात्। गन्ध॑द्वा॒रां
दु॑राध॒र्षां नि॒त्यपु॑ष्टां करी॒षिणी᳚म्। ई॒श्वरी॑ं सर्व॑भूताना॒ं तामि॒होप॑ह्वये॒
श्रिय᳚म्। मन॑सः काम॒माकू॑तिं वा॒चः स॒त्यम॑शीमहि। प॒शू॒नां
रू॒प॑मन्न॒स्य मयि॒ श्रीः श्र॑यतां॒ यशः। कर्द॑मे॒न प्र॑जाभू॒ता म॒यि
सं॑भव॒कर्द॑म। श्रिय॑ं वा॒सय॑ मे कु॒ले मा॒तर॑ं पद्म॒मालि॑नीम्। आप॑ः
सृ॒जन्तु॑ स्नि॒ग्धा॒नि चिक्ली॒तव॑समे॒ गृहे। निच॑दे॒वीं मा॒तर॒ं श्रिय॑ं
वा॒सय॑ मे कु॒ले। आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं सु॒वर्णा᳚ं हेम॒मालि॑नीम्।
सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह। आ॒र्द्रां य॒ः करि॑णीं
य॒ष्टिं पि॒ङ्ग॒लां᳚ पद्म॒मालि॑नीम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒
आव॑ह। तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्। यस्यां॒
हिर॑ण्य॒ं प्रभू॑त॒ं गावो॑ दा॒स्योऽश्वा᳚न् वि॒न्देय॒ं पुरु॑षान॒हम्॥

श्रीसूक्तशेषः

वैष्णवानां नित्यपारायणे विनियोगः

यः शु॒चिः प्रय॑तो भू॒त्वा जु॒हुया॑दाज्य॒मन्व॑हम्। सूक्त॑ं प॒ञ्चद॑शर्च॒ं च
श्री॒काम॑ः सत॒तं ज॑पेत्। प॒द्मा॒न॒ने प॑द्म ऊ॒रू प॒द्माक्षी॑ पद्म॒सम्भ॑वे।
तन्मे॑ भ॒जसि॑ प॒द्मा॒क्षी॒ ये॒न सौख्य॑ं ल॒भाम्य॑हम्। अ॒श्व॒दायी॑ गोदा॒यी

धनदायी महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे। पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि। विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व। पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम्। प्रजानां भवसि माता आयुष्मन्तं करोतु मे। धनं मेग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते। वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः। न क्रोधो न च मात्सर्यं न लोभो नाशुभामतिः। भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्। सरसिजनिलये सरोजहस्ते धवलतरां शुकगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्। विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्। महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते। धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

भूसूक्तम्

वास्तुशान्तिकर्मणि विनियोगः

तै॰सं॰ १.५.३.१०

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा। उपस्थे ते देव्यदिते ऽग्निमन्नादमन्नाद्यायाऽऽदधे॥ आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरं च प्रयन्त्सुवः॥ त्रि॒ꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः॥ अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन्महिषः सुवः॥ यत्त्वा क्रुद्धः परोवप मन्युना

यदवंर्त्या। सुकल्पंमग्ने तत्तव पुनस्त्वोद्दींपयामसि॥ यत्ते मन्युपंरोप्तस्य पृथिवीमनुं दध्वसे। आदित्या विश्वे तद्देवा वसंवश्च समाभंरन्॥ मनो ज्योतिंर्जुषतामाज्यं विच्छिंन्नं यज्ञꣳ समिमं दंधातु। बृहस्पतिंस्तनुतामिमं नो विश्वें देवा इह मांदयन्ताम्॥

सप्त तें अग्ने समिधंः सप्त जिह्वाः सप्तर्षंयः सप्त धामं प्रियाणिं। सप्त होत्राः सप्तधा त्वां जयन्ति सप्त योनीरा पृंणस्वा घृतेनं॥ पुनंरूर्जा निवंर्तस्व पुनंरग्न इषाऽऽयुंषा। पुनंर्नः पाहि विश्वतंः॥ सह रय्या निवंर्तस्वाग्ने पिन्वंस्व धारंया। विश्वप्स्निंया विश्वतस्परिं॥ लेकः सलेंकः सुलेकस्ते नं आदित्या आज्यं जुषाणा विंयन्तु केतः सकेंतः सुकेतस्ते नं आदित्या आज्यं जुषाणा विंयन्तु विवंस्वाꣳ अदिंतिर्देवंजूतिस्ते नं आदित्या आज्यं जुषाणा विंयन्तु॥

भूसूक्तखिलम्

वैष्णवानां नित्यपारायणे विनियोगः

मेदिनीं देवी वसुन्धंरा स्याद् वसुंधा देवी वासवीं। ब्रह्मवर्चसः पिंतृणां श्रोत्रं चक्षुर्मनंः। देवी हिरंण्यगर्भिणीं देवी प्रंसोदरीं। रसंने सत्यायंने सीद। समुद्रवती सांवित्री ह नों देवी मह्यकीं। महाधरंणी महोऽर्यतिंस्था। शृङ्गे शृंङ्गे यज्ञे यंज्ञे विभीषणीं। इन्द्रंपत्नी व्याजनीं सुरसितं इह। वायुपरीं जलशयंनी स्वयं धारा सत्यं धोपरिंमेदिनी। सोपरिंधत्तङ्गाय। विष्णुपत्नीं मंहीं देवीं माधवीं मांधवप्रियाम्। लक्ष्मींप्रियसंखीं देवीं नमाम्यच्युंतवल्लभाम्। धनुर्धरायैं विद्महें सर्वसिद्ध्यै चं धीमहि। तन्नों धरा प्रचोदयांत्॥

नीलासूक्तम्

तै॰सं॰ ४.४.१२.५

वैष्णवानां नित्यपारायणे विनियोगः

गृणाहि। घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु।
ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता।
बृहस्पतिर्मातरिश्वोत वायुः संधुवाना वाता अभि नो गृणन्तु।
विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी॥

नारायणोपनिषत्

विष्णोरभिषेचने विनियोगः

अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति।
नारायणात् प्राणो जायते। मनः सर्वेन्द्रियाणि च। खं
वाजुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद् ब्रह्मा
जायते। नारायणाद् रुद्रो जायते। नारायणादिन्द्रो जायते।
नारायणात् प्रजापतयः प्रजायन्ते। नारायणाद् द्वादशादित्या रुद्रा
वसवः सर्वाणि च छन्दाꣳसि। नारायणादेव समुत्पद्यन्ते।
नारायणे प्रवर्तन्ते। नारायणे प्रलीयन्ते॥

ॐ। अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः।
शक्रश्च नारायणः। द्यावापृथिव्यौ च नारायणः। कालश्च
नारायणः। दिशश्च नारायणः। ऊर्ध्वश्च नारायणः। अधश्च
नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदꣳ सर्वम्। यद्भूतं
यच्च भव्यम्। निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो

देव एको नारायणः। न द्वितीयोँऽस्ति कश्चित्। य एवं वेद। स विष्णुरेव भवति स विष्णुरेव भवति॥

ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाँक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यꣳ रायस्पोषं गौपत्यम्। ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। य एवं वेद॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम्। अकार उकार मकार इति। तानेकधा समभरत् तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्। ॐ नमो नारायणायेति मन्त्रोपासकः। वैकुण्ठभुवनलोकं गमिष्यति। तदिदं पदं पुण्डरीकं विज्ञानघनम्। तस्मात् तदिदावन्मात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम्। कारणरूपमकार परब्रह्मोम्। एतदथर्वशिरो योऽधीते। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। माध्यंदिनमादित्याभिमुखो ऽधीयानः पञ्चपातकोपपातकाँत् प्रमुच्यते। सर्ववेदपारायणपुण्यं लभते। नारायणसायुज्यमवाप्नोति नारायणसायुज्यमवाप्नोति। य एवं वेद। इत्युपनिषत्। ॐ शान्तिः शान्तिः शान्तिः॥

हिरण्यगर्भसूक्तम्

महानारयणोपनिषदि मन्त्रप्रतीको दृश्यते

तै॰सं॰ ४.१.८

हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताऽग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्। स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ यः प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒त्त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑। य ईशे॑ अ॒स्य द्वि॒पद॒श्चतु॑ष्पद॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ य आँत्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः। यस्य॑ छा॒याऽमृतं॒ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ यस्ये॒मे हि॒मव॑न्तो महि॒त्वा यस्य॑ समु॒द्रꣳ र॒सया॑ स॒हाऽऽहुः। यस्ये॒माः प्र॒दिशो॒ यस्य॑ बा॒हू कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ यं क्रन्द॑सी॒ अव॑सा तस्तभा॒ने अ॒भ्यैक्षे॑तां॒ मन॑सा॒ रेज॑माने। यत्राधि॒ सूर॒ उदि॑तौ॒ व्येति॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ येन॒ द्यौरु॒ग्रा पृ॑थि॒वी च॑ दृ॒ढे येन॒ सुव॑ः स्तभि॒तं येन॒ नाक॑ः। यो अ॒न्तरि॑क्षे॒ रज॑सो वि॒मान॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ आपो॑ ह॒ यन्म॑ह॒तीर्विश्व॒माय॒न्दक्षं॒ दधा॑ना ज॒नय॑न्तीर॒ग्निम्। ततो॑ दे॒वानां॒ निर॑वर्त॒ताऽसु॒रेक॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ यश्चि॒दापो॑ महि॒ना प॒र्यप॑श्य॒द् दक्षं॒ दधा॑ना ज॒नय॑न्तीर॒ग्निम्। यो दे॒वेश्वधि॑ दे॒व एक॒ आसी॒त् कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

सौरसूक्तम् (परि॰)

भीमरथशान्तिकर्मणि विनियोगः

तै॰सं॰ १.१.४॥ तै॰सं॰ १.१.११॥ तै॰सं॰ १.२.४॥ तै॰सं॰ ३.२.१०॥
तै॰सं॰ ३.३.१०॥ तै॰सं॰ ३.२.४॥ तै॰सं॰ ३.५.५॥ तै॰सं॰ ३.४.५॥

सुवं॑र॒भि वि ख्ये॑षं वैश्वान॒रं ज्योति॒र्दृꣳह॑न्तां॒ दुर्या॒ द्यावा॑पृथि॒व्योरु॒र्व॑न्तरि॑क्ष॒मन्वि॒ह्यदि॑त्यास्त्वो॒पस्थे॑ सादया॒म्यग्ने॑ ह॒व्यꣳ र॑क्षस्व॥ सूर्य॑स्त्वा पु॒रस्ता॑॑त् पातु॒ कस्या॑॑श्चिद॒भिश॑॑स्त्याः॥ सूर्य॑स्य॒ चक्षु॒रारु॑हम॒ग्नेर॒क्ष्णः क॒नीनि॑कां॒ यदेत॑शेभि॒रीय॑से॒ भ्राज॑मानो विप॒श्चिता॑॑॥ भूर॑सि॒ श्रेष्ठो॑ रश्मी॒नां प्रा॑ण॒पाः प्रा॒णं मे॑ पाहि॥ सूर्यो॑ दे॒वो दि॑वि॒षद्भ्यो॑ धा॒ता क्ष॒त्राय॑ वा॒युः प्र॒जाभ्यः॑। बृह॒स्पति॑स्त्वा प्र॒जाप॑तये॒ ज्योति॑ष्मतीं जुहोतु॥ सूर्यो॑ मा दे॒वो दि॒व्यादꣳह॑सस्पातु॥ सूर्यो॑ मा दे॒वो दे॒वेभ्यः॑ पातु वा॒यु॒र॒न्तरि॑क्षा॒द्यज॑मानो॒ऽग्निर्मा॑ पातु॒ चक्षु॑षः। सक्ष॒ शूष॒ सवि॑त॒र्विश्व॑चर्षण ए॒तेभिः॑ सोम॒नाम॑भिर्विधेमते॒ तेभिः॑ सोम॒नाम॑भिर्विधेमते॥ सूर्यो॑ दि॒वोऽधि॑पति॒ः स मा॑ऽवत्व॒स्मिन् ब्रह्म॑न्न॒स्मिन् क्ष॒त्रेँऽस्यामा॒शिष्य॒स्यां पु॑रो॒धाया॑म॒स्मिन् कर्म॑न्न॒स्यां दे॒वहू॑॑त्याम्॥

(सप्तर्चः, त्र्यर्चः, सप्तर्चः इत्येवं अवशिष्यते)

आदित्यमन्त्राः

आदित्योपासने सूर्यनमस्करणे विनियोगः

तै॰ब्रा॰ ३.७.६

उ॒द्यन्न॒द्य मि॑त्रमहः। स॒पत्ना᳚न्मे अनीनशः। दि॒वैन॑ान् वि॒द्युता॑ जहि। नि॒म्रोच॒न्नध॑रान् कृधि॥ उ॒द्यन्न॒द्य वि नो॑ भज। पि॒ता पु॒त्रेभ्यो॒ यथा᳚। दी॒र्घा॒यु॒त्वस्य॑ हेशिषे। तस्य॑ नो देहि सूर्य॥

उ॒द्यन्न॒द्य मि॑त्रमहः। आ॒रोह॒न्नुत्त॑रां॒ दिव᳚म्। हृ॒द्रो॒गं मम॑ सूर्य। ह॒रि॒माणं॑ च नाशय॥ शुके॑षु मे हरि॒माण᳚म्। रो॒प॒णाका॑सु दध्मसि। अथो॑ हारिद्र॒वेषु॑ मे। ह॒रि॒माणं॒ नि द॑ध्मसि। उद॑गाद॒यमा॑दि॒त्यः। विश्वे॑न॒ सह॑सा स॒ह। द्वि॒षन्तं॒ मम॑ र॒न्धय॑न्। मो अ॒हं द्वि॒ष॒तो र॑धम्॥

नवग्रहमन्त्राः

नवग्रहाणामामन्त्रणे विनियोगः

तै॰सं॰ ३.४.११॥ तै॰ब्रा॰ ३.५.२॥ तै॰सं॰ ३.१.४॥

आ स॒त्येन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च। हि॒र॒ण्यये॑न स॒वि॒ता रथे॒नाऽदे॒वो या॑ति॒ भुव॑ना वि॒पश्य॑न्॥ अ॒ग्निं दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम्। अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु᳚म्॥ येषा॒मीशे॑ पशु॒पतिः॑ पशू॒नां चतु॑ष्पदामु॒त च॑ द्वि॒पदा᳚म्। निष्क्री॑तो॒ऽयं य॒ज्ञियं॑ भा॒गमे॑तु रा॒यस्पोषा॒ यज॑मानस्य सन्तु॥

तै॰सं॰ ४.४.४॥ तै॰आ॰ १०.१.१०॥ तै॰सं॰ १.१.१४॥

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत्पतिः॑ पृथि॒व्या अ॒यम्। अ॒पाꣳ रेता॑ꣳसि जिन्वति॥ स्यो॒ना पृ॑थिवि॒ भवा॑ नृक्ष॒रा नि॒वेश॑नी। यच्छा॑ नः॒ शर्म॑

स॒प्रथाः॥ क्षेत्र॑स्य॒ पति॑ना व॒यꣳ हि॒तेने॑व जयामसि। गामश्वं॑ पोषयि॒त्वा स नो॑ मृडाती॒दृशे॑॥

तै॰ब्रा॰ २.८.२॥ तै॰सं॰ १.७.१३॥ तै॰सं॰ १.६.१२॥

प्र व॑ः शु॒क्राय॑ भा॒नवे॑ भरध्वꣳ ह॒व्यं म॒तिं चा॒ग्नये॒ सुपू॑तम्। यो दैव्या॑नि॒ मानु॑षा ज॒नूꣳष्य॒न्तर्विश्वा॑नि वि॒द्मना॒ जिगा॑ति॥ इ॒न्द्रा॒णीमा॒सु नारि॑षु सु॒पत्नी॑म॒हम॑श्रवम्। न ह्य॑स्या अप॒रं च॒ न ज॒रसा॒ मर॑ते॒ पति॑ः॥ इन्द्रं॑ वो वि॒श्वत॒स्परि॒ हवा॑महे॒ जने॑भ्यः। अ॒स्माक॑मस्तु॒ केव॑लः॥

तै॰सं॰ ३.२.५॥ तै॰ब्रा॰ २.५.८॥ तै॰ब्रा॰ २.४.६॥

आप्या॑यस्व॒ समे॑तु ते वि॒श्वत॑ः सोम॒ वृष्णि॑यम्। भवा॒ वाज॑स्य संग॒थे॥ अ॒प्सु मे॒ सोमो॑ अब्रवीद॒न्तर्विश्वा॑नि भेष॒जा। अ॒ग्निं च॑ वि॒श्वश॑म्भु॒वमाप॑श्च वि॒श्वभे॑षजीः॥ गौ॒री मि॑माय सलि॒लानि॒ तक्ष॒त्येक॑पदी द्वि॒पदी॒ सा चतु॑ष्पदी। अ॒ष्टाप॑दी॒ नव॑पदी बभू॒वुषी॑ स॒हस्रा॑क्षरा पर॒मे व्यो॑मन्॥

तै॰सं॰ ४.७.१३॥ तै॰सं॰ १.२.१३॥ तै॰सं॰ १.२.१३॥

उद् बु॑ध्यस्वाग्ने॒ प्रति॑ जागृह्येनमिष्टापू॒र्ते सꣳ सृ॑जेथाम॒यं च॑। पुन॑ः कृण्वꣳस्त्वा॑ पि॒तरं॒ युवा॑नम॒न्वाता॑ꣳ सी॒त्त्वयि॒ तन्तु॑मे॒तम्॥ इ॒दं विष्णु॒र्विच॑क्रमे त्रे॒धा नि द॑धे प॒दम्। समू॑ढमस्य पाꣳसु॒रे॥ विष्णो॑ र॒राट॑मसि॒ विष्णो॑ः पृ॒ष्ठम॑सि॒ विष्णो॒ः श्नप्त्रे॑ स्थो॒ विष्णो॒ः स्यूर॑सि॒ विष्णो॑र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा॥

तै॰सं॰ १.८.२२॥ तै॰सं॰ १.४.१८॥ तै॰ब्रा॰ २.८.८.२१॥

बृह॑स्पते॒ अति॒ यद॒र्यो अर्हा॑द् द्यु॒मद् वि॒भाति॒ क्रतु॑म॒ज्जने॑षु। यद्दी॒दय॒च्छव॑सर्त प्रजात॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम्॥ इन्द्रं॑

मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्यं। तव प्रणीती तवं शूरशर्मन्नाविंवासन्ति कवयंः सुयज्ञाः॥ ब्रह्म यज्ञानं प्रंथमं पुरस्ताद् वि सीमतः सुरुचो वेन आंवः। स बुध्नियां उपमा अंस्य वि ष्ठाः सतश्च योनिमसंतश्च विवंः॥

तै॰ब्रा॰ २.५.८॥ तै॰ब्रा॰ २.८.१॥ तै॰सं॰ २.६.१२॥

शं नो देवीरभिष्टंय आपो भवन्तु पीतयैं। शं योरभिस्रंवन्तु नः॥
प्रजांपते नत्वदेतान्यन्यो विश्वा जातानि परि ता बंभूव।
यत्कांमास्ते जुहुमस्तन्नो अस्तु वयङ् स्यांम पतंयो रयीणाम्॥
इमं यंम प्रस्तरमा हि सीदाङ्गिंरोभिः पितृभिंः संविदानः। आ त्वा मन्त्राः कविशस्ता वंहन्त्वेना रांजन् हविषां मादयस्व॥

तै॰सं॰ ४.२.११॥ तै॰स॰ १.५.३ ॥ तै॰सं॰ ४.२.५॥

कयां नश्चित्र आ भुंवदूती सदावृंधः सखाँ। कया शचिंष्ठया वृता॥
आयं गौः पृश्निंरक्रमीदसंनन्मातरं पुनंः। पितरं च प्रयन्त्सुवंः॥
यत्ते देवी निर्ऋतिराबबन्ध दामं ग्रीवास्वंविचर्त्यम्। इदं ते तद्विष्याम्यायुंषो न मध्यादथा जीवः पितुमंद्धि प्रमुंक्तः॥

तै॰सं॰ ७.४.१०॥ तै॰सं॰ ३.४.११॥ ऋ॰सं॰६.६.७॥

केतुं कृण्वन्नं केतवे पेशो मर्या अपेशसैं। समुषद्भिंरजायथाः॥
ब्रह्मा देवानां पदवीः कंवीनामृषिर्विप्रांणां महिषो मृगाणाम्। श्येनो गृध्रांणाङ् स्वधिंतिर्वनांनाꣳ सोमंः पवित्रमत्यैति रेभंन्॥ (ऋ॰) स चिंत्रचित्रं चितयंन्तमस्मे चित्रंक्षत्र चित्रतंमं वयोधाम्। चन्द्रं रयिं पुंरुवीरं बृहन्तं चन्द्रं चन्द्राभिंर्गृणते युंवस्व॥

दिग्पालकमन्त्राः

अष्टदिग्पालकानामामन्त्रणे विनियोगः

तै॰सं॰ १.६.१२॥ तै॰सं॰ २.५.१२॥ तै॰ब्रा॰ ३.१.२॥ तै॰सं॰ ४.२.५॥ तै॰सं॰ २.१.११॥ तै॰ब्रा॰ २.८.१॥ ऋ॰सं॰ १.८९.५॥ ऋ॰सं॰ ८.६३.१२॥

त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳ हवे॑हवे सु॒हव॒ꣳ शूर॒मिन्द्र᳚म्। हु॒वे नु श॒क्रं पु॑रुहू॒तमिन्द्र॑ꣴ स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विन्द्रः॑॥

त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान् दे॒वस्य॒ हेडो॑ऽव॑ यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषा॑ꣳसि॒ प्र मु॑मुग्ध्य॒स्मत्॥

सु॒गं न॒ः पन्था॒मभ॑यं कृणोतु। यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा᳚। यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः। तद॑स्य चि॒त्रꣳ ह॒विषा॑ यजाम॥

असु॑न्वन्त॒मय॑जमानमिच्छस्ते॒नस्ये॒त्यां तस्क॑र॒स्यान्वे॑षि। अ॒न्यम॒स्मदि॑च्छ॒ सा त॑ इ॒त्या नमो॑ देवि निर्ऋते॒ तुभ्य॑मस्तु॥

तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा᳚स्ते॒ यज॑मानो ह॒विर्भिः॑। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳस॒ मा न॒ आयु॒ः प्रमो॑षीः॥

आ नो॑ नि॒युद्भिः॑ श॒तिनी॑भिरध्व॒रम्। स॒ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम्। वायो॑ अ॒स्मिन् ह॒विषि॑ मादयस्व। यू॒यं पा॑तः स्व॒स्तिभि॒ः सदा॑ नः॥

व॒यꣳ सो॑म व्र॒ते तव॑। मन॑स्त॒नूषु॒ बिभ्र॑तः। प्र॒जाव॑न्तो अशीमहि। इ॒न्द्रा॒णी दे॒वी सु॒भगा॑सु॒पत्नी᳚॥

(ऋ०) तमीशा᳚नं॒ जग॑तः त॒स्थुष॒स्पतिं᳚ धियं जि॒न्वमव॑से हूमहे
व॒यम्। पू॒षा नो॒ यथा॒ वेद॑सा॒मस॑द्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्ध
स्व॒स्तये᳚॥

(ऋ०) अ॒स्मे रु॒द्रा मे॒हना॒ पर्व॑तासो वृत्र॒हत्ये॒ भर॑हूतौ स॒जोषाः᳚।
यः शंस॑ते स्तुव॒ते धायि॑प॒ज्र इन्द्र॑ज्येष्ठा अ॒स्माँ अ॑वन्तु दे॒वाः॥

स्यो॒ना पृ॑थि॒वि भवा॑ नृक्ष॒रा नि॒वेश॑नी। यच्छा॑ नः॒ शर्म॑ स॒प्रथाः᳚॥

दुर्गाद्यष्टदेवतामन्त्राः

सर्वदेवावरणपूजने विनियोगः

तै०आ० १०॥ तै०सं० २.३.१४॥ तै०सं० १.१.१४॥ तै०सं० ३.४.१०॥ तै०सं० १.८.६॥
तै०आ० १०॥ तै०आ० १०॥ तै०आ० १०॥ तै०सं० १.४.१३

जा॒तवे॑दसे सुनवाम॒ सोम॑मरातीय॒तो निद॑हाति॒ वेदः॑। स नः॑
पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दुरि॒तात्य॒ग्निः॥ दुर्गायै नमः॥

ग॒णानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम्।
ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ नः॑ शृ॒ण्वन्नू॒तिभिः॑ सीद॒
साद॑नम्॥ महागणपतये नमः॥

क्षेत्र॑स्य॒ पति॑ना व॒यꣳ हि॒तेने॑व जयामसि। गामश्वं॑ पोषयि॒त्वा स
नो॑ मृडाती॒दृशे᳚॥ क्षेत्रपालाय नमः॥

वास्तो᳚ष्पते॒ प्रति॑ जानीह्य॒स्मान् स्वा॑वे॒शो अ॑नमी॒वो भ॑वा नः।
यत्त्वेम॑हे॒ प्रति॒ तं नो॑ जुषस्व॒ शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे॥
वास्तोष्पतये नमः॥

त्र्य॑म्बकं यजामहे सुग॒न्धिं पु॑ष्टि॒वर्ध॑नम्। उ॒र्वा॒रु॒कमि॑व॒
बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॓त्॥ त्र्यम्बकाय नमः॥

यत॑ इन्द्र॒ भया॑महे॒ ततो॑ नो॒ अभ॑यं कृधि। मघ॑वञ्छ॒ग्धि तव॒ तन्न॑
ऊ॒तये॒ विद्विषो॒ विमृधो॑ जहि॥ स्व॒स्ति॒दा वि॒शस्पति॑र्वृत्र॒हा विमृधो॑
व॒शी। वृषेन्द्र॑ः पु॒र ए॑तु नः स्वस्ति॒दा अ॑भयङ्क॒रः॥ अभयङ्करेन्द्राय
नमः॥

ये ते॑ स॒हस्र॑म॒युत॒ं पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे। तान् य॒ज्ञस्य॑
मा॒यया॒ सर्वा॒नव॑ यजामहे॥ मृत्यवे नमः॥

मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒ताय॑ जा॒तम॒ग्निम्। क॒वि॑ꣳ
स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः॥ मूर्धात्मने
नमः॥

ब्रह्मयज्ञमन्त्राः

तै॰ब्रा॰ ३.१०.९.२

विद्यु॑दसि॒ विद्य॑ मे पा॒प्मान॓म्। ऋ॒तात् स॒त्यमुपै॑मि॥ वृष्टि॑रसि॒ वृश्च॑
मे पा॒प्मान॓म्। स॒त्यमुपा॑गाम्॥

शिष्टसन्धावन्दनमन्त्राः (परि॰)

(महानारायणोपनिषदि मन्त्राः ( ) तमे पृष्टे द्रष्टव्याः)

मि॒त्रस्य॑ चर्षणी॒ धृत॒ः ॰ ॥ मित्रो जना॑न् ॰ ॥ प्र स मि॑त्र॒ ॰ ॥

आ स॒त्येन॒ ॰ ॥ उद्व॒यं तम॑स॒स्परि॒ ॰ ॥ उदु॒त्यं जा॒तवे॑दसं ॰ ॥ चि॒त्रं दे॒वाना॒म् ॰ ॥ आऽप्रा॒ द्यावा॑पृथि॒वी ॰ ॥ पश्ये॑म श॒रद॑ः श॒तं ॰ ॥ य उद॑गान्महृतो॰ ॥

इ॒मं मे॑ वरुण ॰ ॥ तत्त्वा॑ यामि॒ ॰ ॥ यच्चि॒द्धि ते॒ ॰ ॥ यत् किञ्चे॒दं ॰ ॥ कि॒त॒वासो॒ ॰ ॥

दर्शश्राद्धमन्त्राः (परि०)

सौ॰

आया॑त पितरः सोम्या गम्भी॒रैः प॒थिभि॑ः पूर्व्यैः। प्र॒जाम॒स्मभ्यं॑ दद॒तो र॒यिं च॑ दीर्घायु॒त्वं च॑ श॒तशा॑रदं च॥

तै॰ब्रा॰ ३.७.४.१०

स॒कृ॒दा॒च्छि॒न्नं ब॒र्हिरू॒र्णा॑मृदु। स्यो॒नं पि॒तृभ्य॑स्त्वा भराम्य॒हम्। अ॒स्मिन् सी॑दन्तु मे पि॒तर॑ः सो॒म्याः। पि॒ता॒म॒हाः प्र॒पिता॑महाश्चानु॒गैः स॒ह॥

तै॰सं॰ २.६.१२॥ तै॰सं॰ २.६.१२

उदी॑रता॒मव॑र॒ उत्परा॑स॒ उन्म॑ध्य॒माः पि॒तर॑ः सो॒म्यास॑ः। असुं॒ य ई॒युर॑वृ॒का ऋ॑त॒ज्ञास्ते नो॑ऽवन्तु पि॒तरो॒ हवे॑षु॥ अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यास॑ः। तेषां॑ व॒यꣳ सु॑म॒तौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म॥

सौ॰

आयं॑न्तु पि॒तरः॑ सो॒म्यासो॑ऽग्निष्वा॒त्ताः प॒थिभि॑र्दे॒वयानैः॑। अ॒स्मिन् य॒ज्ञे स्व॒धया॒ मा॒द॒य॒न्त्वधि॑ ब्रुवन्तु॒ ते अ॑वन्त्व॒स्मान्॥

तै॰ब्रा॰ २.६.३.२

पि॒तृभ्यः॑ स्वधा॒विभ्यः॑ स्व॒धा नमः॑। पि॒ता॒म॒हेभ्यः॑ स्वधा॒विभ्यः॑ स्व॒धा नमः॑। प्रपि॑तामहेभ्यः स्वधा॒विभ्यः॑ स्व॒धा नमः॑॥

ए॰ २.१९

ये चे॒ह पि॒तरो॒ ये च॒ नेह याँ॑श्च॑ वि॒द्म याँ॑ उ॑ च॒ न प्र॑वि॒द्म। अ॒ग्ने तान् वे॑त्थ॒ यदि॒ ते जा॑तवेद॒स्तया॑ प्र॒त्तँ स्व॒धया॑ मदन्तु॥

गृहप्रवेशजपमन्त्राः (परि॰)

ए॰ ॥ तै॰सं॰ ४.७.१२॥ तै॰सं ५.२.९॥

वास्तो॑ष्पते॒ प्रति॑ जानीह्य॒स्मान् स्वा॑वे॒शो अ॑नमी॒वो भ॑वा नः। यत्त्वेम॑हे॒ प्रति॒ तं नो॑ जुषस्व॒ शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे॥ वाजो॑ नः स॒प्त प्र॒दिश॒श्चत॑स्रो वा परा॒वतः॑। वाजो॑ नो॒ विश्वै॑र्दे॒वैर्धन॑साताविहाव॑तु॥ ए॒षां वा ए॒तल्लो॒काना॒ं ज्योति॒ः संभृ॑त॒ं यदु॒खा यदु॒खामु॑प॒दधा॑त्ये॒भ्य ए॒वा लो॒केभ्यो॒ ज्योति॒रव॑ रुन्धे मध्य॒त उप॑ दधाति मध्य॒त ए॒वास्मै॒ ज्योति॑र्दधाति॒ तस्मा॑न्मध्य॒तो ज्योति॒रुपा॑स्महे॒ सिक॑ताभिः पूरयत्ये॒तद् वा अ॒ग्नेर्वै॑श्वान॒रस्य॑ रू॒पम्॥

तै॰सं॰ १.८.१३

स॒मिध॒मा तिष्ठ गाय॒त्री त्वा॒ छन्द॑सामवतु त्रि॒वृत् स्तोमो॑ रथन्त॒रꣳ सामा॒ग्निर्दे॒वता॒ ब्रह्म॒ द्रवि॑णमु॒ग्रामा ति॑ष्ठ त्रि॒ष्टुप् त्वा॒ छन्द॑सामवतु पञ्चद॒शः स्तोमो॑ बृ॒हत् सामेन्द्रो॑ दे॒वता॑ क्ष॒त्रं द्रवि॑णं वि॒राज॒मा ति॑ष्ठ॒ जग॑ती त्वा॒ छन्द॑सामवतु सप्तद॒शः स्तोमो॑ वैरू॒पꣳ साम॑ म॒रुतो॑ दे॒वता॒ विड् द्रवि॑ण॒मुदी॑ची॒मा ति॑ष्ठानु॒ष्टुप् त्वा॒ छन्द॑सामवत्वेकवि॒ꣳशः स्तोमो॑ वैरा॒जꣳ साम॑ मि॒त्रावरु॑णौ दे॒वता॒ बल॒ं द्रवि॑णमू॒र्ध्वामा ति॑ष्ठ प॒ङ्क्तिस्त्वा छन्द॑सामवतु त्रिणवत्रयस्त्रि॒ꣳशौ स्तोमौ॑ शाक्वररैव॒ते साम॑नी॒ बृह॒स्पति॑र्दे॒वता॒ वर्चो॒ द्रवि॑णमी॒दृङ् चाँन्या॒दृङ् चै॑ता॒दृङ् च॑ प्रति॒दृङ् च॑ मि॒तश्च॒ संमि॑तश्च॒ सभ॑राः। शु॒क्रज्यो॑तिश्च चि॒त्रज्यो॑तिश्च स॒त्यज्यो॑तिश्च॒ ज्योति॑ष्माꣳ॑श्च स॒त्यश्च॑र्त॒पाश्च॒ अत्य॑ꣳहाः। अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहा॑ सवि॒त्रे स्वाहा॒ सर॑स्वत्यै॒ स्वाहा॑ पू॒ष्णे स्वाहा॒ बृह॒स्पत॑ये॒ स्वाहेन्द्रा॑य॒ स्वाहा॒ घोषा॑य॒ स्वाहा॒ श्लोका॑य॒ स्वाहाꣳशा॑य॒ स्वाहा॒ भगा॑य॒ स्वाहा॒ क्षेत्र॑स्य॒ पत॑ये॒ स्वाहा॑ पृथि॒व्यै स्वाहा॒न्तरि॑क्षाय॒ स्वाहा॑ दि॒वे स्वाहा॒ सूर्या॑य॒ स्वाहा॑ च॒न्द्रम॑से॒ स्वाहा॒ नक्ष॑त्रेभ्यः॒ स्वाहा॒ऽद्भ्यः स्वाहौष॑धीभ्यः॒ स्वाहा॒ व॒नस्पति॑भ्यः॒ स्वाहा॑ चरा॒चरेभ्यः॒ स्वाहा॑ परिप्लु॒वेभ्यः॒ स्वाहा॑ सरीसृ॒पेभ्यः॒ स्वाहा॑॥

तै॰सं॰ २.२.३॥ तै॰सं॰ २.५.१॥

अ॒ग्नये॒ कामा॑य पुरो॒डाश॑म॒ष्टाक॑पाल॒ं निर्व॑पे॒द् यं कामो॒ नोप॒नमे॑द॒ग्निमे॒व काम॒ꣳ॑ स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ स ए॒वैनं॒ कामे॑न॒ सम॑र्धय॒त्युपै॑न॒ं कामो॑ नमति॥ वि॒श्वरू॑पो॒ वै त्वा॒ष्ट्रः

पु॒रोहि॑तो दे॒वाना॑मासीत् स्व॒स्रीयोऽसु॑राणां॒ तस्य॒ त्रीणि॑
शी॒र्षाण्या॑सन् सोम॒पानꣳ॑ सु॒रा॒पान॑म॒न्नादनम्॥

तै॰सं॰ ७.३.१४

अ॒ग्निना॒ तपोऽन्व॑भवद् वा॒चा ब्रह्म॑ म॒णिना॑ रू॒पाणीन्द्रे॑ण दे॒वान्
वाते॑न प्रा॒णान् सूर्ये॑ण॒ द्यां च॒न्द्रम॑सा॒ नक्ष॑त्राणि य॒मेन॑ पि॒तॄन् राज्ञा॑
मनु॒ष्या॓न् फ॒लेन॑ नादे॒यान॑जग॒रेण॑ स॒र्पान् व्या॒घ्रेणा॑र॒ण्यान्
प॒शूञ्छ्ये॒नेन॑ पत॒त्रिणो॒ वृष्णाऽश्वा॓नृष॒भेण॒ गा ब॒स्तेना॒जा
वृष्णिनाऽवी॓र्व्री॒हिणाऽन्ना॑नि॒ यवे॒नौष॑धीर्न्य॒ग्रोधे॑न॒
वन॒स्पती॑नुदु॒म्बरे॒णोर्ज॑ं गायत्रि॒या छन्दाꣳ॑सि त्रि॒वृता॒ स्तोमा॓न्
ब्राह्म॒णेन॒ वाच॓म्॥१४॥

स्वाहा॒ऽधिमाधी॑ताय॒ स्वाहा॒ स्वाहाऽधी॑त॒ं मन॑से॒ स्वाहा॒ स्वाहा॒
मन॑ः प्र॒जाप॑तये॒ स्वाहा॒ काय॒ स्वाहा॒ कस्मै॒ स्वाहा॑ कत॒मस्मै॒
स्वाहाऽदि॑त्यै॒ स्वाहाऽदि॑त्यै म॒ह्यै॓ स्वाहाऽदि॑त्यै सुमृडी॒काय॑ै स्वाहा॒
सर॑स्वत्यै॒ स्वाहा॒ सर॑स्वत्यै बृह॒त्यै॓ स्वाहा॒ सर॑स्वत्यै पाव॒काय॑ै
स्वाहा॑ पू॒ष्णे स्वाहा॑ पू॒ष्णे प्र॑प॒थ्या॑य॒ स्वाहा॑ पू॒ष्णे न॒रन्धि॑षाय॒
स्वाहा॒ त्वष्ट्रे॒ स्वाहा॒ त्वष्ट्रे॑ तु॒रीपा॑य॒ स्वाहा॒ त्वष्ट्रे॑ पु॒रु॒रूपा॑य॒ स्वाहा॒
विष्ण॑वे॒ स्वाहा॒ विष्ण॑वे निखु॒र्यपाय॒ स्वाहा॒ विष्ण॑वे निभू॒य॒पाय॒
स्वाहा॓॥१५॥

द॒द्भ्यः स्वाहा॒ हनू॓भ्या॒ꣳ स्वाहोष्ठा॓भ्या॒ꣳ स्वाहा॒ मुखा॑य॒ स्वाहा॒
नासि॑काभ्या॒ꣳ स्वाहा॒ऽक्षीभ्या॒ꣳ स्वाहा॒ कर्णा॓भ्या॒ꣳ स्वाहा॑ पा॒र
इ॒क्षवो॑ऽवा॒र्येभ्य॒ः पक्ष्म॑भ्य॒ः स्वाहा॑ऽवा॒र इ॒क्षव॑ः पा॒र्येभ्य॒ः पक्ष्म॑भ्य॒ः
स्वाहा॑ शी॒र्ष्णे स्वाहा॓ भ्रू॒भ्याꣳ स्वाहा॑ ल॒लाटा॑य॒ स्वाहा॑ मू॒र्ध्ने स्वाहा॑

म॒स्तिष्का॑य॒ स्वाहा॒ केशे॑भ्यः स्वाहा॒ वहा॑य॒ स्वाहा॒ ग्री॒वाभ्य॒ः स्वाहा॒ स्क॒न्धेभ्य॒ः स्वाहा॒ कीक॑साभ्यः स्वाहा॑ पृ॒ष्टीभ्य॒ः स्वाहा॑ पाज॒स्या॑य॒ स्वाहा॑ पा॒र्श्वाभ्या॒ꣳ स्वाहा॑॥१६.१॥

अꣳसा॒भ्या॒ꣳ स्वाहा॑ दो॒षभ्या॒ꣳ स्वाहा॑ बा॒हुभ्या॒ꣳ स्वाहा॒ जङ्घा॒भ्या॒ꣳ स्वाहा॒ श्रोणी॒भ्या॒ꣳ स्वाहो॒रुभ्या॒ꣳ स्वाहा॑ऽष्ठी॒वद्भ्या॒ꣳ स्वाहा॒ जङ्घा॒भ्या॒ꣳ स्वाहा॑ भ॒सदे॒ स्वाहा॑ शिख॒ण्डेभ्य॒ः स्वाहा॑ वाल॒धाना॑य॒ स्वाहा॒ऽण्डाभ्या॒ꣳ स्वाहा॒ शेपा॑य॒ स्वाहा॒ रेत॑से॒ स्वाहा॑ प्र॒जाभ्य॒ः स्वाहा॑ प्र॒जन॑नाय॒ स्वाहा॑ प॒द्भ्यः स्वाहा॑ श॒फेभ्य॒ः स्वाहा॒ लोम॑भ्य॒ः स्वाहा॑ त्व॒चे स्वाहा॒ लोहि॑ताय॒ स्वाहा॑ मा॒ꣳसाय॒ स्वाहा॒ स्नाव॑भ्य॒ः स्वाहा॒ऽस्थभ्य॒ः स्वाहा॑ म॒ज्जभ्य॒ः स्वाहा॒ऽङ्गे॒भ्य॒ः स्वाहा॒ऽत्मने॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑॥१६.२॥

अ॒ञ्ज्येताय॒ स्वाहा॑ऽञ्जिस॒क्थाय॒ स्वाहा॑ शिति॒पदे॒ स्वाहा॒ शिति॑ककुदे॒ स्वाहा॑ शिति॒रन्ध्रा॑य॒ स्वाहा॑ शितिपृ॒ष्ठाय॒ स्वाहा॑ शि॒त्यꣳसा॑य॒ स्वाहा॑ पुष्प॒कर्णा॑य॒ स्वाहा॑ शि॒त्योष्ठा॑य॒ स्वाहा॑ शिति॒भ्रवे॒ स्वाहा॒ शिति॑भसदे॒ स्वाहा॑ श्वे॒तानू॑काशाय॒ स्वाहा॒ऽञ्जये॒ स्वाहा॑ ल॒लामा॑य॒ स्वाहाऽसि॑तज्ञवे॒ स्वाहा॑ कृष्णै॒ताय॒ स्वाहा॑ रोहितै॒ताय॒ स्वाहा॑ ऽरुणै॒ताय॒ स्वाहे॒दृशा॑य॒ स्वाहा॑ की॒दृशा॑य॒ स्वाहा॑ ता॒दृशा॑य॒ स्वाहा॑ स॒दृशा॑य॒ स्वाहा॒ विसं॑दृशाय॒ स्वाहा॒ सुसं॑दृशाय॒ स्वाहा॑ रू॒पाय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑॥१७॥

कृ॒ष्णाय॒ स्वाहा॑ श्वे॒ताय॒ स्वाहा॑ पि॒शंगा॑य॒ स्वाहा॑ सा॒रंगा॑य॒ स्वाहा॑ऽरु॒णाय॒ स्वाहा॑ गौ॒राय॒ स्वाहा॑ ब॒भ्रवे॒ स्वाहा॑ नकु॒लाय॒ स्वाहा॒ रोहि॑ताय॒ स्वाहा॒ शोणा॑य॒ स्वाहा॑ श्या॒वाय॒ स्वाहा॑ श्या॒माय॒

स्वाहा॑ पाक॒लाय॒ स्वाहा॑ सुरू॒पाय॒ स्वाहाऽनु॑रूपाय॒ स्वाहा॒ विरू॑पाय॒ स्वाहा॒ सरू॑पाय॒ स्वाहा॒ प्रति॑रूपाय॒ स्वाहा॑ श॒बला॑य॒ स्वाहा॑ कम॒लाय॒ स्वाहा॒ पृश्न॑ये॒ स्वाहा॑ पृश्नि॒सक्थाय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा᳚॥१८॥

ओष॑धीभ्य॒ः स्वाहा॒ मूले᳚भ्य॒ः स्वाहा॒ तूले᳚भ्य॒ः स्वाहा॒ काण्डे᳚भ्य॒ः स्वाहा॒ वल्शे᳚भ्य॒ः स्वाहा॒ पुष्पे᳚भ्य॒ः स्वाहा॒ फले᳚भ्य॒ः स्वाहा॑ गृही॒तेभ्य॒ः स्वाहाऽगृ॑हीतेभ्य॒ः स्वाहाऽव॑पन्नेभ्य॒ः स्वाहा॒ शया॑नेभ्य॒ः स्वाहा॒ सर्व॑स्मै॒ स्वाहा᳚॥१९॥

व॒नस्पति॑भ्य॒ः स्वाहा॒ मूले᳚भ्य॒ः स्वाहा॒ तूले᳚भ्य॒ः स्वाहा॒ स्कन्धो᳚भ्य॒ः स्वाहा॒ शाखा᳚भ्य॒ः स्वाहा॑ प॒र्णेभ्य॒ः स्वाहा॒ पुष्पे᳚भ्य॒ः स्वाहा॒ फले᳚भ्य॒ः स्वाहा॑ गृही॒तेभ्य॒ः स्वाहाऽगृ॑हीतेभ्य॒ः स्वाहाऽव॑पन्नेभ्य॒ः स्वाहा॒ शया॑नेभ्य॒ः स्वाहा॑ शि॒ष्टाय॒ स्वाहाऽति॑शिष्टाय॒ स्वाहा॒ परि॑शिष्टाय॒ स्वाहा॒ सꣳशि॑ष्टाय॒ स्वाहोच्छि॑ष्टाय॒ स्वाहा॑ रि॒क्ताय॒ स्वाहाऽरि॑क्ताय॒ स्वाहा॒ प्ररि॑क्ताय॒ स्वाहा॒ सꣳरि॑क्ताय॒ स्वाहोद्रि॑क्ताय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा᳚॥२०॥

मृत्युसूक्तम् (हरिं हरन्तम्)

आयुष्यहोमे विनियोगः

तै॰आ॰ ४.१६

हरि॒ꣳ हर॑न्त॒मनु॑यन्ति दे॒वाः। विश्व॒स्येशा॑नं वृष॒भं म॑ती॒नाम्। ब्रह्म॒ सरू॑प॒मनु॑ मे॒दमागा᳚त्। अय॑नं॒ मा विव॑धी॒र्विक्र॑मस्व॥ मा छि॑दो मृत्यो॒ मा व॑धीः। मा मे॒ बल॒ं विवृ॑हो॒ मा प्रमो॑षीः। प्र॒जां मा मे॑

रीरिष आयुरुग्र। नृचक्षसं त्वा हविषा विधेम॥ सद्यश्चंकमानाय। प्रवेपानाय मृत्यवैँ।

प्रास्मा आशा अश‍ृण्वन्। कामेनाजनयन्पुनः॥ कामेन मे काम आगाँत्। हृदयाद्धृदयं मृत्योः। यदमीषामदः प्रियम्। तदैतूपमामभि॥ परं मृत्यो अनुपरेहि पन्थाँम्। यस्ते स्व इतरो देवयानाँत्। चक्षुष्मते श‍ृण्वते तेँ ब्रवीमि। मा नः प्रजाꣳ रीरिषो मोत वीरान्॥ प्रपूर्व्यं मनसा वन्दमानः। नाधमानो वृषभं चर्षणीनाम्। यः प्रजानामेकराण्मानुषीणाम्। मृत्युं यजे प्रथमजामृतस्य॥

(अन्ये च मन्त्राः महानारायणोपनिषदि 218-तम पुटे)

मृत्युसूक्तम् (सर्वेषु वा)

भीमरथशान्तिकर्मणि विनियोगः

तै०ब्रा० ३.३.१५

सर्वेषु वा एषु लोकेषु मृत्यवोऽन्वायत्ताः। तेभ्यो यदाहुतीर्न जुहुयात्। लोकेलोके एनं मृत्युर्विन्देत्। मृत्यवे स्वाहा मृत्यवे स्वाहेत्यभिपूर्वमाहुतीर्जुहोति। लोकाल्लोकादेव मृत्युमव यजते। नैनं लोकेलोके मृयुर्विन्दति॥ यदमुष्मै स्वाहाऽमुष्मै स्वाहेति जुह्वत् सं चक्षीत। बहुं मृत्युममित्रं कुर्वीत॥ मृत्यवे स्वाहेत्येकस्मा एवैकाँन् जुहुयात्। एको वा अमुष्मिं लोके मृत्युः। अशनया मृत्युरेव। तमेवामुष्मिं लोकेऽवयजते॥ भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति। भ्रूणहत्यामेवाव यजते॥ तदाहुः। तद्भ्रूणहत्याऽपात्र्याथ। कस्माँद्यज्ञेऽपिक्रियत इति। अमृत्युर्वा अन्यो भ्रूणहत्याया

इत्याहुः। भ्रूणहत्या वाव मृत्युरिति॥ यद्भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति। मृत्युमेवाहुत्या तर्पयित्वा परिपाणं कृत्वा। भ्रूणघ्ने भेषजं करोति॥ एताꣳ ह वै मुण्डिभ औदन्यवः। भ्रूणहत्यायै प्रायश्चित्तिं विदाञ्चकार। यो हास्यापि प्रजायां ब्राह्मणꣳ हन्ति। सर्वस्मै तस्मै भेषजं करोति॥ जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति। वरुणो वै जुम्बकः। अन्तत एव वरुणमवयजते॥ खलतेर्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्धं जुहोति। एतद्वै वरुणस्य रूपम्। रूपेणैव वरुणमवयजते॥

तदित्पदम्

मृत्युञ्जयहोमे विनियोगः

तै॰ब्रा॰ ३.७.१०.५

तदित्पदं न विचिकेत विद्वान्। यन्मृतः पुनरप्येति जीवान्। त्रिवृद्यद्भुवनस्य रथवृत्। जीवो गर्भो न मृतः स जीवात्॥

राजयक्ष्मघ्नसूक्तम् (ऋ॰)

मृत्युञ्जयहोमे शौनकोक्तसर्वरोगहरशान्तिकर्मणि च विनियोगः

ऋ॰सं॰ १०.१६१

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्। ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम्॥ यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव। तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय॥ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम्। शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम्॥ शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु

वसन्तान्। शतमिँन्द्राग्नी संविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव। सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम्॥

उपचारमन्त्राः

सर्वदेवपूजने विविधोपाचारेषु विनियोगः

आसनाभिमन्त्रणम्

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया॥

उग्रभूतपिशाचाद्या ये च वै भूमिधारकाः।
एतेषामविरोधेन ब्रह्मकर्म समारभे॥

आसनमहामन्त्रस्य पृथिव्या मेरुपृष्ठऋषिः, सुतलं छन्दः, कूर्मो देवता, आसने विनियोगः।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

घण्टाभिमन्त्रणम्

ऋ॰सं॰ १०.६३.३॥ ऋ॰सं॰ ४.५०.६॥

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।
देवतापूजनार्थाय घण्टानादं करोम्यहम्॥

(ऋ॰) येभ्यों माता मधुंमत्पिन्वंते पयंः पीयूषं द्यौरदिंतिरद्रिंबर्हाः। उक्थशुंष्मान् वृषभरान् स्वप्नंसस्ताँ आंदित्याँ

अनु मदा स्वस्तयै॥ एवा पित्रे विश्वदैवाय वृष्णै यज्ञैर्विधेम
नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो
रयीणाम्॥

कलशस्थापनश्लोकाः

कलशाभिमन्त्रणम्

तै०आ० १०

आपो वा इद२ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव
आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः
स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्यापः सत्यमापः
सर्वा देवता आपो भूर्भुवःसुवराप ओम्॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः॥

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सुन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

सर्वे समुद्राः सरितस्तीर्थानि च ह्रदा नदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥

शङ्खाभिमन्त्रणम्

शङ्खं चन्द्रार्कदैवत्यं मध्ये वरुणसंयुतम्।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया।
शङ्खे तिष्ठन्ति विप्रेन्द्रास्तस्माच्छङ्खं प्रपूजयेत्॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।
पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते॥

गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तु ते॥

तै॰सं॰ ४.७.१५

अ॒ग्नेर्म॑न्वे प्रथ॒मस्य॒ प्रचे॑तसो॒ यं पाञ्च॑जन्यं ब॒हव॑ः समि॒न्धते॑।
विश्व॑स्यां वि॒शि प्र॑विविशि॒वाꣳस॑मीमहे॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥

आत्मपूजा

आत्मने नमः। अन्तरात्मने नमः। परमात्मने नमः। शुद्धात्मने नमः। ज्ञानात्मने नमः॥

देहो देवालयः प्रोक्तो जीवो देवः सनातनः।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत्॥

तै॰आ॰ १०

ब्रह्मा॒हम॑स्मि। अ॒हम॑स्मि॒ ब्रह्मा॒हम॑स्मि।

साधारणन्यासः

न्यासोऽयं महान्यासखण्डे 430-तमे पृष्ठे द्रष्टव्यः

आवाहनम्

स्वात्मसंस्थमजं शुद्धं त्वामद्य परमेश्वर ।[3]
अरण्यामिव हव्याशं मार्तावावाहयाम्यहम् ॥

ॐ भूर्भुवः सुवरों सशक्तिसाङ्गसायुधसवाहनसपरिवारं आवाहयिष्ये॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।[4]
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन् सन्निधिं कुरु ॥

आवाहितो भव। स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवकुण्ठितो भव। सुप्रीतो भव। सुप्रसन्नो भव। वरदो भव। सर्वाभीष्टप्रदो भव। स्वागतमस्तु। प्रसीद प्रसीद॥

प्राणाभिमन्त्रणम्

ॐ आं ह्रीं क्रों, क्रों ह्रीं आं, य र ल व श ष स हों [5] अस्य देवस्य प्राणा इह प्राणाः। जीव इह स्थितः। सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति मूर्तिहृदयं स्पृष्ट्वा त्रिः सकृद्वा जपेत् –

---

[3] “स्वात्मसंस्थामजां शुद्धां त्वामद्य परमेश्वरि” इति स्त्रीपक्षे

[4] “देवि सर्वजगन्नायिके” इति स्त्रीपक्षे

[5] “अस्या देव्याः” इति स्त्रीपक्षे

ऋ॰सं॰ १०.५९.६॥ ऋ॰सं॰ १०.५९.७॥

असु॑नीते॒ पुन॑र॒स्मासु॒ चक्षुः॒ पुनः॑ प्रा॒णमि॒ह नो॑ धेहि॒ भोग॑म्। ज्योक् प॑श्येम॒ सूर्य॑मु॒च्चर॑न्त॒मनु॑मते मृ॒ळया॑ नः स्व॒स्ति॥ पुन॑र्नो॒ असुं॑ पृथि॒वी द॑दातु॒ पुन॒र्द्यौर्दे॒वी पुन॑र॒न्तरि॑क्षम्। पुन॑र्न॒ः सोम॑स्त॒न्वं॑ ददातु॒ पुनः॑ पू॒षा प॒थ्यां॒३ या स्व॒स्तिः॥

(गर्भाधानादिपञ्चदशसंस्कारमिद्ध्यर्थं पञ्चदशप्रणवावृत्तीः कुर्यात्)

पञ्चामृताभिषेचनमन्त्राः

तै॰सं॰ १.४.३२॥ तै॰सं॰ ४.२.७॥

क्षीराभिषेचनम् – आ प्या॑यस्व॒ समे॑तु ते वि॒श्वतः॑ सोम॒ वृष्णि॑यम्। भवा॒ वाज॑स्य सङ्ग॒थे॥ सं ते॒ पया॑ꣳसि॒ समु॑ यन्तु॒ वाजाः॒ सं वृष्णि॑यान्यभिमाति॒षाहः॑। आ॒प्याय॑मानो अ॒मृता॑य सोम दिवि॒ श्रवा॑ꣳस्युत्त॒मानि॑ धिष्व॥ आप्या॑यस्व मदिन्तम॒ सोम॒ विश्वा॑भिरू॒तिभिः॑। भवा॑ नः स॒प्रथ॑स्तमः॥

तै॰सं॰ १.५.११

दध्यभिषेचनम् – द॒धि॒क्राव्णो॑ अकारिषं जि॒ष्णोरश्व॑स्य वा॒जिनः॑। सु॒र॒भि नो॒ मुखा॑ कर॒त्प्रण॒ आयू॑ꣳषि तारिषत्॥ आ द॑धि॒क्राः शव॑सा॒ पञ्च॑ कृ॒ष्टीः सूर्य॑ इव॒ ज्योति॑षा॒ऽपस्त॑तान। स॒ह॒स्र॒साः श॑त॒सा वा॒ज्यर्वा॑ पृ॒णक्तु॒ मध्वा॒ समि॒मा वचा॑ꣳसि॥

तै॰आ॰ १०.१२.२॥ तै॰सं॰ १.१.१०॥

घृताभिषेचनम् – घृ॒तं मि॑मिक्षिरे घृ॒तम॑स्य॒ योनि॑र्घृ॒ते श्रि॒तो घृ॒तमु॑वस्य॒ धाम॑। अ॒नु॒ष्व॒धमाव॑ह मा॒दय॑स्व॒ स्वाहा॑कृतं वृषभ वक्षि ह॒व्यम्॥ शु॒क्रम॑सि॒ ज्योति॑रसि॒ तेजो॑ऽसि दे॒वो वः॑ सवि॒तोत्पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒ वसो॒ः सूर्य॑स्य र॒श्मिभिः॑॥

तै०आ० १०

मध्वभिषेचनम् – मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः। माध्वी॒र्नः स॒न्त्वोष॑धीः। मधु॒ नक्त॑मु॒तोष॑सि॒ मधु॑म॒त्पार्थि॑व॒ꣳ रजः॑। मधु॒ द्यौर॑स्तु नः पि॒ता। मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माꣳ अस्तु॒ सूर्यः॑। माध्वी॒र्गावो॑ भवन्तु नः। मधु॒ मधु॒ मधु॑॥

तै०ब्रा० १.२.१॥ ऋ०सं० ९.८५.६॥ तै०सं० ५.२.६॥

शर्कराभिषेचनम् – ता नः॑ शि॒वाः शर्क॑राः सन्तु॒ सर्वाः᳚। अ॒ग्ने रेत॑श्च॒न्द्रꣳ हिर॑ण्यम्। अ॒द्भ्यः संभू॑तम॒मृतं॑ प्र॒जासु॑। तत्सं॒भर॑न्नुत्तर॒तो नि॒धाय॑। अ॒ति॒ प्रय॑च्छं॒ दुरि॑तिं तरेयम्॥ स्वा॒दुः प॑वस्व दि॒व्याय॒ जन्म॑ने स्वा॒दुरिन्द्रा॑य सु॒हवी॑तुनाम्ने। स्वा॒दुर्मि॒त्राय॒ वरु॑णाय वा॒यवे॒ बृह॒स्पत॑ये॒ मधु॑माँ॒ अदा᳚भ्यः॥ ताः शर्क॑रा अभव॒न् तच्छर्क॑राणाꣳ शर्क॒र॒त्वम्। वज्रो॒ वै शर्क॑राः प॒शु॒र॒ग्निर्यच्छर्क॑राभिर॒ग्निं प॑रिमि॒नोति॑॥

विस्तृताभिषेचनमन्त्राः

तै०सं० ४.२.६

फलोदकाभिषेचनम् – याः फ॒लिनी॒र्या अ॑फ॒ला अ॑पु॒ष्पा याश्च॑ पु॒ष्पिणीः᳚। बृह॒स्पति॑प्रसूता॒स्ता नो॑ मुञ्च॒न्त्वꣳह॑सः॥

तै०आ० १०

गन्धोदकाभिषेचनम् – ग॒न्ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी᳚म्। ई॒श्वरी॑ꣳ सर्व॑भूता॒ना॒ं तामि॒होप॑ह्वये॒ श्रियम्॥

ऋ०सं० ९.११.१

अक्षतोदकाभिषेचनम् – (ऋ०) उपा᳚स्मै गायता नर॒ः पव॑माना॒येन्द॑वे। अ॒भि दे॒वाँ इय॑क्षते॥

ऋ॰सं॰ १०.१४२.८॥ तै॰सं॰ ४.२.६॥ तै॰आ॰ १॥

पुष्पोदकाभिषेचनम् – आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः। ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे॥ पुष्पावतीः प्रसूवतीः फलिनीरफला उत। अश्वा इव सजेत्वरीर्वीरुधः पारयिष्णवः॥ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति। चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति॥

तै॰ब्रा॰ १.३.३॥ तै॰ब्रा॰ २.२.४॥

हिरण्योदकाभिषेचनम् – हिरण्यपात्रं मधोः पूर्णं ददाति । मधव्योसानीति। एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति॥ तत्सुवर्णꣳ हिरण्यमभवत्। तत्सुवर्णस्य हिरण्यस्य जन्म। य एवꣳ सुवर्णस्य हिरण्यस्य जन्म वेद। सुवर्ण आत्मना भवति॥

तै॰आ॰ १०

दूर्वोदकाभिषेचनम् – काण्डात् काण्डात् प्ररोहन्ति परुषः परुषः परि। एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥

वस्त्रादिसमर्पणमन्त्राः

तै॰ब्रा॰ २.८.६

वस्त्रसमर्पणम् – युवं वस्त्राणि पीवसा वसाथे । युवोरच्छिद्रा मन्तवो ह सर्गाः। अवातिरतमनृतानि विश्वा। ऋतेन मित्रावरुणा सचेथे॥

सौ॰

उपवीतसमर्पणम् – यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

तै॰ब्रा॰ १.३.३

आभरणसमर्पणम् – हिरण्यपात्रं मधौः पूर्णं ददाति । मध्व्योसानीति। एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति॥

गन्धम् – गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम्॥

ऋ॰सं॰ ८.६९.८

अक्षतान् – अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥

तै॰सं॰ १.१.४

धूपम् – धूरसि धूर्व धूर्वन्तं धूर्वतं यौऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व माह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा हिꣳसिषम्॥

तै॰आ॰ १०

दीपम् – उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम। पशूꣳश्च मह्यमावह जीवनं च दिशोदिश॥ मा नो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत। अबिभ्रदग्न आगहि श्रिया मा परि पातय॥

तै॰ब्रा॰ १.२.१॥ तै॰ब्रा॰ २.३.११॥

पञ्चमुखदीपम् – सप्रथ सभां मे गोपाय। ये च सभ्याः सभासदः। तानिन्द्रियावतः कुरु। सर्वमायुरुपासताम्॥ अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदाविदुः। ऋचः सामानि यजूꣳषि। सा हि श्रीरमृता सताम्॥ पञ्चहूतो ह वै नामैषः। तं

वा ए॒तं पञ्च॑हूत॒ꣳ सन्त᳚म्। पञ्च॑हो॒तेत्या च॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः॥

तै॰आ॰ १०

नैवेद्यम् – मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः। माध्वी᳚र्नः स॒न्त्वोष॑धीः। मधु॒ नक्त॑मु॒तोषसि॒ मधु॑म॒त्पार्थि॑व॒ꣳ रजः॑। मधु॒ द्यौर॑स्तु नः पि॒ता। मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माꣳ अस्तु॒ सूर्यः॑। माध्वी॒र्गावो॑ भवन्तु नः। मधु॒ मधु॒ मधु॑॥

तै॰ब्रा॰ १.४.२॥ तै॰ब्रा॰ ३.८.५॥

नीराजनम् – सोमो॒ वा ए॒तस्य॑ रा॒ज्यमाद॑त्ते। यो राजा॒ सन्रा॒ज्यो वा॒ सोमे॑न॒ यज॑ते। दे॒व॒सु॒वामे॒तानि॑ ह॒वीꣳषि॑ भवन्ति। ए॒ताव॑न्तो॒ वै दे॒वाना॑ꣳ स॒वाः। त ए॒वास्मै॑ स॒वान्प्रय॑च्छन्ति। त ए॑नं॒ पुनः॑ सुवन्ते रा॒ज्याय॑। दे॒व॒सू राजा॑ भवति॥ ब॒हु॒ग्वै ब॑ह्व॒श्वायै॑ बह्वजावि॒कायै᳚। ब॒हु॒ व्री॒हि॒य॒वायै॑ बहुमाषति॒लायै᳚। ब॒हु॒हि॒र॒ण्यायै॑ बहुह॒स्तिका॑यै। ब॒हु॒दा॒स॒पू॒रु॒षायै॑ रयि॒मत्यै॒ पुष्टि॑मत्यै। ब॒हु॒रा॒य॒स्पो॒षायै॒ राजा᳚ऽस्तु॥

तै॰आ॰ १०

मन्त्रपुष्पम् – वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्। संबा॒हुभ्यां॒ नम॑ति॒ संपत॑त्रै॒र्द्यावा॑पृथि॒वी ज॒नय॑न्दे॒व एकः॑॥ यो वेदादौ स्वरः॑ प्रो॒क्तो॒ वे॒दान्ते॑ च प्र॒तिष्ठि॑तः। तस्य॑ प्र॒कृति॑लीन॒स्य॒ यः॒ परः॑ स म॒हेश्व॑रः॥

तै॰आ॰ ४.२

उद्वासनानन्तरम् – उत्ति॑ष्ठ ब्रह्मणस्पते। देव॒यन्त॑स्त्वेमहे। उप॒प्रय॑न्तु म॒रुतः॑ स॒दान॑वः। इन्द्र॑ प्रा॒शूर्भ॑वा॒ सचा᳚॥

दीपाराधनमन्त्राः १

तै॰आ १.१४

योऽसौ॑ त॒पन्नु॒देति॑। स सर्वे॑षां भू॒ताना᳚ं प्रा॒णाना॒दायो॒देति॑। मा मे᳚
प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णाना॒दायोद॑गाः। अ॒सौ
यो᳚ऽस्त॒मेति॑। स सर्वे॑षां भू॒ताना᳚ं प्रा॒णाना॒दाया॒स्तमेति॑। मा मे᳚
प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णाना॒दायास्त॑ङ्गाः। अ॒सौ य
आ॒पूर्य॑ति। स सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरा॒पूर्य॑ति॥

मा मे᳚ प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरा॒पूरि॑ष्ठाः। अ॒सौ
यो॑ऽप॒क्षीय॑ति। स सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑क्षीयति। मा मे᳚ प्र॒जाया॒
मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑क्षेष्ठाः। अ॒मूनि॒ नक्ष॑त्राणि। सर्वे॑षां
भू॒ताना᳚ं प्रा॒णैरप॑ प्रसर्पन्ति॒ चोत्स॑र्पन्ति च। मा मे᳚ प्र॒जाया॒ मा
प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑ प्रसृपत॒ मोत्सृ॑पत॥

इ॒मे मासा᳚श्चार्धमा॒साश्च॑। सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑ प्रसर्पन्ति॒
चोत्स॑र्पन्ति च। मा मे᳚ प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑
प्रसृपत॒ मोत्सृ॑पत। इ॒म ऋ॒तव॑ः। सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑ प्रसर्पन्ति॒
चोत्स॑र्पन्ति च। मा मे᳚ प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑
प्रसृपत॒ मोत्सृ॑पत। अ॒यꣳ सं॑वत्स॒रः। सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑
प्रसर्पति॒ चोत्स॑र्पति च॥

मा मे᳚ प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑ प्रसृप॒ मोत्सृ॑प।
इ॒दमह॑ः। सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑ प्रसर्पति॒ चोत्स॑र्पति च। मा मे᳚
प्र॒जाया॒ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑ प्रसृप॒ मोत्सृ॑प। इ॒यꣳ
रात्रि॑ः। सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑ प्रसर्पति॒ चोत्स॑र्पति च। मा मे᳚

प्र॒जाया॑ मा प॑शू॒नाम्। मा मम॑ प्रा॒णैरप॑ प्रसृ॒प मोत्सृ॑प। ओं भूर्भुव॒ः स्व॑ः। एतद्वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम्॥

दीपाराधनमन्त्राः २

तै॰आ॰ ३.७.१

ब्रा॒ह्म॒ण एक॑होता। स य॒ज्ञः। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। य॒ज्ञश्च॑ मे भूयात्॥ अ॒ग्निर्द्विहो॑ता। स भ॒र्ता। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। भ॒र्ता च॑ मे भूयात्॥ पृ॒थि॒वी त्रिहो॑ता। स प्र॑ति॒ष्ठा।

स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। प्र॒ति॒ष्ठा च॑ मे भूयात्॥ अ॒न्तरि॑क्षं॒ चतु॑र्होता। स वि॒ष्ठाः। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। वि॒ष्ठाश्च॑ मे भूयात्। वा॒युः पञ्च॑होता। स प्रा॒णः। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। प्रा॒णश्च॑ मे भूयात्॥

च॒न्द्रमा॒ः षड्ढो॑ता। स ऋ॒तून् क॑ल्पयाति। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। ऋ॒तव॑श्च मे कल्पन्ताम्॥ अन्न॑ꣳ स॒प्तहो॑ता। स प्रा॒णस्य॑ प्रा॒णः। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। प्रा॒णस्य॑ च मे प्रा॒णो भू॑यात्॥ द्यौर॒ष्टहो॑ता। सो॑ऽनाधृ॒ष्यः।

स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। अ॒ना॒धृ॒ष्यश्च॑ मे भूयासम्॥ आ॒दि॒त्यो नव॑होता। स ते॑ज॒स्वी। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। ते॒ज॒स्वी च॑ भूयासम्॥ प्र॒जाप॑ति॒र्दश॑होता। स इ॒दꣳ सर्व॒॑म्। स मे॑ ददातु प्र॒जां प॒शून् पुष्टिं॒ यश॑ः। सर्वं॑ च मे भूयात्॥

दीपाराधनमन्त्राः ३

तै॰ब्रा॰ ३.८.१४

आज्ये॑न जुहोति। अ॒ग्नेर्वा ए॒तद्रू॒पम्। यदाज्य᳚म्। यदाज्ये॑न जु॒होति॑। अ॒ग्निमे॒व तत्प्री॑णाति॥ मधु॑ना जुहोति। म॒ह॒त्यै वा ए॒तद्दे॒वता॑यै रू॒पम्। यन्मधु॑। यन्मधु॑ना जु॒होति॑।

म॒ह॒तीमे॒व तद्दे॒वता᳚ं प्रीणाति॥ त॒ण्डु॒लैर्जु॑होति। वसू॑नां॒ वा ए॒तद्रू॒पम्। यत्त॑ण्डु॒लैर्जु॒होति॑। वसू॑ने॒व तत्प्री॑णाति॥ पृथु॑कैर्जुहोति। रु॒द्राणां॒ वा ए॒तद्रू॒पम्। यत्पृथु॑काः। यत्पृथु॑कैर्जु॒होति॑।

रु॒द्राने॒व तत्प्री॑णाति॥ ला॒जैर्जु॑होति। आ॒दि॒त्यानां॒ वा ए॒तद्रू॒पम्। यल्ला॒जाः। यल्ला॒जैर्जु॒होति॑। आ॒दि॒त्याने॒व तत्प्री॑णाति॥ क॒रम्बै᳚र्जुहोति। विश्वे॑षां॒ वा ए॒तद्दे॒वता॑नाꣳ रू॒पम्। यत्क॒रम्बा᳚ः। यत्क॒रम्बै᳚र्जु॒होति॑। विश्वा॑ने॒व तद्दे॒वान्प्री॑णाति॥ धा॒नाभि॑र्जुहोति। नक्ष॑त्राणां॒ वा ए॒तद्रू॒पम्। यद्धा॒नाः। यद्धा॒नाभि॑र्जु॒होति। नक्ष॑त्राण्ये॒व तत्प्री॑णाति॥ सक्तु॑भिर्जुहोति। प्र॒जाप॑ते॒र्वा ए॒तद्रू॒पम्। यत्सक्त॑वः। तत्सक्तु॑भिर्जु॒होति॑।

प्र॒जाप॑तिमे॒व तत्प्री॑णाति॥ म॒सूस्यै᳚र्जुहोति। सर्वा॑सां॒ वा ए॒तद्दे॒वता॑नाꣳ रू॒पम्। यन्म॒सूस्या॑नि। यन्म॒सूस्यै᳚र्जु॒होति॑। सर्वा॑ ए॒व तद्दे॒वता᳚ः प्रीणाति॥ प्रि॒य॒ङ्गु॒त॒ण्डु॒लैर्जु॑होति। प्रि॒याङ्गा॑ ह॒ वै नामै॒ते। ए॒तैर्वै दे॒वा अश्व॒स्याङ्गा॑नि॒ सम॑दधुः। यत्प्रि॑यङ्गुतण्डु॒लैर्जु॒होति॑। अश्व॑स्यै॒वाङ्गा॑नि॒ संद॑धाति॥ दशान्ना॑नि जुहोति। दशा᳚क्षरा वि॒राट्। वि॒राट् कृ॒त्स्नस्या॒न्नाद्य॒स्याव॑रुद्ध्यै॥

दीपाराधनमन्त्राः ४

तै॰ब्रा॰ ३.९.१९

ए॒ष वै वि॒भूर्नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॑ वि॒भु भ॑वति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै प्र॒भूर्नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॑ प्र॒भु भ॑वति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वा ऊर्ज॑स्वा॒न्नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्रोर्ज॑स्वद्भवति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै पय॑स्वा॒न्नाम॑ य॒ज्ञः।

सर्व॑ꣳ ह॒ वै तत्र॒ पय॑स्वद्भवति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै विधृ॑तो॒ नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॒ विधृ॑तं भवति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै व्यावृ॑त्तो॒ नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॒ व्यावृ॑त्तं भवति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै प्रति॑ष्ठितो॒ नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॒ प्रति॑ष्ठितं भ॑वति।

यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै ते॑ज॒स्वी नाम॑ य॒ज्ञः। सर्व॑ꣳ ह॒ वै तत्र॑ तेज॒स्वि भ॑वति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै ब्र॑ह्मवर्च॒सी नाम॑ य॒ज्ञः। आह॒ वै तत्र॑ ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यते। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै अ॑तिव्या॒धी नाम॑ य॒ज्ञः। आह॒ वै तत्र॑ राज॒न्यो॑ऽतिव्या॒धी जा॑यते। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै दी॒र्घो नाम॑ य॒ज्ञः। दी॒र्घायु॑षो ह॒ वै तत्र॑ मनु॒ष्या॑ भवन्ति। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ए॒ष वै क्लृ॒प्तो नाम॑ य॒ज्ञः। कल्प॑ते ह॒ वै तत्र॑ प्र॒जाभ्यो॑ योगक्षे॒मः। यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥

मन्त्रपुष्पम्

पुषार्पणे विनियोगः। योग्यता मृग्या

तै॰आ॰ १.२२

यो॑ऽपां पुष्पं॒ वेद॑। पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति। च॒न्द्रमा॒ वा अ॒पां पुष्प᳚म्। पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

अ॒ग्निर्वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो᳚ऽग्नेरा॒यत॑नं॒ वेद॑॥ आ॒यत॑नवान् भवति। आपो॒ वा अ॒ग्नेरा॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

वा॒युर्वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो वा॒योरा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥ आपो॒ वै वा॒योरा॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

अ॒सौ वै तप॑न्न॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो॑ऽमुष्य॒ तप॑त आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वा अ॒मुष्य॒ तप॑त आ॒यत॑नम्॥ आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम्। आ॒यत॑नवान् भवति॥ य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

नक्ष॑त्राणि॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो नक्ष॑त्राणामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै नक्ष॑त्राणामा॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑॥ यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यः प॒र्जन्य॑स्या॒ऽयत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै प॒र्जन्य॑स्या॒ऽयत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑॥ आ॒यत॑नवान् भवति।

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यः सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै सं॑वत्स॒रस्या॒ऽऽयत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो᳚ऽप्सु ना॒वं प्रति॑ष्ठितां॒ वेद॑। प्रत्ये॒व ति॑ष्ठति॥

ओषधिसूक्तम्

अङ्कुरार्पणे विनियोगः

तै०सं० ४.२.६

या जा॒ता ओष॑धयो दे॒वेभ्य॑स्त्रियु॒गं पु॒रा। मन्दा॑मि ब॒भ्रूणा॑म॒हꣳ श॒तं धामा॑नि स॒प्त च॑॥ श॒तं वो॑ अम्ब॒ धामा॑नि स॒हस्र॑मु॒त वो॒ रुहः॑। अथा॑ शतक्रत्वो यू॒यमि॒मं मे॑ अग॒दं कृ॑त॥ पुष्पा॑वतीः प्र॒सूव॑तीः फ॒लिनी॑रफ॒ला उ॒त। अश्वा॑ इव स॒जित्व॑रीर्वी॒रुधः॑ पारयि॒ष्णवः॑॥ ओष॑धी॒रिति॑ मातर॒स्तद्वो॑ देवी॒रुप॑ ब्रुवे। रपा॑ꣳसि विघ्न॒तीरि॑त॒ रप॑श्चा॒तय॑मानाः॥

अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥ यदहं वाजयन्निमा ओषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥ यदोषधयः संगच्छन्ते राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः॥ निष्कृतिर्नाम वो माताऽथा यूयꣳ स्थ संकृतीः। सराः पतत्रिणीः स्थन यदामयति निष्कृत॥

अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत। ताः सर्वा ओषधयः संविदाना इदं मे प्रावता वचः॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष॥ अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः। ओषधयः प्राचुच्यवुर्यत्किं च तनुवाꣳ रपः॥

यास्त आतस्थुरात्मानं या आविविशुः परुःपरुः। तास्ते यक्ष्मं वि बाधन्तामुग्रो मध्यमशीरिव॥ साकं यक्ष्म प्र पत श्येनेन किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया॥ अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम्। आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः॥

या ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु। तासां त्वमस्युत्तमा प्र णो जीवातवे सुव॥ अवपतन्तीरवदन्दिव ओषधयः परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः॥ याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः। इह संगत्य ताः सर्वा अस्मै सं दत्त भेषजम्॥ मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकꣳ

सर्वम्स्त्वनांतुरम्॥ ओषंधयः सं वंदन्ते सोमेंन सह राज्ञाँ। यस्मैं कुरोतिं ब्राह्मणस्त॰ रांजन् पारयामसि॥

बीजवपनमन्त्राः

अङ्कुरार्पणे विनियोगः

तै॰ब्रा॰ २.८.८

ब्रह्मं जज्ञानं प्रंथमं पुरस्तांत्। वि सींमतः सुरुचों वेन आंवः। स बुध्नियां उपमा अंस्य विष्ठाः। सतश्च योनिमसंतश्च विवंः। पिता विराजांमृषभो रंयीणाम्। अन्तरिक्षं विश्वरूंप आविंवेश। तमुर्कैरभ्यर्चन्ति वत्सम्। ब्रह्म सन्तं ब्रह्मंणा वर्धयंन्तः॥ ब्रह्माणं प्रजापतिं चतुर्मुखं हिरण्यगर्भं पूजयामि॥

तै॰आ॰ १०

यतं इन्द्र भयांमहे ततों नो अभंयं कृधि। मघंवञ्छुग्धि तव तन्नं ऊतये विद्विषो विमृधों जहि॥ स्वस्तिदा विशस्पतिंर्वृत्रहा विमृधों वशी। वृषेन्द्रंः पुर एंतु नः स्वस्तिदा अंभयङ्करः॥ इन्द्रं वज्रिणं शतक्रतुं शचीपतिं पूजयामि।

तै॰आ॰ ६.५.२

योऽस्य कौष्ठ्य जगंतः पार्थिवस्यैकं इद्वशी। यमं भंङ्ग्यश्रवो गांय यो राजांऽनपरोध्यंः॥ यमं गायं भङ्ग्यश्रवो यो राजांऽनपरोध्यंः। येनापो नद्यों धन्वांनि येन द्यौः पृंथिवी दृढा॥ यमं वैवस्वतं पितृपतिं धर्मराजं पूजयामि॥

तै॰सं॰ २.१.११॥ तै॰सं॰ २.१.१॥

इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युरा च॑के॥ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा᳚स्ते॒ यज॑मानो ह॒विर्भि॑ः। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳस॒ मा न॒ आयु॒ः प्रमो॑षीः॥ वरुणं प्रचेतसं सुरूपिणं अपांपतिं पूजयामि॥

तै॰ब्रा॰ २.८.३ (परि॰)॥ तै॰सं॰ ३.२.५॥

सोमो॑ धे॒नुꣳ सोमो॒ अर्व॑न्तमा॒शुम्। सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददातु। सा॒द॒न्यं॑ वि॒द॒त्यꣳ स॒भेयं᳚म्। पि॒तु॒श्रव॑णं॒ यो ददा॑शदस्मै॥ आ प्या॑यस्व॒ समे॑तु ते वि॒श्वत॑ः सोम॒ वृष्णि॑यम्। भवा॒ वाज॑स्य सङ्ग॒थे॥ सोमं इन्दुं निशाकरं ओषधीशं पूजयामि॥

कर्णवेधनमन्त्राः (परि॰)

तै॰सं॰ ४.६.२ ॥ मृग्यम् ॥ तै॰सं॰ ५.२.११॥ तै॰सं॰ १.२.८॥

(उदकशान्तौ द्रष्टव्यः (327) – प्राणो रक्षति इत्यादि)

स॒मु॒द्राय॑ व॒युना॑य॒ सिन्धू॑नां॒ पत॑ये॒ नम॑ः। न॒दीना॒ꣳ सर्वा॑सां पि॒त्रे जु॑हु॒ताविश्व॒कर्म॑णे॒ विश्वाऽहाऽम॑र्त्यꣳ ह॒विः॥ गा॒य॒त्रीं त्रि॒ष्टुब्जग॑त्यनु॒ष्टुप्प॒ङ्क्त्या॑ स॒ह। बृ॒ह॒त्यु॑ष्णिहा॑ क॒कुत्सू॒चीभि॑ः शिम्यन्तुत्वा॥ द्विपदा॒ या चतु॑ष्पदा त्रि॒पदा॒ या च॒ षट्प॑दा। सछ॑न्दा॒ या च॒ विच्छ॑न्दाः सू॒चीभि॑ः शिम्यन्तु त्वा॥ वरु॑णस्य॒ स्कम्भ॑नमहि। वरु॑णस्य स्कम्भ॒सर्ज॑नमसि॥

वेदाध्ययनव्रतमन्त्राः (परि॰)

प्रजा॑पते॒ नत्व दे॒तान्य॒न्यः। विश्वा॑ जा॒ताति॒ परि॒ता ब॑भूव। यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु। व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाम्॥

र॒यी॒णां पतिं यज॒तं बृहन्तम्ँ। अ॒स्मिन्भरे॒ नृतम॒ं वाजसातौ। प्र॒जापतिं प्रथम॒जामृतस्य। यजाम दे॒वमधि नो ब्रवीतु॥ प्रजापते॒ त्वन्निधि॒पाः पुरा॒णः। दे॒वानां पि॒त जनि॒ता प्र॒जानाम्ँ। पति॒र्विश्वस्य जगतः पर॒स्पाः। ह॒विर्नो देव वि॒ह्वे जुषस्व॥ तवे॒मे लो॒काः प्र॒दिशो॒ दिशश्च। प॒रा॒वतो नि॒वत उ॒द्वतश्च। प्रजापते विश्व॒सृज्जी॒वधन्य इ॒दन्नो देव। प्रतिहर्य ह॒व्यम्॥ प्र॒जापतिं प्रथ॒मं य॒ज्ञियानाम्। दे॒वाना॒मग्रे यज॒तं यजध्वम्। स नो ददातु॒ द्रविण॑ सु॒वीर्यम्ँ। या॒यस्पोष॒ं विष्यतु नाभिम॒स्मे॥ योरा॒य ईशे शतदा॒य उ॒क्थ्यः। यः पशू॒ना॑ रक्षि॒ता विष्ठितानाम्। प्र॒जापतिः प्रथम॒जा ऋ॒तस्य। स॒हस्रधामा जुषता॑ ह॒विर्नः॥

सोमो धे॒नु॑ सोमो॒ अर्वन्तमा॒शुम्। सोमो वी॒रङ्कर्म॒ण्यन्ददातु। सा॒द॒न्यं वि॒द॒थ्स्य॑ स॒भेयम्ँ। पि॒तु॒ः श्रवण॒ं यो ददाशदस्मै॥ अषाढं यु॒थ्सु पृतनासु॒ पप्रिम्ँ। सु॒व॒र् षाम॒प्स्वां वृ॒अजनस्य गो॒पाम्। भ॒रे॒षुजा॑ सुक्षि॒ति॑ सु॒श्रवसम्। जयन्त॒ं त्वामनु मदेम सोम॥ त्व॑ सोम॒ क्रतुभिः सु॒क्रतुर्भूः। त्वन्दक्षैः सु॒दक्षो वि॒श्ववेदाः। त्वं वृषा वृष॒त्वेभिम्रहि॒त्वा। द्यु॒म्नेभि द्दु॒म्न्यभवो नृ॒चक्षाः॥ या ते॒ धामानि ह॒विषा॒ यजन्ति। ता ते॒ विश्वा परि॒भूरस्तु य॒ज्ञम्। ग॒य॒स्फानः प्र॒तरणः सु॒वीरः। अवीरहा॒ प्रचरा सोम॒दुर्या॒न्॥ त्वमि॒मा ओषधीः सोम॒ विश्वाँः। त्वम॒पो अजनय॒स्त्वङ्गाः। त्वमाततन्थो॒र्वन्तरिक्षम्। त्वञ्ज्योतिषा॒ वितमो ववर्थ॒॥ या ते॒ धामानि दि॒वि या पृथि॒व्याम्। या पर्वते॒ष्वोषधीष्व॒प्सु। तेभिर्नो॒ विश्वैः सु॒मना॒ अहेडन्। राजन्ँथ्सोम॒ प्रति ह॒व्या गृभाय॥

अग्ने नय सुपथा राये अस्मान्। विश्वानि देव वयुनानि विद्वान्
युयोध्यस्मज्जुहुराणमेनः। भूयिष्ठान्ते नम उक्तिं विधेम॥ प्रवश्शुक्राय
भानवे भरध्वम्। हव्यं मतिश्चाग्नये सुपूतम्। यो दैव्यानि मानुषा
जनूꣳषि। अन्तर्विश्वानि विद्मना जिगाति॥ अच्छा गिरो मतयो
देवयन्तीः। अग्निं यन्ति द्रविणं भिक्षमाणाः। सुसन्दृशꣳ
सुप्रतीकꣳस्वञ्चम्। हव्यवाहमरतिं मानुषाणाम्॥ अग्ने
त्वमस्मद्युयोध्यमीवाः। अनग्नित्रा अभ्यमन्त कृष्टीः।
पुनरस्मभ्यꣳसुविताय देव। क्षां विश्वेभिरजरेभिर्यजत्र॥ अग्ने त्वं
पारया नव्यो अस्मान्। स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी
बहुला न उर्वी। भवा तोकाय तनयाय सं योः॥ प्रकारवो मनना
वच्यमानाः। देवद्रीचीन्नयथ देवयन्तः। दक्षिणावाड्वाजिनी प्राच्येति।
हविर्भरन्त्यग्नये घृताचि॥

आ नो विश्वे अस्क्रा गमन्तु देवाः। मित्रो अर्यमा वरुणः
सजोषाः। भुवन् यथा नो विश्वे वृधासः। करन्थ्सुषाहा विथुरं न
शवः॥ शन्नो देवा विश्वदेवा भवन्तु। शꣳ सरस्वती सह
धीभिरस्तु। शमभिषाचः शमु रातिषाचः। शन्नो दिव्याः पार्थिवाः
शन्नो अप्याः॥ ये सवितुः सत्यसवस्य विश्वे। मित्रस्य व्रते
वरुणस्य देवाः। ते सौभगं वीरवद्गोमदप्रः। दधातन
द्रविणञ्चित्रमस्मे॥ अग्ने याहि दूत्यं वारिषेण्यः। देवाꣳ अच्छा
ब्रह्मकृता गणेन। सरस्वतीं मरुतो अश्विनाऽपः। यक्षि
देवान्रत्नधेयाय विश्वान्॥ द्यौः पितः पृथिवि मातरध्रुक्। अग्ने
भ्रातर्वसवो मृडतानः। विश्व आदित्या अदिते सजोषाः।
अस्मभ्यꣳ शर्म बहुलं वियन्त॥ विश्वे देवाः श्रृणुतेमꣳ हवं मे। ये

अ॒न्तरि॑क्षे॒ य उप॒ द्यवि॒ष्ठ। ये अ॑ग्नि जि॒ह्वा उ॒त वा॒ यज॑त्राः।
आ॒सद्या॒स्मिन् ब॒र्हिषि॑ मादयध्वम्॥

पृ॒थि॒वी स॒मित्। ताम॒ग्निः समि॑न्धे। साऽग्निः॑ समि॑न्धे। ताम॒हः॑ समि॑न्धे। सामा॒ सिमं॑द्धा। आयु॑षा॒ तेज॑सा। वर्च॑सा श्रि॒या। यश॑सा ब्रह्मवर्च॒सेन॑। अ॒न्नाद्ये॑न॒ समि॑न्ता॒म्॥

अ॒न्तरि॑क्षः॑ स॒मित्। तां वा॒युः समि॑न्धे। सा वा॒युः॑ समि॑न्धे। ताम॒हः॑ समि॑न्धे। सा मा॒ समिं॑द्धा। आयु॑षा॒ तेज॑सा। वर्च॑सा श्रि॒या। यश॑सा ब्रह्मवर्च॒सेन॑। अ॒न्नद्ये॑न॒ समि॑न्ताम्॥

द्यौः स॒मित्। तामा॑दि॒त्यः समि॑न्धे। साऽऽदि॒त्यः॑ समि॑न्धे। ताम॒हः॑ समि॑न्धे। सा मा॒ समिं॑द्धा। आयु॑षा॒ तेज॑सा। वर्च॑सा श्रि॒या। यश॑सा ब्रह्मवर्च॒सेन॑। अ॒न्नद्ये॑न॒ समि॑न्ताम्॥

प्रा॒जाप॒त्या मे॑ स॒मिद॑सि सपत्न॒क्षय॑णी। भ्रा॒तृ॒व्य॒हामे॑ऽसि॥

होमादिमन्त्राः

अग्निप्रार्थना

अग्नेः प्रतिष्ठापने विनियोगः

ए०का० ५॥ तै०ब्रा० २.४.१॥ तै०आ० १०॥ तै०आ० १०॥ तै०ब्रा० ३.२.७॥ सौ० ॥ तै०सं० ५.७.८॥ ऋ०सं० १.८९.१॥

अ॒या॒श्चा॒ग्ने ऽस्यं॑नभिश॒स्तीश्चं॑ स॒त्यमित्त्वम॒या अ॑सि। अयं॑सा॒ मनं॑सा धृ॒तोऽयसा॑ ह॒व्यमूं॑हिषे॒ ऽया नो॑ धेहि भेष॒जं᳚म्॥ जुष्टो॒ दमूं॑ना॒ अतिं॑थिर्दुरो॒णे । इ॒मं नो॑ य॒ज्ञमुपं॑याहि वि॒द्वान्। विश्वा॑ अग्नेऽभि॒युजो॑ वि॒हत्यं॑ । श॒त्रू॒य॒तामाभं॑रा॒ भोजं॑नानि॥ च॒त्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒ द्वे शी॒र्षे स॒प्तहस्ता॑सो अ॒स्य। त्रिधा॑ ब॒द्धो वृं॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्या॒ꣳ आविं॑वेश॥ ए॒ष हि दे॒वः प्र॒दिशोऽनु॒ सर्वा॒ः पूर्वो॑ हि जा॒तः स उ॒ गर्भे॑ अ॒न्तः। स वि॒जायं॑मानः स जनि॒ष्यमां॑णः प्र॒त्यङ्मु॑खाँ᳚स्तिष्ठति वि॒श्वतो॑मुखः॥ धृष्टिं॑रसि॒ ब्रह्मं॑ य॒च्छ । अपा᳚ग्ने॒ऽग्निमा॒मादं॑ जहि॒ निष्क्र॒व्यादं॑ꣳ से॒धा ऽऽदे॑व॒यजं॑ वह॥ यु॒क्तो वं॑ह जा॒तवे॑दः पु॒रस्ता॒दग्ने॒ विद्धि॒ कर्म॑ क्रि॒यमा॑णं॒ यथे॒दम्। त्वं भि॒षग्भे॑ष॒जस्या॑सि॒ कर्ता॒ त्वया॒ गा अश्वा᳚न् पु॒रुषा᳚न् सनेमि॥ चतं॑स्र॒ आशा॒ः प्रचं॑रन्त्व॒ग्नयं॑ः। इ॒मं नो॑ य॒ज्ञं नं॑यतु प्रजा॒नन्। घृ॒तं पिन्वं॑न्न॒जरं॑ꣳ सु॒वीर᳚म्। ब्रह्मं॑ स॒मिद्भं॑व॒त्याहुं॑तीनाम्॥ (ऋ०) आ नो॑ भ॒द्राः क्रतं॑वो यन्तु वि॒श्वतो ऽदं॑ब्धासो॒ अपं॑रीतास उ॒द्भिदं॑ः। दे॒वा नो॒ यथा॒ सद॒मिद्वृ॒धे ऽस॒न्नप्रा᳚युवो रक्षि॒तारो᳚ दि॒वे दिं॑वे॥

जयादयः

होमस्योत्तराङ्गने विनियोगः

तै॰सं॰ ३.४.४

चि॒त्तं च॒ चित्ति॒श्चाकू॑तं॒ चाकू॑तिश्च॒ विज्ञा॑तं च वि॒ज्ञान॑ं च॒ मन॑श्च॒
शक्व॑रीश्च॒ दर्श॑श्च पू॒र्णमा॑सश्च बृ॒हच्च॑ रथन्त॒रं च॑
प्र॒जाप॑ति॒र्जया॒निन्द्रा॑य॒ वृष्णे॒ प्राय॑च्छदु॒ग्रः पृ॑त॒नाज्ये॑षु तस्मै॒ विश॒ः
सम॑नमन्त॒ सर्वा॒ः स उ॒ग्रः स हि॒ हव्यो॑ ब॒भूव॑॥

चि॒त्तं च॒ स्वाहा॑। चित्ति॑श्च॒ स्वाहा॑। आकू॑तं च॒ स्वाहा॑। आकू॑तिश्च॒
स्वाहा॑। विज्ञा॑तं च॒ स्वाहा॑। वि॒ज्ञान॑ं च॒ स्वाहा॑। मन॑श्च॒ स्वाहा॑।
शक्व॑रीश्च॒ स्वाहा॑। दर्श॑श्च॒ स्वाहा॑। पू॒र्णमा॑सश्च॒ स्वाहा॑। बृ॒हच्च॒ स्वाहा॑।
र॒थ॒न्त॒रं च॒ स्वाहा॑। प्र॒जाप॑ति॒र्जया॒निन्द्रा॑य॒ वृष्णे॒ प्राय॑च्छदु॒ग्रः
पृ॑त॒नाज्ये॑षु तस्मै॒ विश॒ः सम॑नमन्त॒ सर्वा॒ः स उ॒ग्रः स हि॒ हव्यो॑
ब॒भू॒व स्वाहा॑॥

अभ्यातानाः (मूलम्)

तै॰सं॰ ३.४.५

अ॒ग्निर्भू॒ताना॒मधि॑पति॒ः स मा॑ऽव॒त्विन्द्रो॑ ज्ये॒ष्ठाना॑ं य॒मः पृ॑थि॒व्या
वा॒यु॒र॒न्तरि॑क्षस्य॒ सूर्यो॑ दि॒वश्च॒न्द्रमा॒ नक्ष॑त्राणा॒ं बृ॒ह॒स्पति॒र्ब्रह्म॑णो
मि॒त्रः स॒त्याना॒ं वरु॑णो॒ऽपा॒ᳪं सम॑ु॒द्रः स्रो॒त्याना॒मन्न॒ᳪं
साम्रा॑ज्याना॒मधि॑पति॒ तन्मा॑ऽवतु॒ सोम॒ ओष॑धीना॒ᳪं सवि॒ता
प्र॑स॒वाना॒ᳪं रु॒द्रः प॑शू॒नां त्वष्टा॑ रू॒पाणा॒ं विष्णु॒ः पर्व॑ताना॒ं म॒रुतो॑
ग॒णाना॒मधि॑पतय॒स्ते मा॑ऽवन्तु॒ पित॑रः पितामहाः परेऽवरे॒

ततां॒स्ततामहा इ॒ह मां॑ऽवत। अ॒स्मिन् ब्रह्मं॑न्न॒स्मिन्
क्ष॒त्रेँ॑ऽस्यामा॒शिष्य॒स्यां पु॑रो॒धायां॑म॒स्मिन् कर्म॑न्न॒स्यां दे॒वहूँ॑त्याम्॥

अभ्यातानाः (सानुषङ्गाः)

होमस्योत्तराङ्गने विनियोगः

अ॒ग्निर्भू॒ताना॒मधिं॑पति॒ः स मां॑ऽवत्व॒स्मिन् ब्रह्मं॑न्न॒स्मिन्
क्ष॒त्रेँ॑ऽस्यामा॒शिष्य॒स्यां पु॑रो॒धायां॑म॒स्मिन् कर्म॑न्न॒स्यां दे॒वहूँ॑त्या॒ꣳ
स्वाहाँ॑॥

इन्द्रोँ॑ ज्ये॒ष्ठाना॒मधिं॑पति॒ः ०००। य॒मः पृं॑थि॒व्या अधिं॑पति॒ः ०००।
वा॒यु॒र॒न्तरिं॑क्षस्याधिं॑पति॒ः ०००। सूर्यो॑ दि॒वोधिं॑पति॒ः ०००। च॒न्द्रमा॒
नक्षं॑त्राणा॒मधिं॑पति॒ः ०००। बृह॒स्पति॒र्ब्रह्म॒णोऽधिं॑पति॒ः ०००। मि॒त्रः
स॒त्याना॒मधिं॑पति॒ः ०००। वरुं॑णो॒ऽपामधिं॑पति॒ः ०००। स॒मु॒द्रः
स्रो॒त्याना॒धिं॑पति॒ः ०००। अन्न॒ꣳ साम्राँ॑ज्याना॒मधिं॑पति॒ः ०००। सोम॒
ओषं॑धीना॒मधिं॑पति॒ः ०००। स॒वि॒ता प्रं॑स॒वाना॒मधिं॑पति॒ः ०००। रु॒द्रः
पं॑शू॒नामधिं॑पति॒ः ०००। त्वष्टा॑ रू॒पाणा॒मधिं॑पति॒ः ०००। विष्णु॒ः
पर्व॑ताना॒मधिं॑पति॒ः ०००। म॒रुतो॑ ग॒णाना॒मधिं॑पति॒ः ०००।

पितं॑रः पितामहाः परेऽवरे॒ ततां॒स्ततामहा इ॒ह मां॑ऽवत। अ॒स्मिन्
ब्रह्मं॑न्न॒स्मिन् क्ष॒त्रेँ॑ऽस्यामा॒शिष्य॒स्यां पु॑रो॒धायां॑म॒स्मिन् कर्म॑न्न॒स्यां
दे॒वहूँ॑त्या॒ꣳ स्वाहाँ॑॥

राष्ट्रभृतः (आपस्तम्बीयः)

उदकशान्तौ बोधायनीयानुषङ्गपाठः 312 तमे पुटे द्रष्टव्यः

ऋ॒ता॒षाडृ॒तधा॑मा॒ऽग्निर्ग॑न्ध॒र्वस्तस्यौष॑धयोऽप्स॒रस॒ ऊर्जो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥ स॒ꣳहि॒तो वि॒श्वसा॑मा॒ सूर्यो॑ गन्ध॒र्वस्तस्य॒ मरी॑चयोऽप्स॒रस॑ आ॒युवो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥ सु॒षु॒म्नः सूर्य॑रश्मिश्च॒न्द्रमा॑ गन्ध॒र्वस्तस्य॒ नक्ष॑त्राण्यप्स॒रसो॑ बे॒कुर॑यो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥ भु॒ज्युः सु॑प॒र्णो य॒ज्ञो ग॑न्ध॒र्वस्तस्य॒ दक्षि॑णा अप्स॒रस॑स्त॒वा नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥ प्र॒जाप॑तिर्वि॒श्वक॑र्मा॒ मनो॑ गन्ध॒र्वस्तस्य॑र्क्सा॒मान्य॑प्स॒रसो॒ वह्न॑यो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥ इ॒षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वस्तस्यापौँ॑ऽप्स॒रसो॑ मु॒दा नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑॥

भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑। स नो॑ रा॒स्वाज्या॑निꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ संवत्स॒रीणा॑ꣳ स्व॒स्तिम्॥

प॒र॒मे॒ष्ठ्यधि॑पतिर्मृ॒त्युर्ग॑न्ध॒र्वस्तस्य॒ विश्व॑मप्स॒रसो॒ भुवो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पाँ॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहाँ॑। सु॒क्षि॒तिः सु॒भू॑तिर्भ॒द्रकृ॒त्सुव॑र्वान्प॒र्जन्यो॑ गन्ध॒र्वस्तस्य॑ वि॒द्युतौँ॑ऽप्स॒रसो॒ रुचो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं

पा॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहा॑। दू॒रे हे॑तिरमृड॒यो मृ॒त्युर्ग॑न्ध॒र्वस्तस्य॑ प्र॒जा अ॑प्स॒रसो॑ भी॒रुवो॒ नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहा॑। चारुः॑ कृपणका॒शी कामो॑ गन्ध॒र्वस्तस्या॒धयो॑ऽप्स॒रसः॑ शो॒चय॑न्ती॒र्नाम॒ स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्यः॒ स्वाहा॑।

स नो॑ भुवनस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑। उ॒रुब्रह्म॑णे॒ऽस्मै क्ष॒त्राय॒ महि॒ शर्म॑ यच्छ॒ स्वाहा॑॥

यदस्य कर्मण इत्यादय

सौ॰

होमस्योत्तराङ्गने विनियोगः

यद॑स्य॒ कर्म॒णोऽत्यरी॑रिच॒ं यद्वा॒ न्यू॑नमि॒हाक॑रम्। अ॒ग्निष्ट॒त् स्वि॑ष्ट॒कृद् विद्वान् सर्वँ॑ स्वि॑ष्ट॒ꣳ सुहु॑तं करोतु॥

तै॰ब्रा॰ ३.७.११

अना॑ज्ञात॒ं यदाज्ञा॑तम्। य॒ज्ञस्य॑ क्रि॒यते॒ मिथु॑। अग्ने॒ तद॑स्य कल्पय। त्वꣳ हि वेत्थ॑ यथात॒थम्॥ पुरु॑षसंमितो य॒ज्ञः। य॒ज्ञः पुरु॑षसंमितः। अग्ने॒ तद॑स्य कल्पय। त्वꣳ हि वेत्थ॑ यथात॒थम्॥ यत्पा॑क॒त्रा मन॑सा दी॒नद॑क्षा॒ न। य॒ज्ञस्य॑ म॒न्वते॒ मर्ता॑सः। अ॒ग्निष्टद्धोता॑ क्रतु॒विद् वि॑जा॒नन्। यजि॑ष्ठो दे॒वाꣳ ऋ॑तु॒शो य॑जाति॥

वसोर्धारामन्त्राः

होमस्योत्तराङ्गने वसोर्धारासमर्पणे विनियोगः

तै॰ब्रा॰ ३.११.९.९

अग्नाविष्णू इति वसोर्धारायाः॥ अग्नाविष्णू सजोषसेमा वर्धन्तु वाङ्गिरः। ००० [6]

तै॰सं॰ ५.४.८

वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिन् लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाव रुन्धे यं कामयेत प्राणानस्यान्नाद्यं वि॥

पूर्णाहुतिमन्त्राः

होमस्योत्तराङ्गने पूर्णाहुतौ विनियोगः

तै॰ब्रा॰ ३.९.१०॥ मृग्यम्॥

पूर्णाहुतिमुत्तमां जुहोति। सर्वं वै पूर्णाहुतिः। सर्वमेवाप्नोति। अथो इयं वै पूर्णाहुतिः। अस्यामेव प्रति तिष्ठति॥ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवाव शिष्यते॥

---

[6] चमकं 197-तमे पुटे द्रष्टव्यम्

अग्निसूक्तम्

अग्नेरुपस्थापने विनियोगः

तै॰सं॰ १.१.१४॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान्। यु॒यो॒ध्य॑स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम॥ आ दे॒वाना॒मपि॒ पन्था॑मगन्म॒ यच्छ॒क्नवा॑म॒ तदनु॒ प्रवो॑ढुम्। अ॒ग्निर्वि॒द्वान् स य॑जा॒त्सेदु॒ होता॒ सो अ॑ध्व॒रान् स ऋ॒तून् क॑ल्पयाति॥ यद्वाहि॑ष्ठं तद॒ग्नये॑ बृहद॑र्च विभावसो। महि॑षीव॒ त्वद्र॒यिस्त्वद्वाजा॒ उदी॑रते॥ अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान् स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा᳚। पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शं योः॥ त्वम॑ग्ने व्र॒तपा अ॑सि दे॒व आ मर्त्ये॒ष्वा। त्वं य॒ज्ञेष्वीड्य॑ः॥ यद्वो॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॑ वि॒दुषा᳚ देवा॒ अवि॑दुष्टरासः। अ॒ग्निष्टद् विश्व॒मा पृ॑णाति वि॒द्वान् येभि॑र्दे॒वाꣳ ऋ॒तुभि॑ः क॒ल्पया॑ति॥

ब्रह्मवर्चसानुवाकः

तै॰सं॰ ७.५.१८

आ ब्रह्म॑न् ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मास्मिन् रा॒ष्ट्रे रा॑ज॒न्य॑ इष॒व्य॑ः शूरो॑ महार॒थो जा॑यतां॒ दोग्ध्री॑ धे॒नुर्वोढा॑ऽन॒ड्वाना॒शुः सप्ति॒ः पुर॑न्धि॒र्योषा॑ जि॒ष्णू र॑थे॒ष्ठाः स॒भेयो॒ युवाऽस्य यज॑मानस्य वी॒रो जा॑यतां निका॒मेनि॑कामे नः प॒र्जन्यो॑ वर्षतु फ॒लिन्यो॑ न॒ ओष॑धयः पच्यन्तां योगक्षे॒मो न॑ः कल्पताम्॥

कूष्माण्डमन्त्राः

कूष्माण्डहोमे गणहोमे च विनियोगः

तै॰आ॰ २.३

यद्देवा देवहेळनं देवासश्चकृमा वयम्। आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित॥ देवा जीवनकाम्या यद्वाचाऽनृतमूदिम। तस्मान्न इह मुंञ्चत विश्वे देवाः सजोषसः॥ ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति। कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम॥ इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुञ्चन्त्वेनसो यदन्यकृतमारिम॥ सजातशꣳसादुत जामिशꣳसाज्ज्यायसश्शꣳसादुत वा कनीयसः। अनाधृष्टं देवकृतं यदेनस्तस्मात् त्वमस्मान् जातवेदो मुमुग्धि॥

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳ शिश्नैर्यदनृतं चकृमा वयम्। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंञ्चतु चकृम यानि दुष्कृता॥ येन त्रितो अर्णवान्निर्बभूव येन सूर्यं तमसो निर्मुमोच। येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आँक्षि॥ यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि। एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि॥

(यन्मयि माता यदापिपेष यदन्तरिक्षं यदाशसाऽतिक्रामामि त्रिते देवा दिवि जाता यदापः)

तै॰ब्रा॰ ३.७.१२

यन्मयि माता गर्भे सति। एनश्चकार यत्पिता। अग्निर्मा तस्मादेनसः॥ यदापिपेष मातरं पितरम्। पुत्रः प्रमुदितो धयन्।

अहिं॑ꣳसितौ पि॒तरौ॒ मया॒ तत्। तद॑ग्ने अनृ॒णो भ॑वामि॥ यद॒न्तरि॑क्षं पृ॒थि॒वीमु॒त द्याम्। यन्मा॒तरं॑ पि॒तरं॑ वा जिहिꣳसि॒म। अ॒ग्निर्मा॒ तस्मा॒देन॑सः॥ यदा॒शसा॑ नि॒शसा॒ यत्प॑रा॒शसा॑ँ॥ यदेन॑श्चकृ॒मा नूत॑नं॒ यत्पु॑रा॒णम्। अ॒ग्निर्मा॒ तस्मा॒देन॑सः॥ अति॑क्रामामि दु॒रि॒तं यदेनः॑। जहा॑मि रि॒प्रं प॑र॒मे स॒धस्थे॑ँ। यत्र॒ यन्ति॑ सु॒कृतो॒ नापि॑ दु॒ष्कृतः॑। तमारो॑हामि सु॒कृता॒ं नु लो॒कम्॥ त्रि॒ते दे॒वा अ॑मृजतै॒तदेनः॑। त्रि॒त ए॒तन्म॑नु॒ष्ये॑षु मा मृजे। ततो॑ मा॒ यदि॒ किञ्चि॑दान॒शे। अ॒ग्निर्मा॒ तस्मा॒देन॑सः। गार्ह॑पत्य॒ः प्रमु॑ञ्चतु। दु॒रि॒ता यानि॑ चकृ॒म। क॒रोतु॒ मामं॑ने॒नस॑ँम्॥ दि॒वि जा॒ता अ॒प्सु जा॒ताः। या जा॒ता ओष॑धीभ्यः। अथो॒ या अ॑ग्नि॒जा आपः॑। ता नः॑ शुन्धतु॒ शुन्ध॑नीः॥ यदापो॒ नक्तं॑ दु॒रि॒तं चरा॑म। यद्वा॒ दिवा॒ नूत॑नं॒ यत्पु॑रा॒णम्। हिर॑ण्यवर्णा॒स्तत॒ उत्पु॑नीत नः॥

(इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने॒ त्वम॑ग्ने अ॒यासि॑॥)

इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युराच॑के॥ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा॑ँस्ते॒ यज॑मानो ह॒विर्भिः॑। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳ स॒ मा न॒ आयुः॒ प्रमो॑षीः॥ त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान् दे॒वस्य॒ हेडोऽव॑यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषा॑ꣳसि॒ प्रमु॑मुग्ध्य॒स्मत्॥ स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ। अव॑यक्ष्व नो॒ वरु॑ण॒ꣳ ररा॑णो वी॒हि मृ॑डी॒कꣳ सु॒हवो॑ न एधि॥ त्वम॑ग्ने

अयाऽस्यया सन्मनसा हितः। अया सन् हव्यमूहिषेऽया नो धेहि भेषजम्॥

यददीव्यन्नृणमहं बभूवादित्सन्वा संजगर जनेभ्यः। अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम्॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः। उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि॥ उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत्। नेन्न ऋणानृणव इत्समानो यमस्य लोके अधि रज्जुराय॥

(अव ते हेळ उदुत्तममिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने।)

अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनांꣳसि शिश्रथः कृतानि॥ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः॥ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांꣳसि प्रमुमुग्ध्यस्मत्॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि॥

संकुंसुको विकुंसुको निर्ऋथो यश्चं निस्वनः।
तेऽअस्मद्यक्ष्ममनांगसो दूराद्दूरमंचीचतम्॥ निर्यक्ष्ममचीचते कृत्यां निर्ऋतिं च। तेन यो ऽअस्मत्समृच्छातैतमंस्मै प्रसुंवामसि॥ दुःशङ्सानुशङ्साभ्यां घणेनांनुघणेनं च। तेनान्यो ऽअस्मत्समृच्छातैतमंस्मै प्रसुंवामसि॥ सं वर्चसा पयंसा सं तनूभिरगंन्महि मनंसा सङ्शिवेनं। त्वष्टां नो अत्र विदंधातु रायोऽनुं मार्ष्टु तन्वोअ यद्विलिंष्टम्॥

आयुंष्टे विश्वतों दधदयमग्निर्वरेंण्यः। पुनंस्ते प्राण आयांति परा यक्ष्मंङ् सुवामि ते॥ आयुर्दा अंग्ने हविषों जुषाणो घृतप्रंतीको घृतयोंनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेवं पुत्रमभि रंक्षतादिमम्॥ इममंग्न आयुंषे वर्चसे कृधि तिग्ममोजों वरुण सङ्शिंशाधि। मातेवांस्मा अदिते शर्म यच्छ विश्वें देवा जरंदष्टिर्यथाऽसंत्॥ अग्न आयूंङ्षि पवस आसुवोर्जमिषं च नः। आरे बांधस्व दुच्छुनांम्॥ अग्ने पवंस्व स्वपां अस्मे वर्चः सुवीर्यम्। दधंद्रयिं मयि पोषंम्॥

अग्निर्ऋषिः पवंमानः पाञ्चंजन्यः पुरोहिंतः। तमींमहे महागयम्॥ अग्नें जातान्प्रणुंदानः सपत्नान्प्रत्यजांतान् जातवेदो नुदस्व। अस्मे दींदिहि सुमना अहेंळञ्छर्मन्ते स्याम त्रिवरूंथ उद्भौ॥ सहंसा जातान्प्रणुंदानः सपत्नान्प्रत्यजांतान् जातवेदो नुदस्व। अधिं नो ब्रूहि सुमनस्यमांनो वयङ् स्यांम प्रणुंदानः सपत्नांन्॥ अग्ने यो नोऽभितो जनो वृको वारो जिघांङ्सति। ताङ्स्त्वं वृंत्रहन् जहि

वस्वस्मभ्यमा भर॥ अग्ने यो नोऽभिदासति समानो यश्च निष्ट्यः।
तं वयꣳ समिधं कृत्वा तुभ्यमग्नेऽपि दध्मसि॥

यो नः शपादशपतो यश्च नः शपतः शपात्। उषाश्च तस्मै निम्रुक् च सर्वं पापꣳ समूहताम्॥ यो नः सपत्नो यो रणो मर्तोऽभिदासति देवाः। इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किञ्चन॥ यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम्। सर्वाꣳस्तानग्ने संदह याꣳश्चाहं द्वेष्मि ये च माम्॥ यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः। निन्दाद्यो अस्मान्दिप्साच्च सर्वाꣳस्तान्मष्मषाकुरु॥ सꣳशितं मे ब्रह्म सꣳशितं वीर्याꣳअम्बलम्। सꣳशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः॥ उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाꣳम् अहम्॥ पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म आगात् पुनः प्राणः पुनराकूतं म आगात् पुनश्चित्तं पुनराधीतं म आगात्। वैश्वानरो मेऽदब्धस्तनूपा अवबाधतां दुरितानि विश्वा॥

कूष्माण्डमन्त्राः (बोधायनोक्ताः)

सिꣳहे व्याघ्र उत या पृदाकौ। °
या राजन्ये दुन्दुभावायताया॑म्। °
या हस्तिनि द्वीपिनि या हिरण्ये। °
रथे अक्षेषु वृषभस्य वाजे। °

तै॰सं॰ ४.२.१

अग्ने॑ऽभ्यावर्तिन्न॒भि न॒ आ व॑र्त॒स्वायु॑षा॒ वर्च॑सा स॒न्या मे॒धया॑ प्र॒जया॒ धने॑न॥ अग्ने॑ अङ्गिरः श॒तं ते॑ सन्त्वा॒वृतः॑ स॒हस्रं॑ त उपा॒वृतः॑। तासा॒ं पोष॑स्य॒ पोषे॑ण॒ पुन॑र्नो न॒ष्टमा कृ॑धि॒ पुन॑र्नो र॒यिमाकृ॑धि॥ पुन॑रू॒र्जा नि व॑र्तस्व॒ पुन॑रग्न इ॒षायु॑षा। पुन॑र्नः पाहि वि॒श्वतः॑॥ सह॑ र॒य्या नि व॑र्त॒स्वाग्ने॒ पिन्व॑स्व॒ धार॑या। वि॒श्वप्स्नि॑या वि॒श्वत॒स्परि॑॥

कूष्माण्डोपस्थानमन्त्राः

तै॰आ॰ २.६

वै॒श्वा॒न॒राय॒ प्रति॑वेदयामो॒ यदी॑नृ॒णꣳ सं॑ग॒रो दे॒वता॑सु। स ए॒तान् पाशा॑न् प्र॒मुच॒न् प्रवे॑द॒ स नो॑ मुञ्चातु दु॒रि॒तादव॒द्यात्॥ वै॒श्वा॒न॒रः पव॑यान्नः प॒वित्रै॒र्यत्सं॑ग॒रम॒भिधावा॑म्या॒शाम्। अना॑जान॒न् मन॑सा॒ याच॑मानो॒ यदत्रैनो॒ अव॒ तत्सु॑वामि॥ अ॒मी ये सु॒भगे॑ दि॒वि वि॒चृतौ॒ नाम॒ तार॑के। प्रेहामृत॑स्य यच्छतामे॒तद्बद्धक॒मोच॑नम्॥ विजि॑हीर्ष्व लो॒कान्कृ॑धि ब॒न्धान्मु॑ञ्चासि॒ बद्धक॑म्। योने॑रिव॒ प्रच्यु॑तो॒ गर्भः॒ सर्वा᳚न्प॒थो अ॑नुष्व॥ स प्र॑जा॒नन्प्रति॑गृभ्णीत वि॒द्वान्प्र॒जाप॑तिः प्रथम॒जा ऋ॒तस्य॑। अ॒स्माभि॑र्द॒त्तं ज॒रसः॑ प॒रस्ता॒दच्छि॑न्नं॒ तन्तु॑मनु॒ संच॑रेम॥

त॒तं तन्तु॒मन्वेके॒ अनु॒संच॑रन्ति॒ येषा᳚ं द॒त्तं पित्र्य॒माय॑नवत्।
अ॒ब॒न्ध्वेके॒ दद॑तः प्र॒यच्छा॒द्दातु॑ं चेच्छ॒क्नवा॒ꣳस स्व॒र्ग ए॑षाम्॥
आर॑भेथा॒मनु॒सꣳर॑भेथाꣳ समा॒नं पन्था॑मवथो घृ॒तेन॑। यद्वा᳚ं पू॒र्तं
परि॑विष्टं॒ यद॒ग्नौ तस्मै॒ गोत्रा॑ये॒ह जाया॑पती॒ सꣳर॑भेथाम्॥
यद॒न्तरि॑क्षं पृथि॒वीमु॒त द्यां यन्मा॒तर॑ं पि॒तर॑ं वा जिहिꣳसि॒म।

अग्निर्मा तस्मादेनसो गार्हपत्य उन्नो नेषद्दुरिता यानि चकृम॥
भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः। द्यौर्नः
पिता पितृयाच्छं भवासि जामि मित्वा मा विवित्सि लोकात्॥
यत्र सुहार्दः सुकृतो मदन्ते विहाय रोगं तन्वा१ँ स्वायाम्।
अश्लोणाङ्गैरह्रुताः स्वर्गे तत्र पश्येम पितरं च पुत्रम्॥
यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वाऽकरिष्यन्। यद्देवानां
चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं
कृणोतु॥ यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत
गामजामविम्। यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु॥ यन्मया मनसा वाचा
कृतमेनः कदाचन। सर्वस्मात् तस्मान्मेळितो मोग्धि त्वꣳ हि
वेत्थ यथातथम्॥

वैश्वानरो न ऊत्या

गणहोमे विनियोगः

तै॰सं॰ १.५.११

वैश्वानरो न ऊत्याऽऽप्र यातु परावतः। अग्निरुक्थेन वाहसा॥
ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे॥
वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः। उभा
पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा॥ पृष्टो दिवि पृष्टो
अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा
पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम्॥

जा॒तो यद॑ग्ने॒ भुव॑ना॒ व्यख्य॑ः प॒शुं न गो॒पा इर्य॒ः परि॑ज्मा। वैश्वा॑नर॒ ब्रह्म॑णे विन्द गा॒तुं यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ त्वम॑ग्ने शो॒चिषा॒ शोशु॑चान॒ आ रोद॑सी अपृणा॒ जाय॑मानः। त्वं दे॒वाँ अ॒भिश॑स्तेरमुञ्चो॒ वैश्वा॑नर जातवेदो महि॒त्वा॥ अ॒स्माक॑मग्ने म॒घव॑त्सु धा॒रयाना॑मि क्ष॒त्रम॒जरं॑ सु॒वीर्य॑म्। व॒यं ज॑येम श॒तिनं॑ सह॒स्रिणं॒ वैश्वा॑नर॒ वाज॑मग्ने॒ तवो॒तिभि॑ः॥ वै॒श्वा॒न॒रस्य॑ सुम॒तौ स्या॑म॒ राजा॒ हिकं॒ भुव॑नानामभि॒श्रीः। इ॒तो जा॒तो विश्व॑मि॒दं वि च॑ष्टे वैश्वान॒रो य॑तते॒ सूर्ये॑ण॥

समुद्रज्येष्ठा (ऋ०)

उग्ररथशान्तिकर्मणि विनियोगः

ऋ०सं० ७.४९

स॒मु॒द्रज्ये॑ष्ठाः सलि॒लस्य॒ मध्या॑त्पुना॒ना य॒न्त्यनि॑विशमानाः। इन्द्रो॒ या व॒ज्री वृ॑ष॒भो र॒राद॒ ता आपो॑ दे॒वीरि॒ह माम॑वन्तु॥ या आपो॑ दि॒व्या उ॒त वा॒ स्रव॑न्ति खि॒नित्रि॑मा उ॒त वा॒ याः स्व॑य॒ंजाः॥ स॒मु॒द्रार्था॒ याः शुच॑यः पाव॒कास्ता आपो॑ दे॒वीरि॒ह माम॑वन्तु॥ यासा॒ं राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्य॒न् जना॑नाम्। म॒धु॒श्चुत॒ः शुच॑यो॒ याः पा॑व॒कास्ता आपो॑ दे॒वीरि॒ह माम॑वन्तु॥ यासु॒ राजा॒ वरु॑णो॒ यासु॒ सोमो॒ विश्वे॑दे॒वा यासूर्ज॒ं मद॑न्ति। वै॒श्वा॒न॒रो यास्व॒ग्निः प्रवि॑ष्ट॒स्ता आपो॑ दे॒वीरि॒ह माम॑वन्तु॥

अक्षीभ्यासूक्तम् (ऋ॰)

भीमरथशान्तिकर्मणि विनियोगः

ऋ॰सं॰ १०.१६३

अ॒क्षीभ्यां॑ ते॒ नासि॑काभ्यां॒ कर्णा॑भ्यां॒ छुबु॑का॒दधि॑। यक्ष्मं॑ शीर्ष॒ण्यं॑ म॒स्तिष्का॑ज्जि॒ह्वाया॒ वि वृ॑हामि ते॥ ग्रीवा॒भ्य॑स्त उ॒ष्णिहा॑भ्य॒ः कीक॑साभ्यो अनू॒क्या॑त्। यक्ष्मं॑ दोष॒ण्य१॒ंमंसा॑भ्यां बा॒हुभ्या॒ं वि वृ॑हामि ते॥ आ॒न्त्रेभ्य॑स्ते॒ गुदा॑भ्यो वनि॒ष्ठोर्हृद॑या॒दधि॑। यक्ष्मं॒ मत॑स्नाभ्यां य॒क्नः प्लाशिभ्यो॒ वि वृ॑हामि ते॥ ऊरुभ्यां॑ ते अष्ठी॒वद्भ्यां॒ पार्ष्णि॑भ्यां॒ प्रप॑दाभ्याम्। यक्ष्मं॒ श्रोणि॑भ्यां॒ भास॑दा॒द् भंस॑सो॒ वि वृ॑हामि ते॥ मेह॑नाद् वन॒ंकर॑णा॒ल्लोम॑भ्यस्ते न॒खेभ्य॑ः। यक्ष्मं॒ सर्व॑स्मादा॒त्मन॒स्तमि॒दं वि वृ॑हामि ते॥ अङ्गा॑दङ्गाल्लोम्नो॑लोम्नो जा॒तं पर्व॑णिपर्वणि। यक्ष्मं॒ सर्व॑स्मा॒दात्मन॒स्तमि॒दं वि वृ॑हामि ते॥

रात्रीसूक्तम् (ऋ॰)

देवीमाहात्म्यपारायणे विनियोगः

ऋ॰सं॰ १०.१२७

रात्री॒ व्य॑ख्यदाय॒ती पु॑रु॒त्रा दे॒व्य१॒क्षभि॑ः। विश्वा॒ अधि॒ श्रियो॑ऽधित॥ ओर्व॑प्रा॒ अम॑र्त्या नि॒वतो॑ दे॒व्यु१॒द्वत॑ः। ज्योति॑षा बाधते॒ तम॑ः॥ निरु॒ स्वसा॑रमस्कृतो॒षसं॑ दे॒व्या॑यती। अपेदु॑ हासते॒ तम॑ः॥ सा नो॑ अ॒द्य यस्या॑ व॒यं नि ते॒ याम॒न्नवि॑क्ष्महि। वृ॒क्षे न व॑स॒तिं वय॑ः॥ नि ग्रामा॑सो अविक्षत॒ नि प॒द्वन्तो॒ नि प॒क्षिण॑ः। नि श्ये॒नास॑श्चिद॒र्थिन॑ः॥ या॒वया॑ वृ॒क्यं॑१॒ वृकं॑ य॒वय॑ स्ते॒नमू॑र्म्ये। अथा॑ नः सु॒तरा॑ भव॥ उप॑ मा॒ पेपि॑श॒त् तम॑ः कृ॒ष्णं व्य॑क्तमस्थित। उष॑

ऋ॒णेव॑ यातय॥ उप॑ ते॒ गा इ॒वाक॑रं वृणी॒ष्व दु॑हितर्दिवः। रात्रि॒ स्तोम॒ं न जि॒ग्युषँ॥

या सुगन्धा

शताभिषेके यजमानाभिषेचने विनियोगः

सौत्रमन्त्राः

या सु॒गन्धा॑ रसा॒ वर्णा॒ बलं॑ च॒ निहि॑ते उ॒भे। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ या ऊर्ज॑म॒भिषि॑ञ्चन्ति दे॒वेन॒ प्रेषि॑ता म॒हीम्। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ यासाँ नि॒ष्क्रम॑णे सर्वं॒ तदि॒दं जा॑यते॒ जग॑त्। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ यासा॑मि॒मे त्रयो॑ वे॒दास्तेज॑सा॒ यश॒सा वृ॑ताः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥

याः प्राचीः

शताभिषेके यजमानाभिषेचने विनियोगः

सौत्रमन्त्राः

याः प्राची॑ रे॒वती॒राप॒ः स्रव॑न्ति शु॒क्राः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ या द॑क्षि॒णा रे॒वती॒राप॒ः स्रव॑न्ति शु॒क्राः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ याः प्र॒तीची॑ रे॒वती॒राप॒ः स्रव॑न्ति शु॒क्राः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ या उदी॑ची रे॒वती॒राप॒ः स्रव॑न्ति शु॒क्राः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥ या ऊ॒र्ध्वा रे॒वती॒राप॒ः स्रव॑न्ति शु॒क्राः। ता म॒ आप॑ः शि॒वाः सं॑न्तु॒ दु॒ष्कृ॑तं॒ प्रव॑हन्तु मे॥

दिगुपस्थानमन्त्राः

तै॰आ॰ २.२०

नम॒ः प्राच्यै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमो दक्षि॑णायै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॒ः प्रती॑च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॒ उदी॑च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॑ ऊर्ध्वायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमोऽध॑रायै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमो॑ऽवान्त॒रायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॑ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमो गङ्गायमुनयोर्मध्ये ये॑ वस॒न्ति॒ ते मे प्रसन्नात्मानश्चिरं जीवितं व॑र्धय॒न्ति॒ नमो गङ्गायमुनयोर्मुनि॑भ्यश्च॒ नमो॒ नमो गङ्गायमुनयोर्मुनि॑भ्यश्च॒ नम॑ः॥

शान्तिपञ्चकम्

शं नो॑ मि॒त्रः शं वरु॑णः। शं नो॑ भवत्वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पति॑ः। शं नो॒ विष्णु॑रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि। ऋ॒तं व॑दिष्यामि। स॒त्यं व॑दिष्यामि। तन्मामवतु। तद्वक्तार॑मवतु। अव॑तु॒ माम्। अव॑तु व॒क्तार॑म्। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

शं नो॑ मि॒त्रः शं वरु॑णः। शं नो॑ भवत्वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पति॑ः। शं नो॒ विष्णु॑रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि। त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम्।

ऋ॒तमं॑वादिषम्। स॒त्यमं॑वादिषम्। तन्मामा॑वीत्। तद्व॒क्तार॑मावीत्। आवी॒न्माम्। आवी॑द्व॒क्तार॑म्। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

स॒ह ना॑ववतु। स॒ह नौ॑ भुनक्तु। स॒ह वी॒र्यं॑ करवावहै। ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

तै॰आ॰ ४.१

नमो॒ वा॒चे या चो॑दि॒ता या चानु॑दि॒ता तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नम॒ ऋषि॑भ्यो मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒ मा मामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑य॒ः परा॑दु॒र्माऽहमृषी॑न् मन्त्र॒कृतो॑ मन्त्र॒पती॒न् परा॑दां वैश्व॒दे॒वीं वाच॑मुद्यास॒ꣳ शि॒वामद॑स्ता॒ं जुष्टा॑ं दे॒वेभ्य॒ः शर्म॑ मे॒ द्यौः शर्म॑ पृथि॒वी शर्म॒ विश्व॑मि॒दं जग॑त्।

शर्म॑ च॒न्द्रश्च॒ सूर्य॑श्च॒ शर्म॑ ब्रह्मप्रजा॒पती। भू॒तं व॑दिष्ये॒ भुव॑नं वदिष्ये॒ तेजो॑ वदिष्ये॒ यशो॑ वदिष्ये॒ तपो॑ वदिष्ये॒ ब्रह्म॑ वदिष्ये स॒त्यं व॑दिष्ये॒ तस्मा॑ अ॒हमि॒दमु॑प॒स्तर॑ण॒मुप॑स्तृण उप॒स्तर॑णं मे प्र॒जायै॑ पशू॒नां भू॑यादुप॒स्तर॑णम॒हं प्र॒जायै॑ पशू॒नां भू॑यास॒ं प्राणा॑पानौ मृत्योर्मा॑ पात॒ं प्राणा॑पानौ॒ मा मा॑ हासिष्ट॒ं मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यास॒ꣳ शुश्रू॒षेण्या॑ं मनु॒ष्ये॑भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः।

तच्छं॒ योरावृ॑णीमहे। गा॒तुं य॒ज्ञाय॑। गा॒तुं य॒ज्ञप॑तये। दैवी॑ स्व॒स्तिर॑स्तु नः। स्व॒स्तिर्मानु॑षेभ्यः। ऊ॒र्ध्वं जि॑गातु भेष॒जम्। शं नो॑ अस्तु द्वि॒पदे॑। शं चतु॑ष्पदे। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

घोषशान्तिः

तै॰स॰ ४.४२

शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः। अहानि शं भवन्तु नः शꣳ रात्रिः प्रतिधीयताम्॥ शमुषा नो व्युच्छतु शमादित्य उदेतु नः। शिवा नः शन्तमा भव सुमृडीका सरस्वति। मा ते व्योम संदृशि॥ इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मा वास्तोश्छित्स्म ह्यवास्तुः स भूयाद्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः॥ प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छित्स्म ह्यप्रतिष्ठः स भूयाद् योऽस्मान् द्वेष्टि यं च वयं द्विष्मः॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः। त्वꣳ हि विश्वभेषजो देवानां दूत ईयसे॥ द्वाविमौ वातौ वात आसिन्धोरापरावतः।

दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः॥ यददो वात ते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे ततो नो धेहि भेषजम्। ततो नो मह आवह वात आवातु भेषजम्॥ शंभूर्मयोभूर्नो हृदे प्र ण आयूꣳषि तारिषत्। इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुः साश्वः। सह यन्मे अस्ति तेन॥ भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः पपद्ये वायुं प्रपद्येऽनार्तां देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य ॐ प्रपद्ये॥

अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्ति मां तया स्वस्त्या स्वस्ति मानसानि॥ प्राणापानौ मृत्योर्मा

पातं प्राणापानौ मा मां हासिष्टं मयिं मेधां मयिं प्रजां मय्यग्निस्तेजों दधातु मयिं मेधां मयिं प्रजां मयीन्द्रं इन्द्रियं दंधातु मयिं मेधां मयिं प्रजां मयि सूर्यो भ्राजों दधातु॥

द्युभिरक्तुभिः परिपातमस्मानरिंष्टेभिरश्विना सौभंगेभिः। तन्नों मित्रो वरुणो मामहन्तामदिंतिः सिन्धुंः पृथिवी उत द्यौः॥ कया नश्चित्र आभुंवदूती सदावृंधः सखा। कया शचिंष्ठया वृता॥ कस्त्वा सत्यो मदानां मꣳहिंष्ठो मत्सदन्धंसः। दृढाचिंदारुजे वसुं॥ अभी षु णः सखीनामविता जंरितॄणाम्। शतं भंवास्यूतिभिंः॥ वयंः सुपर्णा उपंसेदुरिन्द्रं प्रियमेंधा ऋषंयो नाधंमानाः। अपं ध्वान्तमूंर्णुहि पूर्धि चक्षुंर्मुमुग्ध्यंस्मान्निधयेंव बद्धान्॥

शं नों देवीरभिंष्टय आपों भवन्तु पीतयें। शं योरभिस्रंवन्तु नः॥ ईशांना वार्याणां क्षयंन्तीश्चर्षणीनाम्। अपो यांचामि भेषजम्॥ सुमित्रा न आप ओषंधयः सन्तु दुर्मित्रास्तस्मैं भूयासुर्योऽस्मान् द्वेष्टि यं चं वयं द्विष्मः॥

आपो हि ष्ठा मंयोभुवस्ता नं ऊर्जे दंधातन। महे रणांय चक्षंसे॥ यो वंः शिवतंमो रसस्तस्यं भाजयतेह नंः। उशतीरिंव मातरंः॥ तस्मा अरं गमाम वो यस्य क्षयांय जिन्वंथ। आपों जनयंथा च नः॥

पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुचꣳ शमयतु। अन्तरिंक्षꣳ शान्तं तद्वायुना शान्तं तन्में शान्तꣳ शुचꣳ शमयतु। द्यौः शान्ता साऽदित्येनं शन्ता सा में शान्ता शुचꣳ शमयतु॥

पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः
शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिर्वायुः शान्तिरादित्यः
शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि शान्तिरापः शान्तिरोषधयः
शान्तिर्वनस्पतयः शान्तिर्गौः शान्तिरजा शान्तिरश्वः शान्तिः
पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः शान्तिरेव शान्तिः
शान्तिर्मे अस्तु शान्तिः॥ तयाऽहꣳ शान्त्या सर्वशान्त्या मह्यं
द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः॥

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि
मोत्तिष्ठन्तमनूत्तिष्ठन्तु मा माꣳ श्रीश्च ह्रीश्च धृतिश्च तपो मेधा
प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः॥ उदायुषा
स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु॥

तच्चक्षुर्देवहितं पुरस्ताँच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम
शरदः शतं नन्दाम शरदः शतं मोदाम शरदः शतं भवाम शरदः
शतꣳ शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीताः स्याम
शरदः शतं ज्योक् च सूर्यं दृशे॥ य उदगान्महतोऽर्णवाँद्
विभ्राजमानः सरिरस्य मध्यात् स मा वृषभो लोहिताक्षः सूर्यो
विपश्चिन्मनसा पुनातु॥

ब्रह्मणः श्रोतन्यसि ब्रह्मण आणी स्थो ब्रह्मण आवपनमसि
धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं
दाधार पृथिवीꣳ सदेवां यदहं वेद तदहं धारयाणि मा मद्वेदोऽधि
विस्रंसत्॥ मेधामनीषे माऽविशताꣳ समीची भूतस्य
भव्यस्यावरुद्ध्यै सर्वमायुरयाणि सर्वमायुरयाणि॥ आभिर्गीर्भिर्यदतो

न ऊनमाप्यायय हरिवो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत्॥ ॐ शान्तिः शान्तिः शान्तिः॥

साम्राज्यसूक्तम्

तै॰ब्रा॰ २.६.५

मित्रोऽसि वरुणोऽसि। समहं विश्वैर्देवैः। क्षत्रस्य नाभिरसि। क्षत्रस्य योनिरसि। स्योना माऽसीद। सुषदा माऽसीद। मा त्वा हिꣳसीत्। मा मा हिꣳसीत्। निषसाद धृतव्रतो वरुणः। पस्त्यास्वा॥

साम्राज्याय सुक्रतुः। देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। अश्विनोर्भैषज्येन। तेजसे ब्रह्मवर्चसायाभिषिञ्चामि। देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। सरस्वत्यै भैषज्येन॥

वीर्यायान्नाद्यायाभिषिञ्चामि। देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बहुभ्याम्। पूष्णो हस्ताभ्याम्। इन्द्रस्येन्द्रियेण। श्रियै यशसे बलायाभिषिञ्चामि।

तै॰सं॰ १.७.१०

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनम्। सोमꣳ राजानं वरुणमग्निमन्वारभामहे। आदित्यान् विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो

यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राँज्येनाभिषिंञ्चामीन्द्रंस्य बृहस्पतेँस्त्वा साम्राँज्येनाभिषिंञ्चामि॥

तै॰सं॰ ५.५.९

देवास्त्वेन्द्रंज्येष्ठा वरुंणराजानोऽधस्ताँच्चोपरिंष्टाच्च पान्तु न वा एतेनं पूतो न मेध्यो न प्रोक्षिंतो यदेंनमतंः प्राचीनं प्रोक्षति यत् संचिंतमाज्येंन प्रोक्षति तेनं पूतस्तेन मेध्यस्तेन प्रोक्षिंतः॥

तै॰ब्रा॰ २.७.१५.५

वसंवस्त्वा पुरस्तांदभिषिंञ्चन्तु गायत्रेण छन्दंसा। रुद्रास्त्वां दक्षिणतोंऽभिषिंञ्चन्तु त्रैष्टुंभेन छन्दंसा। आदित्यास्त्वां पश्चादभिषिंञ्चन्तु जागंतेन छन्दंसा। विश्वेँ त्वा देवा उंत्तरतोंऽभिषिंञ्चन्त्वानुंष्टुभेन छन्दंसा। बृहस्पतिंस्त्वोपरिंष्टादभिषिंञ्चतु पाङ्क्तेंन छन्दंसा॥

तै॰ब्रा॰ २.८.६

इमा रुद्रायं स्थिरधंन्वने गिरंः। क्षिप्रेषंवे देवायं स्वधाम्नेँ। अषांढाय सहंमानाय मीढुषेँ। तिग्मायुंधाय भरता शृणोतंन। त्वा दंत्तेभी रुद्र शन्तंमेभिः। शतꣳ हि मां अशीय भेषजेभिंः। व्यंस्मद्द्वेषों वितरं व्यꣳहंः। व्यमींवाꣳश्चातयस्वा विषूंचीः॥

[7] अर्हंन् बिभर्षि सायंकानि धन्वं। अर्हंन्निष्कं यंजतं विश्वरूंपम्। अर्हंन्निदं दंयसे विश्वमभ्भुंवम्। न वा ओजीयो रुद्र त्वदंस्ति॥ मानंस्तोके तनंये मा न आयुंषि मा नो गोषु मा नो अश्वेंषु

---

[7] अर्हंन् बिभर्षि मा नंस्तोके।

रीरिषः। वीरान्मा नो रुद्र भामितो ऽवंधीर्हविष्मंन्तो नमंसा विधेम ते॥

आ ते पितर्मरुतां॒ सुम्नमेंतु। मा नः सूर्यस्य संदृशो युयोथाः। अभि नो वीरो अर्वति क्षमेत। प्रजायेमहि रुद्र प्रजाभिः। एवा बंभ्रो वृषभ चेकितान। यथां देव न हृंणीषे न हं॒सि। हावनश्रूर्नो रुद्रेह बोधि। बृहद्वंदेम विदथें सुवीराः।

[8] परिं णो रुद्रस्यं हेतिः स्तुहि श्रुतम्। मीढुंष्टमार्हन् बिभर्षि। त्वमंग्ने रुद्र आ वो राजांनम्॥

रुद्रप्रार्थनमन्त्राः

तमुंष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयंति भेषजस्यं। यक्ष्वाँमहे सौँमनसायं रुद्रं नमोंभिर्देवमसुंरं दुवस्य॥ अयं मे हस्तो भगंवानयं मे भगंवत्तरः। अयं मे विश्वभेंषजोऽयं॒ शिवाभिंमर्शनः॥ ये ते सहस्रंमयुतं पाशा मृत्यो मर्त्याय हन्तंवे। तान् यज्ञस्यं मायया सर्वानवं यजामहे। मृत्यवे स्वाहां मृत्यवे स्वाहाँ॥ ॐ नमो भगवते रुद्राय विष्णवे मृत्युंर्मे पाहि। प्राणानां ग्रन्थिरसि रुद्रो मां विशान्तकः। तेनान्नेनाँप्यायस्व। सदाशिवोम्॥

काम्यजप्यमन्त्राः

ऋ॰सं॰ १.५२.१

त्यं सु मेषं मंहया स्वर्विदं शतं यस्यं सुभ्वंः साकमीरंते। अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवंसे सुवृक्तिभिंः॥ स पर्वतो

[8] रुद्रसूक्तमन्त्रप्रतीका इमे। 16-पुटे मन्त्राः द्रष्टव्याः।

न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे। इन्द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अन्धसा॥ स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः। इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः॥ आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ः स्वा अभिष्टयः। तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः॥

ऋ०सं० १०.३४.५

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः। न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव॥

ऋ०सं० ५.४२.११

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य। यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥

ऋ०सं० १०.६०.१२

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः॥

मृग्यम्

वैस्वानरो अजीजनदग्निर्नो नव्यसीं मनिम्। क्ष्मया वृधान ओजसा॥

ऋ०सं० ८.३०.४

ये देवास इह स्थन विश्वे वैश्वानरा उत। अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत॥

ऋ॰सं॰ १०.७१.२

स॒क्तुमि॑व॒ तित॑उना पु॒नन्तो॒ यत्र॒ धीरा॒ मन॑सा॒ वाच॒मक्र॑त। अत्रा॒ सखा॑यः स॒ख्यानि॑ जानते भ॒द्रैषां॑ ल॒क्ष्मीर्निहि॒ताधि॑ वा॒चि॥

आशीर्मन्त्राः

आशीर्वचने विनियोगः

तै॰सं॰ ५.४.१२॥ तै॰ब्रा॰ ३.१.२॥ तै॰सं॰ २.४.१४॥ तै॰सं॰ २.३.११॥

पर्या॑प्त्या॒ अन॑न्तरायाय॒ सर्व॑स्तोमोऽतिरा॒त्र उ॑त्त॒ममह॑र्भवति॒ सर्व॒स्याप्त्यै॒ सर्व॑स्य॒ जित्यै॒ सर्व॑मे॒व तेना॑ऽऽप्नोति॒ सर्वं॑ जयति॥

ऋ॒ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑। मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु। अ॒नू॒रा॒धा॒न् ह॒विषा॑ व॒र्धय॑न्तः। श॒तं जी॑वेम श॒र॒दः सवी॑राः॥

नवो॑नवो भवति॒ जाय॑मा॒नोऽह्नां॑ के॒तुरु॒षसा॑मे॒त्यग्रं॑। भा॒गं दे॒वेभ्यो॒ वि द॑धात्या॒यन् प्रच॒न्द्रमा॑स्तिरति दी॒र्घमायुः॑॥ श॒तमा॑नं भवति श॒तायुः॒ पुरु॑षः श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति॥

ए॰ १.९॥ ए॰ १.४॥

सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒मा२ँ सम॑मेत॒ पश्य॑त। सौभा॑ग्यम॒स्यै द॒त्वा याथास्त॒ं विपरे॑तन॥ इ॒मां त्वमि॑न्द्रमीढ्वः सुपु॒त्रा२ँ सु॒भगां॑ कुरु। दशा॑स्यां पु॒त्राना धे॑हि॒ पति॑मेकाद॒शं कृ॑धि॥

ऋ॰सं॰ ५.२५.५॥ ऋ॰खि॰॥

अ॒ग्निस्तु॒विश्र॑वस्तमं तु॒वि ब्र॒ह्माणमु॒त्त॒मम्। अ॒तूर्तं॑ श्राव॒यत्प॑तिं पु॒त्रं द॑दाति दा॒शुषे॑॥ य॒शस्क॑रं॒ बल॑वन्तं प्र॒भुत्वं॑ तमे॒व

राँजाऽधि॒पतिँर्बभूव। सङ्कीँर्णं नागाश्व॒पतिँर्नराणां सुम॒ङ्गल्यं᳚ सततं दी॒र्घमायु॑ः॥

ऐकमत्यसूक्तम् (ऋ०)

ऋ०सं० १०.१९१

संस॒मिद्यु॑वसे वृष॒न्नग्ने॒ विश्वाँन्य॒र्य आ। इ॒ळस्प॒दे समि॑ध्यसे॒ स नो॒ वसू॒न्या भ॑र॥ सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मना᳚ँसि जानताम्। दे॒वा भा॒गं यथा॒ पूर्वे᳚ संजाना॒ना उ॒पास॑ते॥ स॒मा॒नो मन्त्र॒ः समि॑तिः समा॒नी स॑मा॒नं मन॑ः स॒ह चि॒त्तमैँषाम्। स॒मा॒नं मन्त्र॑म॒भि मँन्त्रये वः समा॒नेन॑ वो ह॒विषाँ जुहोमि॥ स॒मा॒नी व॒ आकूँतिः समा॒ना हृद॑यानि वः। स॒मा॒नम॑स्तु वो॒ मनो॒ यथाँ व॒ः सुस॒हास॑ति॥

महानारायणम्

ॐ स॒ह ना॑ववतु। स॒ह नौ॑ भुनक्तु। स॒ह वी॒र्यं॑ करवावहै। ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॓। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

अम्भस्य पारे

अम्भ॑स्य पा॒रे भुव॑नस्य॒ मध्ये॒ नाक॑स्य पृ॒ष्ठे म॑ह॒तो मही॑यान्। शु॒क्रेण॒ ज्योती॑ꣳषि समनु॒ प्रवि॑ष्टः प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः॥ यस्मि॑न्नि॒दꣳ सं च॒ वि चैति॒ सर्वं॒ यस्मि॑न् दे॒वा अधि॒ विश्वे॑ नि॒षे॒दुः। तदे॒व भू॒तं तदु॒ भव्य॑मा इ॒दं तद॒क्षरे॑ पर॒मे व्यो॑मन्॥ येना॑ऽऽवृ॒तं खं च॒ दिवं॑ म॒हीं च॒ येना॑दि॒त्यस्तप॑ति॒ तेज॑सा॒ भ्राज॑सा च। यम॒न्तः स॑मु॒द्रे क॒वयो॒ वय॑न्ति॒ यद॒क्षरे॑ पर॒मे प्र॒जाः॥ यत॑ः प्रसू॒ता ज॒गत॑ः प्रसू॒ती॒ तोये॑न जी॒वान् व्यच॑सर्ज॒ भूम्या॓म्। यदोष॑धीभिः पु॒रुषा॓न् प॒शूꣳश्च॒ विवे॑श भू॒तानि॑ चराच॒राणि॑॥ अत॑ः प॒रं नान्य॒दणी॑यसꣳ हि॒ परा॓त्प॒रं यन्मह॑तो म॒हान्त॓म्। यदे॑कम॒व्यक्त॒मनं॑न्तरूपं॒ विश्वं॑ पु॒राणं॒ तम॑स॒ः पर॑स्तात्॥

तदे॒वर्तं॑ तदु॑ स॒त्यमा॑हु॒स्तदे॒व ब्रह्म॑ पर॒मं क॑वी॒नाम्। इ॒ष्टा॒पू॒र्तं ब॑हु॒धा जा॒तं जाय॑मानं वि॒श्वं बि॑भर्ति॒ भुव॑नस्य॒ नाभि॑ः॥ तदे॒वाग्निस्तद्वा॒युस्तत्सूर्य॒स्तदु॑ च॒न्द्रमा॓ः। तदे॒व शु॒क्रम॒मृत॒ं तद्ब्रह्म॒ तदाप॒ः स प्र॒जाप॑तिः॥ सर्वे॑ निमे॒षा ज॒ज्ञिरे॑ वि॒द्युत॒ः पुरु॑षा॒दधि॑। क॒ला मु॑हू॒र्ताः काष्ठा॓श्चाहोरा॒त्राश्च॑ सर्व॒शः॥ अ॒र्॒ध॒मा॒सा मासा॑ ऋ॒तव॑ः संवत्स॒रश्च॑ कल्पन्ताम्। स आप॑ः प्रदु॒घे उ॒भे इ॒मे अ॒न्तरि॑क्ष॒मथो॒ सुव॑ः॥ नैन॑मू॒र्ध्वं न ति॒र्यञ्चं॒ न मध्ये॒ परि॑जग्रभत्। न

तस्ये॑शे॒ कश्च॒न तस्य॑ नाम म॒हद्यश॑ः॥ न सं॒दृशे॑ तिष्ठति॒ रूप॑मस्य॒
न चक्षु॑षा पश्यति॒ कश्च॒नैन॑म्। हृ॒दा म॑नी॒षा मन॑सा॒भिक्लृ॑प्तो॒ य ए॑नं
वि॒दुरमृ॑ता॒स्ते भ॑वन्ति॥

अ॒द्भ्यः संभू॑तो हिरण्यग॒र्भ इत्य॒ष्टौ॥

ए॒ष हि दे॒वः प्र॒दिशोऽनु॒ सर्वा॒ः पूर्वो॑ हि जा॒तः स उ॒ गर्भे॑ अ॒न्तः।
स वि॒जाय॑मानः स जनि॒ष्यमा॑णः प्र॒त्यङ्मु॒खा᳚स्तिष्ठति
वि॒श्वतो॑मुखः॥ वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त उ॒त
वि॒श्वत॑स्पात्। सं बा॒हुभ्यां॒ नम॑ति॒ सं पत॑त्रै॒र्द्यावा॑पृथि॒वी ज॒नय॑न्दे॒व
एक॑ः॥

वे॒नस्तत्पश्य॒न् विश्वा॒ भुव॑नानि वि॒द्वान् यत्र॒ विश्वं॒ भव॒त्येक॑नीळम्।
यस्मि॑न्नि॒दꣳ सं च॒ वि चैक॒ꣳ स ओत॒ः प्रोत॑श्च वि॒भुः प्र॒जासु॑॥ प्र
तद्वो॑चे अ॒मृत॒ं नु वि॒द्वान् ग॑न्ध॒र्वो नाम॒ निहि॑तं॒ गुहा॑सु। त्रीणि॑ प॒दा
निहि॑ता॒ गुहा॑सु॒ यस्तद्वेद॑ सवि॒तुः पि॒ता स॑त्॥ स नो॒ बन्धु॑र्जनि॒ता
स वि॑धा॒ता धामा॑नि॒ वेद॒ भुव॑नानि॒ विश्वा᳚। यत्र॑ दे॒वा
अ॒मृत॑मानशा॒नास्तृ॒तीये॒ धामा᳚न्यभ्यैर॑यन्त॥ परि॒ द्यावा॑पृथि॒वी य॑न्ति
स॒द्यः परि॑ लो॒कान् परि॒ दिश॒ः परि॒ सुव॑ः। ऋ॒तस्य॒ तन्तुं᳚ वित॒तं
वि॒चृत्य॒ तद॑पश्य॒त् तद॑भवत् प्र॒जासु॑॥ प॒रीत्य॑ लो॒कान् प॒रीत्य॑
भू॒तानि॑ प॒रीत्य॒ सर्वा᳚ः प्र॒दिशो॒ दिश॑श्च। प्र॒जाप॑तिः प्रथम॒जा
ऋ॒तस्या॒ऽत्मना॒त्मान॑म॒भिसंब॑भूव॥ सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒
काम्य᳚म्। सनिं॑ मे॒धाम॑यासिषम्॥ उद्दी᳚प्यस्व जातवेदोऽप॒घ्नन्निरृ॑तिं॒
मम॑। प॒शूꣳश्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश॥ मा नो॑

हि॑सीञ्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त्। अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑पातय॥

सर्वदेवगायत्र्यः

पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महादे॒वस्य॑ धीमहि। तन्नो॑ रुद्रः प्रचो॒दया॑त्॥ तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि। तन्नो॑ रुद्रः प्रचो॒दया॑त्॥ तत्पुरु॑षाय वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि। तन्नो॑ दन्तिः प्रचो॒दया॑त्॥ तत्पुरु॑षाय वि॒द्महे॑ चक्रतु॒ण्डाय॑ धीमहि। तन्नो॑ नन्दिः प्रचो॒दया॑त्॥ तत्पुरु॑षाय वि॒द्महे॑ महासे॒नाय॑ धीमहि। तन्नः॑ षण्मुखः प्रचो॒दया॑त्॥ तत्पुरु॑षाय वि॒द्महे॑ सुवर्णप॒क्षाय॑ धीमहि। तन्नो॑ गरुडः प्रचो॒दया॑त्॥ वे॒दा॒त्म॒नाय॑ वि॒द्महे॑ हिरण्यग॒र्भाय॑ धीमहि। तन्नो॑ ब्रह्म प्रचो॒दया॑त्॥ ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासुदे॒वाय॑ धीमहि। तन्नो॑ विष्णुः प्रचो॒दया॑त्॥ व॒ज्र॒न॒खाय॑ वि॒द्महे॑ तीक्ष्णद॒ꣳष्ट्राय॑ धीमहि। तन्नो॑ नारसिꣳहः प्रचो॒दया॑त्॥ भा॒स्क॒राय॑ वि॒द्महे॑ महद्युतिक॒राय॑ धीमहि। तन्नो॑ आदित्यः प्रचो॒दया॑त्॥ वै॒श्वा॒न॒राय॑ वि॒द्महे॑ लाली॒लाय॑ धीमहि। तन्नो॑ अग्निः प्रचो॒दया॑त्॥ का॒त्या॒य॒नाय॑ वि॒द्महे॑ कन्याकु॒मारि॑ धीमहि। तन्नो॑ दुर्गिः प्रचो॒दया॑त्॥

दूर्वासूक्तम्

स॒ह॒स्र॒पर॑मा दे॒वी॒ श॒तमू॑ला श॒ताङ्कु॑रा। सर्व॑ꣳ हरतु॑ मे पा॒पं॒ दू॒र्वा दु॑ःस्वप्न॒नाश॑नी॥ काण्डा॑त्काण्डात् प्र॒रोह॑न्ती॒ परु॑षः परु॒षः परि॑। ए॒वा नो॑ दूर्वे॒ प्रत॑नु स॒हस्रे॑ण श॒तेन॑ च॥ या श॒तेन॑ प्रत॒नोषि॑

स॒हस्रे॑ण वि॒रोह॑सि। तस्या᳚स्ते देवीष्टके वि॒धेम॑ ह॒विषा॑ व॒यम्॥ अश्व॑क्रा॒न्ते र॑थक्रा॒न्ते॒ वि॒ष्णुक्रा᳚न्ते व॒सुन्ध॑रा। शिरसा॑ धार॑यिष्या॒मि॒ र॒क्ष॒स्व मा᳚ पदे॒ पदे॥

मृत्तिकासूक्तम्

भूमिर्धेनुर्धरणी लो॑कधा॒रिणी। उ॒द्धृता॑ऽसि व॑राहे॒ण॒ कृ॒ष्णे॒न श॑तबा॒हुना॥ मृ॒त्तिके॑ हन॑ मे पा॒पं॒ य॒न्म॒या दु॑ष्कृत॒ं कृतम्। मृ॒त्तिके᳚ ब्रह्म॑दत्ता॒ऽसि॒ का॒श्यपे॑नाभि॒मन्त्रि॑ता। मृ॒त्तिके॑ देहि॑ मे पु॒ष्टिं॒ त्व॒यि स॑र्वं प्र॒तिष्ठि॑तम्॥ मृ॒त्तिके᳚ प्रतिष्ठि॑ते स॒र्व॒ं त॒न्मे निर्णु॑द॒ मृत्ति॑के। तया॑ ह॒तेन॑ पापे॒न॒ ग॒च्छा॒मि प॑रमा॒ं गतिम्॥

शत्रुजयमन्त्राः

यत॑ इन्द्र भया॑महे॒ ततो॑ नो॒ अभ॑यं कृधि। मघ॑वञ्छ॒ग्धि तव॒ तन्न॑ ऊ॒तये॒ विद्विषो॒ विमृधो॑ जहि॥ स्व॒स्ति॒दा वि॒शस्पति॑र्वृत्र॒हा विमृधो॑ व॒शी। वृषेन्द्र॑ः पु॒र ए॑तु नः स्वस्ति॒दा अ॑भयङ्क॒रः॥ स्व॒स्ति न॒ इन्द्रो॑ वृद्धश्र॑वाः स्व॒स्ति न॑ः पूषा वि॒श्ववे॑दाः। स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥ आपा᳚न्तमन्युस्तृ॒पल॑प्रभर्मा॒धुनि॒ः शिमी॑वा॒ञ्छरु॑माꣳ ऋजी॒षी। सोमो॒ विश्वा᳚न्यत॒सा वना॑नि॒ नार्वागिन्द्र॑ं प्रति॒माना॑नि देभुः॥

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द्वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑ः। स्यो॒ना पृ॑थिवि॒ भवा॑ नृक्ष॒रा नि॒वेश॑नी। यच्छा॑ न॒ः शर्म॑ स॒प्रथा᳚ः॥

ग॒न्ध॒द्वा॒रां दु॑रा॒ध॒र्षां॓ नि॒त्यपु॑ष्टां करी॒षिणी॓म्। ई॒श्वरी॑ꣳ सर्व॑भूता॒ना॒ं
ता॒मि॒होप॑ह्वये॒ श्रियम्॥ श्रीं॓र्मे भ॒जतु। अलक्ष्मीं॓र्मे न॒श्यतु।
विष्णुं॑मुखा॒ वै दे॒वाश्छन्दो॑भिरि॒माल्लो॒काने॑नपज॒य्यम॒भ्यं॑जयन्। म॒हाꣳ॑
इन्द्रो॒ वज्रं॑बाहुः षोड॒शी शर्म॑ यच्छतु॥ स्व॒स्ति नो॑ म॒घवा॑ करोतु॒
हन्तु॑ पा॒प्मानं॒ यों॓ऽस्मान् द्वेष्टिं॑॥ सो॒मान॒ꣳ॒ स्वर॑णं कृणु॒हि
ब्रं॑ह्मणस्पते। क॒क्षीवं॑न्तं॒ य औं॑शि॒जम्। शरीं॑रं यज्ञशम॒लं कुसीं॑दं॒
तस्मिं॓न् सीदतु॒ यों॓ऽस्मान् द्वेष्टिं॑॥

चर॑णं प॒वित्रं॒ वित॑तं पुरा॒णं येन॑ पू॒तस्तर॑ति दुष्कृ॒तानिं॑। तेन॑
प॒वित्रे॑ण शु॒द्धेन॑ पू॒ता अतिं॑ पा॒प्मान॒मरा॑तिं तरेम॥ स॒जोषा॑ इन्द्र॒
सग॑णो म॒रुद्भिः॒ सोमं॑ पिब वृत्रहञ्छूर वि॒द्वान्। ज॒हि शत्रू॒ꣳ॒रप॒
मृधो॑ नुद॒स्वाथाभ॑यं कृणुहि वि॒श्वतो॑ नः॥ सु॒मि॒त्रा न॒ आप॒
ओष॑धयः सन्तु दु॒र्मि॒त्रास्तस्मै॑ भूयासु॒र्यो॓ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं
द्वि॒ष्मः॥

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन। म॒हे रणा॑य॒ चक्ष॑से।
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑ः। उ॒श॒तीरि॑व मा॒तर॑ः।
तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च
नः॥

अघमर्षणसूक्तम्

हिर॑ण्यश‍ृङ्गं॒ वरु॑णं॒ प्रप॑द्ये ती॒र्थं मे॑ देहि॒ याचि॑तः। य॒न्मया॑
भु॒क्तम॒साधू॑नां पा॒पेभ्य॑श्च प्र॒तिग्र॑हः॥ यन्मे॒ मन॑सा वा॒चा॒ क॒र्म॒णा वा
दु॑ष्कृ॒तं कृ॒तम्। तन्न॒ इन्द्रो॒ वरु॑णो॒ बृह॒स्पति॑ः सवि॒ता च॑ पुनन्तु॒

पुनः पुनः॥ नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः॥ यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्॥ अत्याशनादतीपानाद् यच्च उग्रात् प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु॥ सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्म सलोकताम्॥ यश्चाप्सु वरुणः स पुनात्वघमर्षणः॥ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तयाऽर्जीकीये शृणुह्या सुषोमया॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्रिरजायत ततः समुद्रो अर्णवः॥ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो सुवः॥ यत्पृथिव्याꣳ रजः स्वमान्तरिक्षे विरोदसी। इमाꣳस्तदापो वरुणः पुनात्वघमर्षणः॥ पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता॥ एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम्। द्यावापृथिव्योर्हिरण्मयꣳ सꣳश्रितꣳ सुवः। स नः सुवः सꣳशिशाधि॥ आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहा॥ अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः। वरुणोऽपामघमर्षणस्तस्मात् पापात् प्रमुच्यते॥ रजोभूमिस्त्वमाꣳ रोदयस्व प्रवदन्ति धीराः॥ आक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा। वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः॥

दुर्गासूक्तम्

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिं पर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात् सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि। स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनु संचरेम। नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्॥

व्याहृतिहोममन्त्राः

भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा सुवरन्नमादित्याय दिवे स्वाहा भूर्भुवः सुवरन्नं चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमोम्॥

भूर॒ग्नये॑ पृथि॒व्यै स्वाहा॒ भुवो॑ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒ सुव॑रादि॒त्याय॑ दि॒वे स्वाहा॒ भुर्भुव॒ः सुव॑श्च॒न्द्रम॑से दि॒ग्भ्यः स्वाहा॒ नमो॑ दे॒वेभ्य॑ः स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒ः सुव॒रग्न॒ ओम्॥

भूर॒ग्नये॑ च पृथि॒व्यै च॑ मह॒ते च॒ स्वाहा॒ भुवो॑ वा॒यवे॑ चा॒न्तरि॑क्षाय च मह॒ते च॒ स्वाहा॒ सुव॑रादि॒त्याय॑ च दि॒वे च॑ मह॒ते च॒ स्वाहा॒ भूर्भुव॒ः सुव॑श्च॒न्द्रम॑से च॒ नक्ष॑त्रेभ्यश्च दि॒ग्भ्यश्च॑ मह॒ते च॒ स्वाहा॒ नमो॑ दे॒वेभ्य॑ः स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒ः सुव॒र्मह॒रोम्॥

ज्ञानप्राप्त्यर्था होममन्त्राः

पाहि नो अग्न एन॑से स्वा॒हा। पाहि नो विश्ववेद॑से स्वा॒हा। यज्ञं पाहि विभाव॑सो स्वा॒हा। सर्वं॑ पाहि शतक्र॑तो स्वा॒हा॥

पा॒हि नो॑ अग्न॒ एक॑या। पा॒ह्यु॑त द्वि॒तीय॑या। पा॒ह्यूर्जं॑ तृ॒तीय॑या। पा॒हि गी॒र्भिश्च॑त॒सृभि॑र्वसो॒ स्वाहा॑॥

वेदादिस्मरणाय जपमन्त्राः

यश्छन्द॑सामृष॒भो वि॒श्वरू॑प॒श्छन्दो॒भ्य॒श्छन्दा॒ꣳस्यावि॒वेश॑। सचा॒ꣳ शिक्यः॑ पुरोवाचो॑पनि॒षदिन्द्रो॑ ज्ये॒ष्ठ इ॑न्द्रि॒याय॒ ऋषि॑भ्यो॒ नमो॑ दे॒वेभ्य॑ः स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒ः सुव॒श्छन्द॒ ओम्॥

नमो॒ ब्रह्म॑णे धा॒रणं॑ मे अ॒स्त्वनि॑राकरणं धा॒रयि॑ता भूयास॒ं कर्ण॑योः श्रु॒तं मा च्यो॑ढ्वं॒ ममा॒मुष्य॒ ओम्॥

तपः प्रशंसा

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः॥

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति यथाऽसिधारां कर्तेऽवहितामवक्रामे यद्युवे युवे हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत्॥

दहरविद्या

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्॥ सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त जिह्वाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयान्निहिताः सप्त सप्त॥ अतः समुद्रा गिरयश्च सर्वेऽस्मात् स्यन्दन्ते सिन्धवः सर्वरूपाः। अतश्च विश्वा ओषधयो रसाच्च येनैष भूतस्तिष्ठत्यन्तरात्मा॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्॥ अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

घृतसूक्तम्

घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम। अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥ समुद्रादूर्मिर्मधुमा॑ँ उदारदुपा॑ँशुना सममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥ वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्॥ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या॑ँ आविवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्। इन्द्र एक॑ँ सूर्य एकं जजान वेनादेक॑ँ स्वधया निष्टतक्षुः॥

यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमान॑ँ स नो देवः शुभया स्मृत्या संयुनक्तु॥ यस्मात्परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोँऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्॥

संन्याससूक्तम्

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति॥ वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥ दह्रं

वि॒पा॒पं प॒रमे॑श्मभूत॒ं यत्पु॑ण्डरी॒कं पु॒रम॑ध्यस॒ꣳस्थम्। त॒त्रा॒पि॒ द॒ह्रं ग॒गन॑ं विशोक॒स्तस्मि॑न् यद॒न्तस्तदुपा॑सित॒व्यम्॥ यो वेदादौ स्वर॑ः प्रो॒क्तो॒ वे॒दान्ते॑ च प्र॒तिष्ठि॑तः। तस्य॑ प्र॒कृति॑लीन॒स्य॒ य॒ः पर॑ः स म॒हेश्व॑रः॥

नारायणसूक्तम्

[9] स॒ह॒स्र॒शीर्॑षं दे॒वं वि॒श्वाक्ष॑ं वि॒श्वश॑ंभुवम्। विश्व॑ं ना॒राय॑णं दे॒व॒म॒क्षर॑ं पर॒मं प॒दम्। वि॒श्वत॒ः पर॑मान्नि॒त्यं॒ वि॒श्वं ना॑राय॒णꣳ ह॑रिम्। विश्व॑मे॒वेदं पुरु॑ष॒स्तद् विश्व॒मुप॑जीवति। पति॒ं विश्व॑स्या॒त्मेश्व॑र॒ꣳ शाश्व॑तꣳ शि॒वम॑च्युतम्। ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम्। ना॒राय॒ण प॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः। ना॒राय॒ण प॑रं ब्र॒ह्म॒तत्त्वं ना॑राय॒णः प॑रः। ना॒राय॒ण प॑रो ध्या॒ता॒ ध्या॒नं ना॑राय॒णः प॑रः। यच्च॑ कि॒ञ्चिज्ज॑गत् स॒र्व॒ं दृ॒श्यते॑ श्रू॒यते॒ऽपि॑ वा॥

अन्त॑र्ब॒हिश्च॑ तत्स॒र्व॒ं व्या॒प्य ना॑राय॒णः स्थि॑तः। अन॑न्त॒मव्य॑यं क॒विꣳ स॑मु॒द्रेऽन्त॑ं वि॒श्वश॑ंभुवम्। प॒द्म॒को॒शप्र॑तीका॒श॒ꣳ हृ॒दय॑ं चाप्य॒धोमु॑खम्। अधो॑ नि॒ष्ट्या वि॑तस्या॒न्ते॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति। ज्वा॒ल॒मा॒लाकु॑लं भा॒ति॒ वि॒श्वस्या॑ऽयत॒नं म॑हत्। सन्त॑तꣳ शि॒लाभि॑स्तु॒ लम्ब॑त्याकोश॒संनि॑भम्। तस्यान्ते॑ सुषि॒रꣳ सू॒क्ष्मं तस्मि॑न् स॒र्वं प्रति॑ष्ठितम्। तस्य॒ मध्ये॑ म॒हान॑ग्नि॒र्वि॒श्वार्चि॑र्वि॒श्वतो॑मुखः। सोऽग्र॑भु॒ग्विभ॑जन् ति॒ष्ठ॒न्नाहा॑रमज॒रः क॒विः। ति॒र्य॒गू॒र्ध्वम॑धःशा॒यी॒ र॒श्मय॑स्तस्य॒

---

[9] "स॒ह॒स्र॒शीर्षम्" इति भवितव्यं, किञ्च "स॒ह॒स्र॒शीर्॑षम्" इति शिष्टवचनम्

स॒न्त॑ता। स॒न्ता॒पय॑ति स्वं दे॒हमापा॑दतल॒मस्त॑कः। तस्य॒ मध्ये॒ वह्नि॑शिखा अ॒णीयो॑र्ध्वा व्य॒वस्थि॑तः। नी॒लतो॑यद॑मध्य॒स्था॒द् वि॒द्युल्ले॑खेव॒ भास्व॑रा। नी॒वा॒रशूक॑वत् त॒न्वी॒ पी॒ता भा॒स्वत्य॒णूप॑मा। तस्याः॑ शिखा॒या म॑ध्ये प॒रमा॑त्मा व्य॒वस्थि॑तः। स ब्रह्म॒ स शिव॒ः स हरि॒ः सेन्द्र॒ः सोऽक्ष॑रः पर॒मः स्व॒राट्॥

आदित्योपासनमन्त्राः

आ॒दि॒त्यो वा ए॒ष ए॒तन्म॒ण्डल॒ं तप॑ति॒ तत्र॒ ता ऋच॒स्तदृ॒चा म॑ण्डल॒ꣳ स ऋ॒चां लो॒कोऽथ॒ य ए॒ष ए॒तस्मि॑न्म॒ण्डले॒ऽर्चिर्दी॒प्यते॒ तानि॒ सामा॑नि॒ स सा॒म्नां लो॒कोऽथ॒ य ए॒ष ए॒तस्मि॑न्म॒ण्डले॒ऽर्चिषि॒ पुरु॑ष॒स्तानि॒ यजू॑ꣳषि॒ स यजु॑षा मण्डल॒ꣳ स यजु॑षां लो॒कः सैषा त्र॒य्येव॑ वि॒द्या त॑पति॒ य ए॒षो॑ऽन्तरा॑दि॒त्ये हि॑र॒ण्मय॒ः पुरु॑षः॥

आ॒दि॒त्यो वै तेज॒ ओजो॒ बल॒ं यश॒श्चक्षु॒ः श्रोत्र॑मा॒त्मा मनो॑ म॒न्युर्मनु॑र्मृ॒त्युः स॒त्यो मि॒त्रो वा॒युरा॑का॒शः प्रा॒णो लो॑कपा॒लः कः किं कं तत्स॒त्यमन्न॑मनृ॒तो॑ जी॒वो विश्व॑ः कत॒मः स्वय॒ंभु ब्रह्मै॒तदमृ॑त ए॒ष पुरु॑ष ए॒ष भू॒ताना॒मधि॑पति॒र्ब्रह्म॑ण॒ः सायु॑ज्यꣳ सलो॒कता॑माप्नोत्येतासा॑मे॒व दे॒वता॑ना॒ꣳ सायु॑ज्यꣳ सा॒र्ष्टिता॑ꣳ समानलो॒कता॑माप्नोति॒ य ए॒वं वेदे॑त्युपनिषत्॥

शिवोपासनमन्त्राः

निध॑नपतये॒ नमः। निध॑नपतान्तिकाय॒ नमः। ऊर्ध्वाय॒ नमः। ऊर्ध्वलिङ्गाय॒ नमः। हिरण्याय॒ नमः। हिरण्यलिङ्गाय॒ नमः। सुवर्णाय॒ नमः। सुवर्णलिङ्गाय॒ नमः। दिव्याय॒ नमः। दिव्यलिङ्गाय॒

नमः। भवाय नमः। भवलिङ्गाय नमः। शर्वाय नमः। शर्वलिङ्गाय नमः। शिवाय नमः। शिवलिङ्गाय नमः। ज्वलाय नमः। ज्वललिङ्गाय नमः। आत्माय नमः। आत्मलिङ्गाय नमः। परमाय नमः। परमलिङ्गाय नमः। एतत्सोमस्य सूर्यस्य सर्वलिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम्॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः॥ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रः सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शंतमꣳ हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥

वृक्षविशेषस्याभिधानम्

यस्य॒ वैक॑ङ्क॒त्यग्निहो॒त्रह॑व॑णी भवति॒ प्रत्ये॒वास्याऽहु॑तयस्तिष्ठ॒न्त्यथो॒ प्रति॑ष्ठित्यै॥

(कृ॒णु॒ष्व पाज॒ इति॒ पञ्च॑।)

भूदेवताकमन्त्रः

अदि॑तिर्दे॒वा ग॑न्ध॒र्वा म॑नु॒ष्या॑ः पि॒तरोऽसु॑रा॒स्तेषा॑ꣳ सर्वभू॒ताना॑ं मा॒ता मे॒दिनी॑ मह॒ता म॒ही सा॑वि॒त्री गा॑य॒त्री जग॑त्यु॒र्वी पृ॒थ्वी ब॑हु॒ला विश्वा॑ भू॒ता क॑त॒मा काया सा स॒त्येत्य॒मृतेति॑ वसि॒ष्ठः॥

सन्ध्यावन्दनमन्त्राः

आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा आप॑ः प॒शव॒ आपोऽन्न॒मापोऽमृ॑त॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः स्व॒राडाप॒श्छन्दा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑ः स॒त्यमाप॒ः सर्वा॑ दे॒वता॒ आपो॒ भूर्भुव॒ः सुव॒राप॒ ओम्॥

आप॑ः पुनन्तु पृथि॒वीं पृ॑थि॒वी पू॒ता पु॑नातु॒ माम्। पु॒नन्तु॒ ब्रह्म॑ण॒स्पति॒र्ब्रह्म॑ पू॒ता पु॑नातु॒ माम्॥ यदुच्छि॑ष्ट॒मभो॑ज्यं॒ यद्वा॑ दु॒श्चरि॑तं॒ मम॑। सर्वं॑ पुनन्तु॒ मामापो॑ऽस॒तां च॑ प्रति॒ग्रह॒ꣳ स्वाहा॑॥

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्यु॑कृते॒भ्यः। पापेभ्यो॑ रक्ष॒न्ताम्। यदह्ना पाप॑मका॒र्षम्। मनसा वाचा॑ हस्ता॒भ्याम्। पद्भ्यामुदरे॑ण

शि॒श्ना। अह॒स्तद॑वलु॒म्पतु। यत्किञ्च॑ दुरि॒तं मयि॑। इदमहं
माममृ॑तयो॒नौ। सत्ये ज्योतिषि जुहो॑मि स्वा॒हा॥

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्यु॑कृते॒भ्यः। पापेभ्यो॑ रक्ष॒न्ताम्।
यद्रात्रिया पाप॑मका॒र्षम्। मनसा वाचा॑ हस्ता॒भ्याम्। पद्भ्यामुदरे॑ण
शि॒श्ना। रात्रि॒स्तदव॑लु॒म्पतु। यत्किञ्च॑ दुरि॒तं मयि॑। इदमहं
माममृ॑तयो॒नौ। सूर्ये ज्योतिषि जुहो॑मि स्वा॒हा॥

ओमित्येकाक्ष॑रं ब्र॒ह्म। अग्निर्देवता ब्रह्म॑ इत्या॒र्षम्। गायत्रं छन्दं
परमात्म॑ं सरू॒पम्। सायुज्यं वि॑नियो॒गम्॥

आया॑तु॒ वर॑दा दे॒वी॒ अ॒क्षर॑ं ब्रह्म॒ संमि॑तम्। गा॒य॒त्री᳚ं छन्द॑सां मा॒तेदं
ब्र॑ह्म जु॒षस्व॑ मे॥ यदह्ना᳚त्कुरु॑ते पा॒पं॒ तदह्ना᳚त्प्रति॒मुच्य॑ते।
यद्रात्रिया᳚त्कुरु॑ते पा॒पं॒ तद्रात्रिया᳚त्प्रति॒मुच्य॑ते। सर्व॑व॒र्णे म॑हादे॒वि॒
स॒न्ध्यावि॑द्ये स॒रस्व॑ति॥ ओजो॑ऽसि॒ सहो॑ऽसि॒ बल॑मसि॒ भ्राजो॑ऽसि
दे॒वानां॒ धाम॒ नामा॑ऽसि॒ विश्व॑मसि वि॒श्वायु॒ः सर्व॑मसि
स॒र्वायु॒रभि॑भूरों गायत्रीमावा॑हया॒मि॒ सावित्रीमावा॑हया॒मि॒
सरस्वतीमावा॑हया॒मि॒ छन्दर्षीनावा॑हया॒मि॒ श्रियमावा॑हया॒मि॒
गायत्रिया गायत्री छन्दो विश्वामित्र ऋषिः सविता देवताऽग्निर्मुखं
ब्रह्मा शिरो विष्णुर्हृदयꣳ रुद्रः शिखा पृथिवी योनिः
प्राणापानव्यानोदानस्माना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा
गायत्री चतुर्विंशत्यक्षरा त्रिपदा॑ षट्कु॒क्षि॒ः पञ्चशीर्षोपनयने विनियो॒ग॒
ॐ भूः। ॐ भुवः। ओꣳसुवः। ॐ महः। ॐ जनः। ॐ तपः।
ओꣳ स॒त्यम्। ॐ तत्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। धियो॒

यो नः॑ प्रचो॒दया॑त्। ओमापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒ः सुव॒रोम्॥

उ॒त्तमे॑ शिख॑रे जा॒ते॒ भू॒म्यां प॑र्वतमू॒र्ध॑नि। ब्रा॒ह्मणे॑भ्योऽभ्य॑नुज्ञा॒ता॒ ग॒च्छ दे॑वि य॒थासु॑खम्॥ स्तुतो मया वरदा वे॑दमा॒ता॒ प्रचोदयन्ती पवने॑ द्विजा॒ता। आयुः पृथिव्यां द्रविणं ब्र॑ह्मव॒र्च॒सं॒ मह्यं दत्वा प्रजातुं ब्र॑ह्मलो॒कम्॥

घृणि॒ः सूर्य॑ आदि॒त्यो न प्रभा॑ वा॒त्यक्ष॑रम्। मधु॑ क्षरन्ति॒ तद्र॑सम्। स॒त्यं वै तद्रस॒मापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒ः सुव॒रोम्॥

त्रिसुपर्णम्

ब्रह्म॑मेतु॒ माम्। मधु॑मेतु॒ माम्। ब्रह्म॑मे॒व मधु॑मेतु॒ माम्। यास्ते॑ सोम प्र॒जा व॒त्सोऽभि॒ सो अ॒हम्। दुष्व॑प्र॒हन्दु॑रुष्वह। यास्ते॑ सोम प्रा॒णाꣳस्तां जु॑होमि। त्रिसु॑पर्ण॒मया॑चितं ब्रा॒ह्मणाय॑ दद्यात्। ब्र॒ह्म॒ह॒त्यां वा ए॒ते घ्नं॑न्ति। ये ब्रा॑ह्म॒णास्त्रिसु॑पर्ण॒ं पठ॑न्ति। ते सोम॒ं प्राप्नु॑वन्ति। आ॒ स॒ह॒स्रात् प॒ङ्क्तिं पुन॑न्ति। ओम्॥

ब्रह्म॑ मे॒धया॑। मधु॑ मे॒धया॑। ब्रह्म॑मे॒व मधु॑ मे॒धया॑॥ अ॒द्या नो॑ देव सवितः प्र॒जाव॑त्सावी॒ः सौभ॑गम्। परा॑ दु॒ष्वप्नि॑यꣳ सुव। विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑सुव। यद्भ॒द्रं तन्म॒ आसु॑व॥ मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः। माध्वी॑र्नः स॒न्त्वोष॑धीः। मधु॒ नक्त॑मु॒तोषसि॒ मधु॑म॒त्पार्थि॑व॒ꣳ रज॑ः। मधु॒ द्यौर॑स्तु नः पि॒ता। मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माꣳ अस्तु॒ सूर्य॑ः। माध्वी॒र्गावो॑ भवन्तु नः। य इ॒मं त्रिसु॑पर्ण॒मया॑चितं ब्रा॒ह्मणाय॑ दद्यात्। भ्रू॒ण॒ह॒त्यां वा ए॒ते

घ्नंन्ति। ये ब्राँह्मणास्त्रिसुंपर्णं पठंन्ति। ते सोमं प्राप्नुंवन्ति। आ सहस्रात् पङ्क्तिं पुनंन्ति। ओम्।

ब्रह्मं मेधवाँ। मधुं मेधवाँ। ब्रह्मंमेव मधुं मेधवाँ॥ ब्रह्मा देवानाँ पदवीः कंवीनामृषिर्विप्राणां महिषो मृगानाँम्। श्येनो गृध्राणाँ स्वधिंतिर्वनानाँ सोमंः पवित्रमत्येति रेभन्॥ हँसः शुंचिषद् वसुंरन्तरिक्षसद्धोता वेदिषदतिंथिर्दुरोणसत्। नृषद्वंरसदृंतसद् व्योमसदब्जा गोजा ऋंतजा अंद्रिजा ऋतं बृहत्॥ ऋचे त्वां रुचे त्वा समित् स्रंवन्ति सरितो न धेनाँः। अन्तर्हृदा मनंसा पूयमांनाः। घृतस्य धारां अभिचांकशीमि॥ हिरण्ययो वेतसो मध्यं आसाम्। तस्मिँन् सुपर्णो मंधुकृत्कुंलायी भजंन्नास्ते मधुं देवताँभ्यः। तस्यांऽसते हरंयः सप्ततिरैँ स्वधां दुहांना अमृतंस्य धाराँम्॥ य इदं त्रिसुंपर्णमयांचितं ब्राह्मणायं दद्यात्। वीरहत्यां वा एते घ्नंन्ति। ये ब्राँह्मणास्त्रिसुंपर्णं पठंन्ति। ते सोमं प्राप्नुंवन्ति। आ सहस्रात् पङ्क्तिं पुनंन्ति। ओम्।

मेधासूक्तम्

मेधा देवी जुषमांणा न आगाँद्विश्वाची भद्रा सुंमनस्यमांना। त्वया जुष्टां नुदमांना दुरुक्ताँन् बृहद्वंदेम विदथें सुवीराँः॥ त्वया जुष्टं ऋषिर्भवति देवि त्वया ब्रह्मांऽऽगतश्रीरुत त्वयाँ। त्वया जुष्टंश्चित्रं विंन्दते वसु सा नों जुषस्व द्रविंणो न मेधे॥ मेधां म इन्द्रों ददातु मेधां देवी सरंस्वती। मेधां मे अश्विनांवुभावाधंत्तां पुष्कंरस्रजा॥ अप्सरासु च या मेधा गंन्धर्वेषुं च यन्मनंः। दैवीँ मेधा सरंस्वती सा माँ मेधा सुरभिंर्जुषताँ स्वाहाँ॥ आ माँ मेधा

सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मेधां सुप्रतीका जुषन्ताम्॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥

मृत्युसूक्तम्

अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु। पर्णं वनस्पतेरिवाभि नः शीयता॰ रयिः सचतां नः शचीपतिः॥ परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा॰ रीरिषो मोत वीरान्॥ वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः। स नो मृत्योस्त्रायतां पात्व॰हसो ज्योग्जीवा जरामशीमहि॥ अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः। प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः॥ हरि॰ हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम्। ब्रह्म सरूपमनु मेदमागादयनं मा विवधीर्विक्रमस्व॥ शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम्। उभयोर्लोकयोर्ऋध्वाऽति मृत्युं तराम्यहम्॥ मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः। प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु

री॒रि॒षः। वी॒रान्मा नो॑ रुद्र भामि॒तो व॑धीर्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ता ब॑भूव। यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यङ् स्या॑म॒ पत॑यो रयी॒णाम्॥ स्व॒स्ति॒दा वि॒शस्पति॑र्वृत्र॒हा वि॒मृधो॑ व॒शी। वृषेन्द्रः॑ पु॒र ए॑तु नः स्वस्ति॒दा अ॑भयङ्क॒रः॥ त्र्य॑म्बकं यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्। उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॑॑त्॥ ये ते॑ स॒हस्र॑म॒युतं॒ पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे। तान् य॒ज्ञस्य॑ मा॒यया॒ सर्वा॒नव॑ यजामहे॥ मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा॑॑॥

पापनिवारका मन्त्राः

दे॒वकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑।
म॒नु॒ष्य॑कृत॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑।
पि॒तृकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑।
आ॒त्मकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑।
अ॒न्यकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑।
अ॒स्मत्कृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा॑॑। यद्दि॒वा च॒ नक्तं॒ चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा॑॑। यत्स्व॒पन्त॑श्च॒ जाग्र॑त॒श्चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा॑॑। यत्सु॒षुप्त॑श्च॒ जाग्र॑त॒श्चैन॑श्चकृ॒मतस्या॑व॒यज॑नमसि॒ स्वाहा॑॑। यद्वि॒द्वाꣳस॒श्चावि॑द्वाꣳस॒श्चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा॑॑। एनस एनसोऽवयजनम॑सि स्वा॒हा॥

यद्वो देवाश्चकृम जिह्वया गुरुमनसो वा प्रयुती देवहेडनम्। अरा वायो नो अभि दुच्छुनायते तस्मिन् तदेनो वसवो निधेतन स्वाहा॥

कामोऽकार्षीत् मन्युरकार्षीत्

कामोऽकार्षीन्नमो नमः। कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा॥

मन्युरकार्षीन्नमो नमः। मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा॥

विरजाहोममन्त्राः

तिलाञ्जुहोमि सरसा॰ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा॥ गावो हिरण्यं धनमन्नपान॰ सर्वेषाँ श्रियै स्वाहा॥ श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चाऽनृण्यताम्। ब्रह्मण्यं बहुपुत्रताम्। श्रद्धामेधे प्रजाः संददातु स्वाहा॥ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः। तिलाः पुनन्तु मे पापं यत्किञ्चिद् दुरितं मयि स्वाहा॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः। गोस्तेय॰ सुरापानं भ्रूणहत्या तिला शान्ति॰ शमयन्तु स्वाहा॥ श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽनृण्यताम्। ब्रह्मण्यं बहुपुत्रताम्। श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु स्वाहा॥ प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा

विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिः सङ्कल्पा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घाशिश्नोपस्थपायवो मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥

उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ पृथिव्यापस्तेजो वायुराकाशा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ शब्दस्पर्शरूपरसगन्धा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥

मनोवाक्कायकर्माणि मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ अव्यक्तभावैर॑हङ्का॒रै॒र्ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ आत्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ अन्तरात्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ परमात्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥ क्षु॒धे स्वाहाँ। क्षुत्पि॑पासाय॒ स्वाहाँ। विवि॑ट्ट्यै॒ स्वाहाँ। ऋग्वि॑धानाय॒ स्वाहाँ। क॒षोँत्काय॒ स्वाहाँ। क्षु॒त्पि॒पा॒साम॑लं ज्ये॒ष्ठा॒म॒लक्ष्मीर्ना॑शया॒म्यहम्। अभू॑ति॒मस॑मृद्धिं॒ च॒ सर्वा॒न्निर्णु॑द मे पाप्मा॑नꣳ स्वा॒हा॥ अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भूं॒यास॒ꣳ स्वाहाँ॥

वैश्वदेवमन्त्राः

अ॒ग्नये॒ स्वाहा᳚। विश्वे᳚भ्यो दे॒वेभ्य॒ः स्वाहा᳚। ध्रु॒वाय॑ भू॒माय॒ स्वाहा᳚।
ध्रु॒व॒क्षित॑ये॒ स्वाहा᳚। अ॒च्यु॒त॒क्षित॑ये॒ स्वाहा᳚। अ॒ग्नये᳚ स्विष्ट॒कृते॒
स्वाहा᳚॥ धर्मा॑य॒ स्वाहा᳚। अध॑र्माय॒ स्वाहा᳚। अ॒द्भ्यः स्वाहा᳚।
ओ॒ष॒धि॒व॒न॒स्प॒तिभ्य॒ः स्वाहा᳚। र॒क्षो॒दे॒व॒ज॒नेभ्य॒ः स्वाहा᳚। गृह्या᳚भ्य॒ः
स्वाहा᳚। अ॒व॒साने᳚भ्य॒ः स्वाहा᳚। अ॒व॒सान॑पतिभ्य॒ः स्वाहा᳚।
स॒र्व॒भू॒तेभ्य॒ः स्वाहा᳚। कामा॑य॒ स्वाहा᳚। अ॒न्तरि॑क्षाय॒ स्वाहा᳚।
यदेज॑ति॒ जग॑ति॒ यच्च॒ चेष्ट॑ति॒ नाम्नो॑ भा॒गोऽयं नाम्ने॒ स्वाहा᳚। पृ॒थि॒व्यै
स्वाहा᳚। अ॒न्तरि॑क्षाय॒ स्वाहा᳚। दि॒वे स्वाहा᳚। सूर्या॑य॒ स्वाहा᳚।
च॒न्द्रम॑से॒ स्वाहा᳚। नक्ष॑त्रेभ्य॒ः स्वाहा᳚। इन्द्रा॑य॒ स्वाहा᳚। बृह॒स्पत॑ये॒
स्वाहा᳚। प्र॒जाप॑तये॒ स्वाहा᳚। ब्रह्म॑णे॒ स्वाहा᳚। स्व॒धा पि॒तृभ्य॒ः स्वाहा᳚।
नमो॑ रु॒द्राय॑ पशु॒पत॑ये॒ स्वाहा᳚। दे॒वेभ्य॒ः स्वाहा᳚। पि॒तृभ्य॑ः
स्व॒धाऽस्तु॑। भूतेभ्यो॒ नम॑ः। म॒नुष्ये᳚भ्यो॒ हन्ता᳚। प्र॒जाप॑तये॒ स्वाहा᳚।
प॒र॒मे॒ष्ठिने॒ स्वाहा᳚॥

यथा कूप॑ः श॒तधा॑रः स॒हस्र॑धारो॒ अक्षि॑तः। ए॒वा मे॑ अस्तु धा॒न्यꣳ
स॒हस्र॑धार॒मक्षि॑तम्॥ धन॑धान्यै॒ स्वाहा᳚॥ ये भू॒ताः प्र॒चर॑न्ति॒
दिवा॒नक्तं॒ बलि॑मि॒च्छन्तो॑ वि॒तुद॑स्य॒ प्रेष्या᳚ः। तेभ्यो॑ ब॒लिं पु॑ष्टि॒कामो॑
हरामि॒ मयि॒ पुष्टिं॒ पुष्टि॑पतिर्दधातु॒ स्वाहा᳚॥

ओं᳚ तद्ब्र॒ह्म। ओं᳚ तद्वा॒युः। ओं᳚ तदा॒त्मा। ओं᳚ तत्स॒त्यम्। ओं᳚
तत्सर्व᳚म्। ओं᳚ तत्पुरो॒र्नमः॥ अन्तश्चर॑ति भूते॒षु गुहायां
वि॑श्वमू॒र्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं

ब्रह्म त्वं॑ प्रजा॒पतिः। त्वं त॑दाप आपो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒ः सुव॒रोम्॥

प्राणाहुतिमन्त्राः

श्र॒द्धायां᳚ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि। श्र॒द्धाया॑मपा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। श्र॒द्धायां᳚ व्या॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। श्र॒द्धाया॑मुदा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। श्र॒द्धाया॑ꣳ समा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑॥ अ॒मृ॒तो॒प॒स्त॒र॑णमसि॥

श्र॒द्धायां᳚ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि। शि॒वो मा॑ वि॒शाप्र॑दाहाय। प्रा॒णाय॒ स्वाहा᳚॥ श्र॒द्धाया॑मपा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। शि॒वो मा॑ वि॒शाप्र॑दाहाय। अ॒पा॒नाय॒ स्वाहा᳚॥ श्र॒द्धायां᳚ व्या॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। शि॒वो मा॑ वि॒शाप्र॑दाहाय। व्या॒नाय॒ स्वाहा᳚॥ श्र॒द्धाया॑मुदा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। शि॒वो मा॑ वि॒शाप्र॑दाहाय। उ॒दा॒नाय॒ स्वाहा᳚॥ श्र॒द्धाया॑ꣳ समा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि। शि॒वो मा॑ वि॒शाप्र॑दाहाय। स॒मा॒नाय॒ स्वाहा᳚॥ ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑॥ अ॒मृ॒ता॒पि॒धा॒नम॑सि॥

श्र॒द्धायां᳚ प्रा॒णे निवि॑श्या॒मृत॑ꣳ हु॒तम्। प्रा॒णमन्ने॑नाप्यायस्व। श्र॒द्धाया॑मपा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्। अ॒पा॒नमन्ने॑नाप्यायस्व। श्र॒द्धायां᳚ व्या॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्। व्या॒नमन्ने॑नाप्यायस्व। श्र॒द्धाया॑मुदा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्। उ॒दा॒नमन्ने॑नाप्यायस्व। श्र॒द्धाया॑ꣳ समा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्। स॒मा॒नमन्ने॑नाप्यायस्व।

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्॥

अवयवस्वस्थताप्रार्थना

वाङ् म आसन्। नसोः प्राणः। अक्ष्योश्चक्षुः। कर्णयोः श्रोत्रम्। बाहुवोर्बलम्। ऊरुवोरोजः। अरिष्टा विश्वान्यङ्गानि तनूः। तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीः॥

वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेऽवबद्धान्॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाऽप्यायस्व॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥

शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्द्धिमनु संतिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः॥

आभिर्गीर्भिर्यदतो न ऊनमाप्याय य हरिवो वर्धमानः। यदा स्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो माहासीत्॥ ॐ शान्तिः शान्तिः शान्तिः॥

उदकशान्तिः

कलशस्थापनश्लोकाः

चतुर्भुजे शुक्लवर्णे दिव्याभरणभूषिते ।
चतुर्दिङ्नागपृष्ठस्थे भूमे त्वां संस्पृशाम्यहम् ॥
इति भूमिं स्पृष्ट्वा

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ।
प्राणिनां जीवनोपायं स्थापयामीष्टसिद्धये ॥
इति धान्यराशिं कृत्वा

देवासुरैर्मथ्यमानादुत्पन्नोऽसि महोदधेः ।
कुम्भ त्वयि सुराः सर्वे तीर्थानि जलदा नदाः ॥

तिष्ठन्ति कालफलदा रुद्रादित्यादयोऽपि च
अतोऽत्र धान्यराशौ त्वां पूजार्थं स्थापयाम्यहम् ॥

गङ्गे च ॰ कावेरि कुम्भेऽस्मिन् सन्निधिं कुरु ॥
इति शुद्धजलेनापूर्य

कस्तूरीकुङ्कुमोपेतं कर्पूरेण च संयुतम् ।
चन्दनं सर्वगन्धाढ्यं कुम्भेऽस्मिन् प्रक्षिपाम्यहम् ॥
इति गन्धं प्रक्षिप्य

(अनुवर्तते)

कलशस्थापनमन्त्राः

तै॰आ॰ १०.२९

आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा आप॑ः प॒शव॒ आपोऽन्न॒मापोऽमृ॑त॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः स्व॒राडाप॒श्छन्दा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑ः स॒त्यमाप॒ः सर्वा॑ दे॒वता॒ आपो॒ भूर्भुव॒ः सुव॒राप॒ ओम्॥

तै॰ब्रा॰ ३.२.४

अ॒पः प्रण॑यति। श्र॒द्धा वा आप॑ः। श्र॒द्धामे॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। य॒ज्ञो वा आप॑ः। य॒ज्ञमे॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। वज्रो॒ वा आप॑ः। वज्र॑मे॒व भ्रातृ॑व्येभ्यः प्र॒हृत्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै र॑क्षो॒घ्नीः। रक्ष॑सा॒मप॑हत्यै। अ॒पः प्रण॑यति। आपो॒ वै दे॒वानां᳚ प्रि॒यं धाम॑। दे॒वाना॑मे॒व प्रि॒यं धाम॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै सर्वा॑ दे॒वताः᳚। दे॒वता॑ ए॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै शा॒न्ताः। शा॒न्ताभि॑रे॒वास्य॒ शुच॑ꣳ शमयति॥

दे॒वो व॑ः सवि॒तोत्पु॑नातु। अच्छि॑द्रेण प॒वित्रे॑ण। वसो॒ः सूर्य॑स्य र॒श्मिभि॑ः॥ स हि रत्ना॑नि दा॒शुषे॑ सु॒वाति॑ सवि॒ता भग॑ः। तं भा॒गं चि॒त्रमी॑महे॥

कूर्चाग्रै राक्षसान् घोरान् छिन्धि कर्म विघातिनः।
त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि॥

वृक्षराजसमुद्भूताः शाखायाः पल्लवत्त्वचः।
युष्मान् कुम्भेष्वर्पयामि सर्वदोषापनुत्तये॥

नालिकेरसमुद्भूत त्रिणेत्र हरसंमत।
शिखया दुरितं सर्वं पापं पीडां च मे नुद॥

नागपाशधरं देवं रत्नौघद्युतिविग्रहम्।
शशाङ्कधवलं ध्यायेद् वरुणं मकरासनम्॥

इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युराच॑के॥
तत्त्वा॑यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदाशा॑स्ते॒ यज॑मानो ह॒विर्भिः॑।
अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑श॒ꣳ स॒मान॒ आयुः॒ प्रमो॑षीः॥

पाशहस्तं च वरुणं यादसामम्भसां पतिं।
आवाहयामि कुम्भेऽस्मिन् देवं मकरवाहनम्॥

वरुणाय नमः। प्रचेतसे नमः। सुरूपिणे नमः। अपां पतये नमः। मकरवाहनाय नमः। जलाधिपतये नमः। पाशहस्ताय नमः।

वेदादयः

(गताः, 1 पृष्ठे द्रष्टव्याः)

रक्षोघ्नम्

तै०सं० १.२.१४

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवा इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः। तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्॥

उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्राꣳ ओषतात् तिग्महेते। यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्॥ ऊर्ध्वो भव प्रति विध्याध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्॥

स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्। विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत्॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः। पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिनाऽसासदिष्टिः॥

अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियङ्गीः। स्वश्वास्त्वा सुरथामर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्॥ इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवाꣳसमनु द्यून्। क्रीडन्तस्त्वा

सु॒मन॑सः सपेमा॒भि द्यु॒म्ना त॑स्थि॒वाꣳसो॒ जना॑नाम्॥ यस्त्वा॒ स्वश्वः॑ सुहि॒र॒ण्यो अ॑ग्न उप॒याति॒ वसु॑मता॒ रथे॑न। तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॒ सखा॒ यस्त॑ आति॒थ्यमा॑नु॒षग्जुजो॑षत्॥

म॒हो रु॑जामि ब॒न्धुता॒ वचो॑भि॒स्तन्मा॑ पि॒तुर्गोत॑मा॒दन्वि॑याय। त्वं नो॑ अ॒स्य वच॑सश्चिकिद्धि होत॑र्यविष्ठ सुक्रतो॒ दमू॑नाः॥ अस्व॑प्रजस्त॒रण॑यः सु॒शेवा॒ अत॑न्द्रासोऽवृ॒का अश्र॑मिष्ठाः। ते पा॒यव॑ः स॒ध्रिय॑ञ्चो नि॒षद्याग्ने॒ तव॑ नः पान्त्वमूर॥ ये पा॒यवो॑ मामते॒यं ते॑ अग्ने॒ पश्य॑न्तो अ॒न्धं दु॑रि॒तादर॑क्षन्। र॒रक्ष॒ तान् सु॒कृतो॑ वि॒श्ववे॑दा॒ दिप्स॑न्त॒ इद्रि॒पवो॒ ना ह॑ देभुः॥

त्वया॑ व॒यꣳ स॑ध॒न्य॑स्त्वोता॒स्तव॒ प्रणी॑त्यश्याम॒ वाजा॑न्। उ॒भा शꣳसा॑ सूदय सत्यतातेऽनुष्ठु॒या कृ॑णुह्यह्रयाण॥ अ॒या ते॑ अग्ने स॒मिधा॑ विधेम॒ प्रति॒ स्तोम॑ꣳ श॒स्यमा॑नं गृभाय। दहा॒शसो॑ र॒क्षस॑ः पा॒ह्य॑स्मान् द्रु॒हो नि॒दो मि॑त्रमहो अव॒द्यात्॥ र॒क्षो॒हणं॑ वा॒जिन॒मा जि॑घर्मि मि॒त्रं प्रथि॑ष्ठमुप॑ यामि॒ शर्म॑। शिशा॑नो अ॒ग्निः क्रतु॑भि॒ः समि॑द्धः स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्त॑म्॥

वि ज्योति॑षा बृह॒ता भा॑त्य॒ग्निरा॒विर्विश्वा॑नि कृणुते महि॒त्वा। प्रादे॑वीर्मा॒याः स॑हते दु॒रेवा॒ः शिशी॑ते॒ शृङ्गे॒ रक्ष॑से वि॒निक्षे॑॥ उ॒त स्वा॒नासो॑ दि॒वि ष॑न्त्व॒ग्नेस्ति॒ग्मायु॑धा॒ रक्ष॑से॒ हन्त॒वा उ॑। [10]

[10] "मदे॑ चिदस्य॒ प्र रु॑जन्ति॒ भामा॒ न व॑रन्ते परि॒बाधो॒ अदे॑वीः"॥ बोधायन आह – "मदे चिदस्य इत्यर्धर्चं अवोद्धृत्य" इति।

इन्द्रं वो विश्वतस्परि

तै॰सं॰ १.६.१२

इन्द्रं᳚ वो वि॒श्वत॒स्परि॒ हवा॑महे॒ जने᳚भ्यः। अ॒स्माक॑मस्तु॒ केव॑लः।
इन्द्रं॒ नरो॑ ने॒मधि॑ता हवन्ते॒ यत्पार्या॑ यु॒नज॑ते॒ धिय॒स्ताः। शूरो॒
नृषा॑ता॒ शव॑सश्चका॒न आ गोम॑ति व्र॒जे भ॑जा॒ त्वं नः॑। इ॒न्द्रि॒याणि॑
शतक्रतो॒ या ते॒ जने॑षु प॒ञ्चसु॑। इन्द्र॒ तानि॑ त॒ आ वृ॑णे। अनु॑ ते
दायि म॒ह इ॑न्द्रि॒याय॑ स॒त्रा ते॒ विश्व॒मनु॑ वृत्र॒हत्ये᳚।

अनु॑ क्ष॒त्रमनु॒ सहो॑ यज॒त्रेन्द्र॑ दे॒वेभि॒रनु॑ ते नृ॒षह्ये᳚। आ यस्मि᳚न्
स॒प्त वा॑स॒वास्तिष्ठ॑न्ति स्वा॒रुहो॑ यथा। ऋषि॑र्ह दीर्घ॒श्रुत्त॑म॒ इन्द्र॑स्य
घ॒र्मो अति॑थिः। आ॒मासु॑ प॒क्वमैर॑य॒ आसूर्य॑ꣳ रोहयो दि॒वि। घ॒र्मं न
सामं᳚ तपता सुवृ॒क्तिभि॒र्जुष्टं॑ गिर्व॑णसे॒ गिरः॑। इन्द्र॒मिद्गा॒थिनो॑
बृ॒हदिन्द्र॑म॒र्केभि॑र॒र्किणः॑। इन्द्रं॒ वाणी॑रनूषत। गाय॑न्ति त्वा
गा॒य॒त्रिणोऽर्च॑न्त्य॒र्कम॒र्किणः॑।

ब्र॒ह्माण॑स्त्वा शतक्रत॒वुद्व॒ꣳ शमि॑व येमिरे। अ॒ꣳहो॒मु॒चे प्र भ॑रेमा
मनी॒षामो॑षिष्ठ॒दाव्ने॑ सु॒म॒तिं गृ॑णा॒नाः। इ॒दमि॑न्द्र॒ प्रति॑ ह॒व्यं गृ॑भाय
स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामाः᳚। वि॒वेष॒ यन्मा॑ धि॒षणा॑ ज॒जान॒
स्तवै᳚ पु॒रा पार्या॒दिन्द्र॒मह्नः॑। अꣳह॑सो॒ यत्र॑ पी॒पर॒द्यथा॑ नो ना॒वेव॒
यान्त॑मु॒भये॑ हवन्ते। प्र स॒म्राजं॑ प्रथ॒मम॑ध्व॒राणा॑मꣳहो॒ मुचं॑ वृष॒भं
य॒ज्ञिया॑नाम्।

अ॒पां नपा॑तमश्विना॒ हय॑न्तम॒स्मिन्न॑र इन्द्रि॒यं ध॑त्त॒मोजः॑। वि न॑
इन्द्र॒ मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः। अ॒ध॒स्प॒दं तमीं᳚ कृधि॒ यो
अ॒स्माꣳ अ॑भि॒दास॑ति। इन्द्र॑ क्ष॒त्रम॒भि वा॒ममोजोऽजा॑यथा वृषभ

चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम्। मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगामा परस्याः।

सृकꣳ सꣳशाय पविमिन्द्र तिग्मं विशत्रून् ताढि वि मृधो नुदस्व। वि शत्रून् वि मृधो नुद वि वृत्रस्य हनू रुज। वि मन्युमिन्द्र भामितोऽमित्रस्याभिदासतः। त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः।

मा ते अस्याꣳ सहसावन् परिष्टावघाय भूम हरिवः परादै। त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम। अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्। ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ। वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः। अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्॥

यत इन्द्र, स्वस्तिदा

तै॰आ॰१०.१

यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः।

महानिन्द्रः, सजोषा

तै॰आ॰१०.१

[11] म॒हाꣳ इन्द्रो॒ वज्र॑बाहुः षोड॒शी शर्म॑ यच्छतु। स्व॒स्ति नो॑ म॒घवा॑ करोतु॒ हन्तु॑ पा॒प्मानं॒ यो॑ऽस्मान् द्वेष्टि॑॥ स॒जोषा॑ इन्द्र॒ सग॑णो म॒रुद्भिः॒ सोमं॑ पिब वृत्रहञ्छूर वि॒द्वान्। ज॒हि [12]शत्रू॒ꣳरप॒ मृधो॑ नुद॒स्वाथाभ॑यं कृणुहि वि॒श्वतो॑ नः॥

ये देवाः पुरःसदः (मूलम्)

तै॰सं॰ १.८.७.१

ये दे॒वाः पु॑र॒ःसदो॒ऽग्निने॑त्रा दक्षिण॒सदो॑ य॒मने॑त्रा पश्चा॒त्सद॑ः सवि॒तृने॑त्रा उत्तर॒सदो॒ वरु॑णनेत्रा उपरि॒षदो॒ बृह॒स्पति॑नेत्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥ अ॒ग्नये॑ रक्षो॒घ्ने स्वाहा॑ य॒माय॑ सवि॒त्रे वरु॑णाय॒ बृह॒स्पत॑ये॒ दुव॑स्वते रक्षो॒घ्ने स्वाहा॑॥

ये देवाः पुरःसदः (सानुषङ्गः)

[13] ये दे॒वाः पु॑र॒ःसदो॒ऽग्निने॑त्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥ ये दे॒वा द॑क्षिण॒सदो॑ य॒मने॑त्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥ ये दे॒वाः पश्चा॒त्सद॑ः सवि॒तृने॑त्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒

---

[11] "म॒हाꣳ॒ इन्द्रो॒" इति पाठान्तरम्

[12] "शत्रू॒ꣳरस॒ मृधो॑" इति पाठान्तरम्

[13] अविभज्य यदि जप्यते, तर्हि "तेभ्य॒ः स्वाहा॒ ये देवा॒ः" इति प्रयोगः

तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥ ये दे॒वा उ॑त्तर॒सदो॒ वरु॑णनेत्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥ ये दे॒वा उ॑परि॒षदो॒ बृह॒स्पति॑नेत्रा रक्षो॒हण॒स्ते न॑ः पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहा॑॥

[14] अ॒ग्नये॑ रक्षो॒घ्ने स्वाहा॑॥ य॒माय॑ रक्षो॒घ्ने स्वाहा॑॥ स॒वि॒त्रे र॑क्षो॒घ्ने स्वाहा॑॥ वरु॑णाय॒ रक्षो॒घ्ने स्वाहा॑॥ बृह॒स्पत॑ये॒ दुव॑स्वते रक्षो॒घ्ने स्वाहा॑॥

अग्निरायुष्मान् (मूलम्)

तै॰सं॰२.३.१०.३

अ॒ग्निरायु॑ष्मा॒न् स वन॒स्पति॑भि॒रायु॑ष्मा॒न् तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॒ सोम॒ आयु॑ष्मा॒न् स ओष॑धीभिर्य॒ज्ञ आयु॑ष्मा॒न् स दक्षि॑णाभि॒र्ब्रह्मायु॑ष्म॒त् तद्ब्रा॑ह्म॒णैरायु॑ष्मद् दे॒वा आयु॑ष्मन्त॒स्ते॑ऽमृते॒नाऽऽयु॑ष्मन्त॒स्तेन॒ त्वाऽऽयु॒षाऽऽयु॑ष्मन्तं करोमि॥

अग्निरायुष्मान् (सानुषङ्गः)

[15] अ॒ग्निरायु॑ष्मा॒न् स वन॒स्पति॑भि॒रायु॑ष्मा॒न् तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॥ सोम॒ आयु॑ष्मा॒न् स ओष॑धीभि॒रायु॑ष्मा॒न् तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॥ य॒ज्ञ आयु॑ष्मा॒न् स दक्षि॑णाभि॒रायु॑ष्मा॒न्

---

[14] "अ॒ग्नये॑ रक्षो॒घ्ने स्वाहा॑ य॒माय॑ रक्षो॒घ्ने स्वाहा॑ सवि॒त्रे र॑क्षो॒घ्ने स्वाहा॒ वरु॑णाय॒ रक्षो॒घ्ने स्वाहा॒ बृह॒स्पत॑ये॒ दुव॑स्वते रक्षो॒घ्ने स्वाहा॑॥"

[15] अविभज्य जप्यमाने, "करोमि॒ सोम॒ आयु॑ष्मा॒न्", "करोमि॒ ब्रह्मायु॑ष्म॒त्" चेति प्रयोगः

तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॥ ब्रह्मायु॑ष्म॒त् तद्ब्रा॑ह्म॒णैरायु॑ष्म॒त् तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॥ दे॒वा आयु॑ष्मन्त॒स्ते॑ऽमृते॒नाऽऽयु॑ष्मन्त॒स्तेन॒ त्वायु॒षायु॑ष्मन्तं करोमि॥

या वामिन्द्रावरुणा (मूलम्)

तै॰सं॰ २.३.१३.१

या वा॑मिन्द्रावरुणा यत॒व्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतं॒ या वा॑मिन्द्रावरुणा सह॒स्या॑ रक्ष॒स्या॑ तेज॒स्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतं॒ यो वा॑मिन्द्रावरुणाव॒ग्नौ स्राम॒स्तं वा॑मे॒तेनाव॑ यजे॒ यो वा॑मिन्द्रावरुणा द्वि॒पात्सु॑ प॒शुषु॒ चतु॑ष्पात्सु गो॒ष्ठे गृ॒हेष्व॒प्स्वोष॑धीषु॒ वन॒स्पति॑षु॒ स्राम॒स्तं वा॑मे॒तेनाव॑ यजे॥

या वामिन्द्रावरुणा (सानुषङ्गः)

[16] या वा॑मिन्द्रावरुणा यत॒व्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतम्॥ या वा॑मिन्द्रावरुणा सह॒स्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतम्॥ या वा॑मिन्द्रावरुणा रक्ष॒स्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतम्॥ या वा॑मिन्द्रावरुणा तेज॒स्या॑ त॒नूस्तये॒ममꣳह॑सो मुञ्चतम्॥

[17] यो वा॑मिन्द्रावरुणाव॒ग्नौ स्राम॒स्तं वा॑मे॒तेनाव॑ यजे॥ यो वा॑मिन्द्रावरुणा द्वि॒पात्सु॑ प॒शुषु॒ स्राम॒स्तं वा॑मे॒तेनाव॑ यजे॥ यो वा॑मिन्द्रावरुणा॒ [18]चतु॑ष्पात्सु॒ स्राम॒स्तं वा॑मे॒तेनाव॑ यजे॥ यो

---

[16] अविभज्य जप्यमाने “मुञ्चतं॒ या वा॑” इति प्रयोगः

[17] अविभज्य जप्यमाने “ए॒तेनाव॑ जये॒ यो वा॑” इति प्रयोगः

[18] “चतु॑ष्पात्सु प॒शुषु॒ स्राम॒स्तं” इति सानुषङ्गपाठः

वांमिन्द्रावरुणा गोष्ठे स्नामस्तं वांमेतेनावं यजे॥ यो वांमिन्द्रावरुणा गृहेषु स्नामस्तं वांमेतेनावं यजे॥ यो वांमिन्द्रावरुणाप्सु स्नामस्तं वांमेतेनावं यजे॥ यो वांमिन्द्रावरुणौषंधीषु स्नामस्तं वांमेतेनावं यजे॥ यो वांमिन्द्रावरुणा वनस्पतिंषु स्नामस्तं वांमेतेनावं यजे॥

आप्यम्

तै॰सं॰ ५.७.४

अग्ने यशस्विन् यशंसेममंर्पयेन्द्रांवतीमपंचितीमिहाऽवंह। अयं मूर्धा पंरमेष्ठी सुवर्चाः समानानांमुत्तमश्लोंको अस्तु॥ भद्रं पश्यंन्त उपं सेदुरग्रे तपों दीक्षामृषंयः सुवर्विदंः। ततंः क्षत्रं बलमोजंश्च जातं तदस्मै देवा अभि सं नंमन्तु॥ धाता विंधाता पंरमोत सन्दृक् प्रजापंतिः परमेष्ठी विराजाः। स्तोमाश्छन्दांᳪसि निविदों म आहुरेतस्मैं राष्ट्रमभि सं नंमाम॥ अभ्यावंर्तध्वमुप मेतं साकमयᳪ शास्ताऽधिंपतिर्वो अस्तु। अस्य विज्ञानमनु सᳪ रंभध्वमिमं पश्चादनुं जीवाथ सर्वे॥

राष्ट्रभृतः (मूलम्)

तै॰सं॰ ३.४.७.१

ऋताषाडृतधांमाऽग्निर्गन्धर्वस्तस्यौषंधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मंक्षत्रं पांतु ता इदं ब्रह्मंक्षत्रं पाँन्तु तस्मै स्वाहा ताभ्यः स्वाहां सᳪहितो विश्वसांमा सूर्यो गन्धर्वस्तस्य मरींचयोऽप्सरसं आयुवंः सुषुम्नः सूर्यरश्मिश्चन्द्रमां गन्धर्वस्तस्य नक्षंत्राण्यप्सरसों बेकुरंयो भुज्युः सुंपर्णो यज्ञो गंन्धर्वस्तस्य दक्षिंणा अप्सरसंस्तवाः प्रजापंतिर्विश्वकंर्मा मनों

गन्धर्वस्तस्यंक्सामान्यंप्सरसो वह्नय इषिरो विश्वव्यंचा वातो गन्धर्वस्तस्यापोँऽप्सरसो मुदा भुवनस्य पते यस्यं त उपरिं गृहा इह चं। स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिम्॥

परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृत्सुवर्वान्पर्जन्यो गन्धर्वस्तस्यं विद्युतोँऽप्सरसो रुचो दूरे हेतिरमृडयो मृत्युर्गन्धर्वस्तस्यं प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गन्धर्वस्तस्याधयोँऽप्सरसः शोचयन्तीर्नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पाँन्तु तस्मै स्वाहा ताभ्यः स्वाहा स नो भुवनस्य पते यस्यं त उपरिं गृहा इह चं। उरुब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहाँ॥

राष्ट्रभृतः (बोधायनीयः)

[19] ऋताषाडृतधामाऽग्निर्गन्धर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहाँ। तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्मक्षत्रं पाँन्तु ताभ्यः स्वाहाँ॥ (स्वाहा सꣳहितो ०)

सꣳहितो विश्वसामा सूर्यो गन्धर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहाँ। तस्य मरीचयोऽप्सरसं आयुवो नाम ता इदं ब्रह्मक्षत्रं पाँन्तु ताभ्यः स्वाहाँ॥ (स्वाहा सुषुम्नः०)

[19] अविभज्य जप्यमाने "तस्मै स्वाहा तस्य" इति प्रयोगः। अन्यत् तत्र तत्र (आवरणेषु) दर्शितम्

सु॒षु॒म्नः सूर्य॑रश्मिश्च॒न्द्रमा॑ गन्ध॒र्वः स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु तस्मै॒ स्वाहा॓। तस्य॒ नक्ष॑त्राण्यप्स॒रसो॑ बे॒कुर॑यो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॓न्तु॒ ताभ्य॒ः स्वाहा॓॥ (स्वाहा॑ भु॒ज्युः॰)

भु॒ज्युः सु॑प॒र्णो य॒ज्ञो ग॑न्ध॒र्वः स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु तस्मै॒ स्वाहा॓। तस्य॒ दक्षि॑णा अप्स॒रस॑स्त॒वा नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॓न्तु॒ ताभ्य॒ः स्वाहा॓॥ (स्वाहा॓ प्र॒जाप॑तिः)

प्र॒जाप॑तिर्वि॒श्वक॑र्मा॒ मनो॑ गन्ध॒र्वः स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु तस्मै॒ स्वाहा॓। तस्य॑र्क्सा॒मान्य॑प्स॒रसो॒ वह्न॑यो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॓न्तु॒ ताभ्य॒ः स्वाहा॓॥ (स्वाहे॑षि॒रो वि॒श्वव्य॑चा॒॰)

इ॒षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वः स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु तस्मै॒ स्वाहा॓। तस्यापो॓ऽप्स॒रसो॑ मु॒दा नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॓न्तु॒ ताभ्य॒ः स्वाहा॓॥ (स्वाहा॒ भुव॑नस्य॰)

भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑। स नो॑ रा॒स्वाज्या॑निꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ संवत्स॒रीणा॑ꣳ स्व॒स्तिꣳ स्वाहा॓॥ (स्वाहा॑ परमे॒ष्ठ्यधि॑पतिर्मृ॒त्युर्ग॑न्ध॒र्वः॰)

प॒र॒मे॒ष्ठ्यधि॑पतिर्मृ॒त्युर्ग॑न्ध॒र्वः स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु तस्मै॒ स्वाहा॓। तस्य॒ विश्व॑मप्स॒रसो॒ भुवो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा॓न्तु॒ ताभ्य॒ः स्वाहा॓॥ (स्वाहा॑ सुक्षि॒तिः॰)

सु॒क्षि॒तिः सुभूंतिर्भ॒द्रकृत्सुर्वर्वान्प॒र्जन्यो॑ गन्ध॒र्वः स इ॒दं ब्रह्मं॑क्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॑। तस्यं॑ वि॒द्युतौ॑ऽप्स॒रसो॒ रुचो॒ नाम॒ ता इ॒दं ब्रह्मं॑क्ष॒त्रं पाँन्तु॒ ताभ्य॒ः स्वाहा॑॥ (ताभ्य॒ः स्वाहा॑ दू॒रे॰)

दू॒रे हेंतिरमृड॒यो मृ॒त्युर्ग॑न्ध॒र्वः स इ॒दं ब्रह्मं॑क्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॑। तस्यं॑ प्र॒जा अं॑प्स॒रसो॑ भी॒रुवो॒ नाम॒ ता इ॒दं ब्रह्मं॑क्ष॒त्रं पाँन्तु॒ ताभ्य॒ः स्वाहा॑॥ (ताभ्य॒ः स्वाहा॒ चारुः॰)

चारुंः कृपणका॒शी कामो॑ गन्ध॒र्वः स इ॒दं ब्रह्मं॑क्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॑। तस्या॒धयौ॑ऽप्स॒रसंः शो॒चयंन्तीर्नाम॒ ता इ॒दं ब्रह्मं॑क्ष॒त्रं पाँन्तु॒ ताभ्य॒ः स्वाहा॑॥ (ताभ्य॒ः स्वाहा॒ स नो॰)

स नो॑ भुवनस्य पते॒ यस्यं॑ त उ॒परिं॑ गृ॒हा इ॒ह चं॑। उ॒रुब्रह्मंणे॒ऽस्मै क्ष॒त्राय॒ महि॒ शर्म॑ यच्छ॒ स्वाहा॑॥

सर्पसूक्तम्

तै॰सं॰ ४.२.८.३

नमो॑ अस्तु स॒र्पेभ्यो॒ ये के च॑ पृथि॒वीमनु॑। ये अ॒न्तरि॑क्षे॒ ये दि॒वि तेभ्यः॑ स॒र्पेभ्यो॒ नमः॑॥ ये॑ऽदो रो॑च॒ने दि॒वो ये वा॒ सूर्य॑स्य र॒श्मिषु॑। येषा॑म॒प्सु सद॑ः कृ॒तं तेभ्यः॑ स॒र्पेभ्यो॒ नमः॑॥ या इषं॑वो यातु॒धाना॑नां॒ ये वा॒ वन॒स्पती॒ꣳ रनु॑। ये वा॑ऽव॒टेषु॒ शेर॑ते॒ तेभ्यः॑ स॒र्पेभ्यो॒ नमः॑॥

पञ्चचोडाः (मूलम्)

तै॰सं॰ ४.४.३.१

अ॒यं पु॒रो हरि॑केश॒ः सूर्य॑रश्मि॒स्तस्य॑ रथगृ॒त्सश्च॒ रथौ॑जाश्च सेनानिग्राम॒ण्यौ॑ पुञ्जिकस्थ॒ला च॑ कृतस्थ॒ला चा॑प्स॒रसौ॑ यातु॒धाना॑

हे॒ती रक्षा॑ꣳसि॒ प्रहे॑तिर॒यं द॑क्षि॒णा वि॒श्वक॑र्मा॒ तस्य॑ रथस्व॒नश्च॒ रथे॑ चित्रश्च सेनानिग्रामण्यौ॑ मेन॒का च॑ सहज॒न्या चा॑प्स॒रसौ॑ द॒ङ्क्ष्णवः॑ प॒शवो॑ हे॒तिः पौरु॑षेयो व॒धः प्रहे॑तिर॒यं प॒श्चाद् वि॒श्वव्य॑चा॒स्तस्य॒ रथ॑प्रोत॒श्चास॑मरथश्च सेनानिग्राम॒ण्यौ॑ प्र॒म्लोच॑न्ती चानु॒म्लोच॑न्ती चाप्स॒रसौ॑ स॒र्पा हे॒तिर्व्या॒घ्राः प्रहे॑तिर॒यमु॑त्त॒रात् संयद्व॑सु॒स्तस्य॑ सेन॒जिच्च॑ सु॒षेण॑श्च सेनानिग्राम॒ण्यौ॑ वि॒श्वाची॑ च घृ॒ताची॑ चाप्स॒रसा॒वापो॑ हे॒तिर्वा॒तः प्रहे॑तिर॒यमु॒पर्य॒र्वाग् व॑सु॒स्तस्य॒ ताक्ष्र्य॑श्चारि॑ष्टनेमिश्च सेनानिग्राम॒ण्या॑वु॒र्वशी॑ च पू॒र्वचि॑त्तिश्चाप्स॒रसौ॑ वि॒द्युद्धे॒तिर॑व॒स्फूर्ज॒न् प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

पञ्चचोडाः (सानुषङ्गः)

[20] अ॒यं पु॒रो हरि॑केश॒ः सूर्य॑रश्मि॒स्तस्य॑ रथगृ॒त्सश्च॒ रथौ॑जाश्च सेनानिग्राम॒ण्यौ॑ पुञ्जिकस्थ॒ला च॑ कृतस्थ॒ला चा॑प्स॒रसौ॑ यातु॒धाना॑ हे॒ती रक्षा॑ꣳसि॒ प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

अ॒यं द॑क्षि॒णा वि॒श्वक॑र्मा॒ तस्य॑ रथस्व॒नश्च॒ रथे॑ चित्रश्च सेनानिग्राम॒ण्यौ॑ मेन॒का च॑ सहज॒न्या चा॑प्स॒रसौ॑ द॒ङ्क्ष्णवः॑ प॒शवो॑ हे॒तिः पौरु॑षेयो व॒धः प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

[20] अविभज्य जप्यमाने “जम्भे॑ दधाम्य॒यम्” इति प्रयोगः

अ॒यं प॒श्चाद् वि॒श्वव्य॑चा॒स्तस्य॒ रथ॑प्रोत॒श्चास॑मरथश्च सेनानिग्रा॒मण्यौ᳚
प्र॒म्लोच॑न्ती चानु॒म्लोच॑न्ती चाप्स॒रसौ॑ स॒र्पा हे॒तिर्व्या॒घ्राः प्रहे॑ति॒स्तेभ्यो॒
नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑
दधामि॥

अ॒यमु॑त्त॒रात् सं॒यद्व॑सु॒स्तस्य॑ सेन॒जिच्च॑ सु॒षेण॑श्च सेनानिग्रा॒मण्यौ॑
वि॒श्वाची॑ च घृ॒ताची॑ चाप्स॒रसा॒वापो॑ हे॒तिर्वात॒ः प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते
नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

अ॒यमु॒पर्य॒र्वाग्व॑सु॒स्तस्य॒ तार्क्ष्य॑श्चारि॑ष्टनेमिश्च सेनानिग्रा॒मण्या॑वु॒र्वशी॑
च पू॒र्वचि॑त्तिश्चाप्स॒रसौ॑ वि॒द्युद्धे॒तिर॑व॒स्फूर्ज॒न् प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते
नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

अप्रतिरथम् (परि०)

तै०सं० ४.६.४

आ॒शुः शिशा॑नो वृष॒भो न यु॒ध्मो घ॑नाघ॒नः क्षोभ॑णश्चर्षणी॒नाम्।
सं॒क्रन्द॑नोऽनिमि॒ष ए॑कवी॒रः श॒तꣳ सेना॑ अजयत् सा॒कमिन्द्र॑ः।
सं॒क्रन्द॑नेनानिमि॒षेण॑ जि॒ष्णुना॑ युत्का॒रेण॑ दुश्च्य॒वनेन॑ धृ॒ष्णुना᳚।
तदिन्द्रे॑ण जयत॒ तत्स॑हध्वं॒ युधो॑ नर॒ इषु॑हस्तेन॒ वृष्णा᳚। स
इषु॑हस्तैः॒ सनि॑ष॒ङ्गिभि॑र्व॒शी सꣳस्र॑ष्टा॒ स यु॒ध इन्द्रो॑ ग॒णेन॑।
स॒ꣳसृ॒ष्ट॒जित् सो॑म॒पा बा॑हुश॒र्ध्यू᳚र्ध्वध॑न्वा॒ प्रति॑हिताभि॒रस्ता᳚।

बृह॑स्पते॒ परि॑ दीया॒ रथे॑न रक्षो॒हाऽमित्रा॑ꣳ अप॒बाध॑मानः। प्र॒भ॒ञ्जन्
सेना᳚ः प्रमृ॒णो यु॒धा यज॑न्न॒स्माक॑मेध्यवि॒ता रथा॑नाम्। गो॒त्र॒भिद॑ं
गो॒विद॒ं वज्र॑बाहुं॒ जय॑न्त॒मज्म॑ प्रमृ॒णन्त॒मोज॑सा। इ॒मꣳ स॑जाता॒

अनु वीरयध्वमिन्द्रं सखायोऽनु सं रंभध्वम्। बलविज्ञायः स्थविंरः प्रवींरः सहंस्वान् वाजी सहंमान उग्रः। अभिवींरो अभिसंत्त्वा सहोजा जैत्रंमिन्द्र रथमा तिंष्ठ गोवित्। अभि गोत्राणि सहंसा गाहंमानोऽदायो वीरः शतमंन्युरिन्द्रंः।

दुश्च्यवनः पृंतनाषाडंयुध्योंऽस्माकं सेनां अवतु प्र युत्सु। इन्द्रं आसां नेता बृहस्पतिर्दक्षिंणा यज्ञः पुर एंतु सोमंः। देवसेनानांमभिभञ्जतीनां जयंन्तीनां मरुतों यन्त्वग्रैं। इन्द्रंस्य वृष्णो वरुंणस्य राज्ञं आदित्यानां मरुतां शर्धं उग्रम्। महामंनसां भुवनच्यवानां घोषों देवानां जयंतामुदंस्थात्। अस्माकमिन्द्रः समृंतेषु ध्वजेष्वस्माकं या इषंवस्ता जंयन्तु।

अस्माकं वीरा उत्तंरे भवन्त्वस्मानुं देवा अवता हवेंषु। उद्धंर्षय मघवन्नायुंधान्युत् सत्त्वंनां मामकानां महांसि। उद् वृंत्रहन् वाजिनां वाजिंनान्युद्रथांनां जयंतामेतु घोषंः। उप प्रेत जयंता नरः स्थिरा वंः सन्तु बाहवंः। इन्द्रों वः शर्म यच्छत्त्वनाधृष्या यथाऽसंथ। अवंसृष्टा परां पत शरंव्ये ब्रह्मंसंशिता।

गच्छामित्रान् प्रविंश मैषां कं चनोच्छिंषः। मर्माणि ते वर्मभिश्छादयामि सोमंस्त्वा राजाऽमृतेंनाभि वंस्ताम्। उरोर्वरींयो वरिंवस्ते अस्तु जयंन्तं त्वामनुं मदन्तु देवाः। यत्रं बाणाः संपतंन्ति कुमारा विंशिखा इंव। इन्द्रों नस्तत्रं वृत्रहा विंश्वाहा शर्मं यच्छतु॥

शं च मे मयश्च मे

तै॰सं॰ ५.४

शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्वं॑ च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सु॒दिनं॑ च मे॥

विहव्यम्

तै॰सं॰ ४.७.१४

ममा᳚ग्ने॒ वर्चो॑ विह॒वेष्व॑स्तु व॒यं त्वेन्धा॑नास्त॒नुवं॑ पुषेम। मह्यं॑ नमन्तां प्र॒दिश॒श्चत॑स्र॒स्त्वया॑ऽध्य॑क्षेण॒ पृत॑ना जयेम॥ मम॑ दे॒वा वि॑ह॒वे स॑न्तु॒ सर्व॒ इन्द्रा॑वन्तो म॒रुतो॒ विष्णु॑र॒ग्निः। ममा॒न्तरि॑क्षमु॒रु गो॒पम॑स्तु॒ मह्यं॒ वातः॑ पवतां॒ कामे॑ अ॒स्मिन्॥ मयि॑ दे॒वा द्रवि॑ण॒मा य॑जन्तां॒ मय्या॒शीर॑स्तु॒ मयि॑ दे॒वहू॑तिः।

दैव्या॒ होता॑रा वनिषन्त॒ पूर्वेऽरि॑ष्टाः स्याम त॒नुवा॑ सु॒वीराः᳚॥ मह्यं॑ यजन्तु॒ मम॒ यानि॑ ह॒व्याऽऽकू॑तिः स॒त्या मन॑सो मे अस्तु। एनो॒ मा नि गां᳚ कत॒मच्च॒नाहं विश्वे॑ देवासो॒ अधि॑ वोचता मे॥ देवीः᳚ षडुर्वीरु॒रुणः॑ कृणोत॒ विश्वे॑ देवास इ॒ह वी॑रयध्वम्। मा हा᳚स्महि प्र॒जया॒ मा त॒नूभि॒र्मा र॑धाम द्विष॒ते सो॑म राजन्॥

अ॒ग्निर्म॒न्युं प्र॑तिनु॒दन् पु॒रस्ता॒दद॑ब्धो गो॒पाः परि॑ पाहि न॒स्त्वम्।
प्र॒त्यञ्चो॑ यन्तु नि॒गुतः॒ पुन॒स्ते॑ऽमैषां॓ चि॒त्तं प्र॒बुधा॒ वि ने॑शत्॥ धा॒ता
धा॑तृ॒णां भुव॑नस्य॒ यस्पति॑र्दे॒वꣳ स॑वि॒तार॑मभिमाति॒षाह॓म्। इ॒मं
य॒ज्ञम॒श्विनो॒भा बृ॒हस्पति॑र्दे॒वाः पा॓न्तु॒ यज॑मानं न्य॒र्थात्॥ उ॒रु॒व्यचा॑
नो महि॒षः शर्म॑ यꣳ सद॒स्मिन् हवे॑ पुरुहू॒तः पु॑रु॒क्षु।

स न॑ः प्र॒जायै॑ हर्यश्व मृ॒डयेन्द्र॒ मा नो॑ रीरिषो॒ मा परा॑ दाः॥ ये
न॑ः स॒पत्ना॒ अप॒ ते भ॑वन्त्विन्द्रा॒ग्निभ्या॒मव॑ बाधामहे॒ तान्। वस॑वो
रु॒द्रा आ॑दि॒त्या उ॑परि॒स्पृश॑ं मो॒ग्रं चेत्ता॑रमधिरा॒जम॑क्रन्॥
अ॒र्वाञ्चमिन्द्र॑म॒मुतो॑ हवामहे॒ यो गो॒जिद्ध॑न॒जिद॑श्व॒जिद्यः। इ॒मं नो॑
य॒ज्ञं वि॑ह॒वे जु॑षस्वा॒स्य कु॑र्मो हरिवो मे॒दिनं॑ त्वा॥

मृगारम्

तै॰सं॰ ४.७.१५

अ॒ग्नेर्म॑न्वे प्रथ॒मस्य॒ प्रचे॑तसो॒ यं पाञ्च॑जन्यं ब॒हव॑ः समि॒न्धते॓।
विश्व॑स्यां वि॒शि प्र॑विविशि॒वाꣳस॑मीमहे॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥
यस्ये॒दं प्रा॒णन्नि॑मि॒षद्यदेज॑ति॒ यस्य॑ जा॒तं जन॑मानं च॒ केव॑लम्।
स्तौम्य॒ग्निं ना॑थि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥ इन्द्र॑स्य मन्ये
प्रथ॒मस्य॒ प्रचे॑तसो वृत्र॒घ्नः स्तोमा॒ उप॒ मामु॒पागु॑ः। यो दा॒शुष॑ः
सु॒कृतो॒ हव॒मुप॒ गन्ता॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥

यः स॑ङ्ग्रा॒मं नय॑ति॒ सं व॒शी यु॒धे यः पु॒ष्टानि॑ सꣳ सृ॒जति॑
त्र॒याणि॑। स्तौमीन्द्र॑ं नाथि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥ म॒न्वे
वां॓ मित्रावरुणा॒ तस्य॑ वित्त॒ꣳ सत्यौ॑जसा दृꣳहणा॒ यं नु॒देथे॓। या

राजा॑नꣳ स॒रथं᳚ या॒थ उ॑ग्रा॒ ता नो॑ मुञ्चत॒माग॑सः॥ यो वा॒ꣳ रथ॑
ऋ॒जुर॑श्मिः स॒त्यध॑र्मा॒ मिथु॒श्चर॑न्तमुप॒याति॑ दू॒षय॑न्।

स्तौमि॑ मि॒त्रावरु॑णा नाथि॒तो जो॑हवीमि॒ तौ नो॑ मुञ्चत॒माग॑सः।
वा॒योः स॑वि॒तुर्वि॒दथा॑नि मन्महे॒ यावा᳚त्म॒न्वद्बि॑भृ॒तो यौ च॒ रक्ष॑तः।
यौ विश्व॑स्य परि॒भू ब॑भू॒वतु॒स्तौ नो॑ मुञ्चत॒माग॑सः॥ उप॒ श्रेष्ठा॑ न
आ॒शिषो॑ दे॒वयो॒र्धर्मे॑ अस्थिरन्। स्तौमि॑ वा॒युꣳ स॑वि॒तारं॑ नाथि॒तो
जो॑हवीमि॒ तौ नो॑ मुञ्चत॒माग॑सः॥ र॒थीत॑मौ र॒थीना॑मह्व ऊ॒तये॒ शुभं॒
गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः॑।

ययो॒र्वां देवौ दे॒वेष्वनि॑शित॒मोज॒स्तौ नो॑ मुञ्चत॒माग॑सः॥ यदया॑तं
वह॒तुꣳ सू॒र्याया᳚स्त्रिच॒क्रेण॑ स॒ꣳ सद॑मि॒च्छमा॑नौ। स्तौमि॑ दे॒वाव॒श्विनौ॑
नाथि॒तो जो॑हवीमि॒ तौ नो॑ मुञ्चत॒माग॑सः॥ म॒रुतां᳚ मन्वे॒ अधि॑ नो
ब्रुवन्तु॒ प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे᳚। आ॒शून्हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑
मुञ्च॒न्त्वेन॑सः॥ ति॒ग्ममायु॑धं वीडि॒तꣳ सह॑स्वद्दि॒व्यꣳ शर्द्धः॒ पृत॑नासु
जि॒ष्णु।

स्तौमि॑ दे॒वान्म॒रुतो॑ नाथि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः॥
दे॒वानां᳚ मन्वे॒ अधि॑ नो ब्रुवन्तु॒ प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे᳚।
आ॒शून्हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑ मुञ्च॒न्त्वेन॑सः॥ यदि॒दं मा॑ऽभि॒शोच॑ति॒
पौरु॑षेयेण॒ दैव्ये॑न। स्तौमि॒ विश्वा᳚न्दे॒वान्ना॑थि॒तो जो॑हवीमि॒ ते नो॑
मुञ्च॒न्त्वेन॑सः॥

(अनु॑ नो॒ऽद्यानु॑मति॒रन्विद॑नुमते॒ त्वं वै᳚श्वान॒रो न ऊ॒त्या पृ॒ष्टो
दि॒वि।)

तै॰सं॰ ३.३.११.३॥ तै॰सं॰ १.५.११.१॥

अनु॑ नो॒ऽद्यानु॑मतिर्य॒ज्ञं दे॒वेषु॑ मन्यताम्। अ॒ग्निश्च॑ हव्य॒वाह॑नो॒ भव॑तां दा॒शुषे॒ मय॑ः॥ अन्विद॑नुमते॒ त्वं मन्या॑सै॒ शं च॑ नः कृधि। क्रत्वे॒ दक्षा॑य नो हिनु॒ प्रण॒ आयू॑ꣳषि तारिषः॥ वै॒श्वा॒न॒रो न॑ ऊ॒त्याऽप्र या॑तु परा॒वत॑ः। अ॒ग्निरु॒क्थेन॒ वाह॑सा॥ पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्यां पृ॒ष्टो विश्वा॒ ओष॑धी॒रा वि॑वेश। वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्त॑ꣳम्॥

ये अप्र॑तेथा॒मम॑ितेभि॒रोजो॑भि॒र्ये प्र॑ति॒ष्ठे अभ॑वतां॒ वसू॑नाम्। स्तौमि॒ द्यावा॑पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मꣳह॑सः॥ उर्वी॑ रोदसी॒ वरि॑वः कृणोत॒ं क्षेत्र॑स्य पत्नी॒ अधि॑ नो ब्रूयातम्। स्तौमि॒ द्यावा॑पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मꣳह॑सः॥ यत्ते॑ व॒यं पु॑रुष॒त्रा य॑वि॒ष्ठा वि॑द्वाꣳसश्चकृ॒मा कच्च॒नाऽग॑ः।

कृधी स्व॑स्मा॑ꣳ अदि॑ते॒रना॑गा॒ व्येना॑ꣳसि शिश्रथो॒ विष्व॑गग्ने॥ यथा॑ ह॒ तद्व॑सवो गौ॒र्य॑ं चित्प॒दि षि॒ताममु॑ञ्चता यजत्राः। ए॒वा त्वम॒स्मत् प्रमु॑ञ्चा॒ व्य॑ꣳ ह॒ः प्राता॑र्यग्ने प्रत॒रां न॒ आयु॑ः॥

सर्पाहुतयः (मूलम्)

तै॰सं॰ ५.५.१०.१

स॒मीची॒ नामा॑सि॒ प्राची॒ दिक्तस्या॑स्ते॒ऽग्निरधि॑पतिरसि॒तो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वा॒ं जम्भे॑ दधाम्योज॒स्विनी॒ नामा॑सि दक्षि॒णा दिक्तस्या॑स्त॒ इन्द्रोऽधि॑पति॒ः पृदा॑कु॒ः प्राची॒ नामा॑सि प्र॒तीची॒ दिक्तस्या॑स्ते॒ सोमोऽधि॑पतिः स्व॒जोऽव॒स्थावा॒ नामा॒स्युदी॑ची॒

दिक्तस्याँस्ते वरुणोऽधिपतिस्तिरश्चराजिरधिपत्नी नामासि बृहती
दिक्तस्याँस्ते बृहस्पतिरधिपतिः श्वित्रो वशिनी नामासीयं
दिक्तस्याँस्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च
गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं
वां जम्भे दधामि॥

सर्पाहुतयः (सानुषङ्गः)

समीची नामासि प्राची दिक्तस्याँस्तेऽग्निरधिपतिरसितो रक्षिता
यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो
यश्च नो द्वेष्टि तं वां जम्भे दधामि॥ (दधाम्योजस्विनी॰)

ओजस्विनी नामासि दक्षिणा दिक्तस्याँस्त इन्द्रोऽधिपतिः पृदाकू
रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं
द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि॥ (दधामि प्राची॰)

प्राची नामासि प्रतीची दिक्तस्याँस्ते सोमोऽधिपतिः स्वजो रक्षिता
यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो
यश्च नो द्वेष्टि तं वां जम्भे दधामि॥ (दधाम्यवस्थावा॰)

अवस्थावा नामास्युदीची दिक्तस्याँस्ते वरुणोऽधिपतिस्तिरश्चराजी
रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं
द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि॥ (दधाम्यधिपत्नी॰)

अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपतिः श्वित्रो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि॥ (दधामि वशिनी॰)

वशिनी नामासीयं दिक्तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि॥

गन्धर्वाहुतयः (मूलम्)

तै॰सं॰ ५.५.१०.३

हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः सलिलो निलिम्पा नाम स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः पश्चाद् गृहाः स्वप्नो व इषवो गह्वरोऽवस्थावानो नाम स्थ तेषां व उत्तराद् गृहा आपो व इषवः समुद्रोऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान् क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

गन्धर्वाहुतयः (सानुषङ्गः)

हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः सलिलो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ (दधामि निलिम्पा॰)

निलिम्पा नाम स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ (दधामि वज्रिणो॰)

वज्रिणो नाम स्थ तेषां वः पश्चाद् गृहाः स्वप्नो व इषवो गह्वरो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ (दधाम्यवस्थावानो॰)

अवस्थावानो नाम स्थ तेषां व उत्तराद् गृहा आपो व इषवः समुद्रो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ (दधाम्यधिपतयो॰)

अधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान् वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ (दधामि क्रव्या॰)

क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

अज्यानयः

तै॰सं॰ ५.७.२.३

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे। शतं यो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषां यो अज्यानिमजीतिमाहवात् तस्मै नो देवाः परि दत्तेह सर्वे॥ ग्रीष्मो

हेमन्त उत नो वसन्तः शरद् वर्षाः सुवितं नो अस्तु। तेषामृतूनाꣳ शतशारदानां निवात एषामभये स्याम॥ इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः। तेषां वयꣳ सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा। स नो मयोभूः पितो आविशस्व शं तोकाय तनुवे स्योनः॥

भूतं भव्यं भविष्यत्

तै॰सं॰७.३.१२

भूतं भव्यं भविष्यद् वषट् स्वाहा नम ऋक्साम यजुर्वषट् स्वाहा नमो गायत्री त्रिष्टुब् जगती वषट् स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट् स्वाहा नमोऽग्निर्वायुः सूर्यो वषट् स्वाहा नमः प्राणो व्यानोऽपानो वषट् स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट् स्वाहा नमः पिता पुत्रः पौत्रो वषट् स्वाहा नमो भूर्भुवः सुवर्वषट् स्वाहा नमः॥

अथर्वशिरसः

तै॰ब्रा॰ १.५.८

इन्द्रो दधीचो अस्थभिः। वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव। इच्छन्नश्वस्य यच्छिरः। पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति। अत्राह गोरमन्वत। नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे। इन्द्रमिद्गाथिनो बृहत्।

इन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत। इन्द्र इद्धर्योः सचा। संमिश्ल आवचो युजा। इन्द्रो वज्री हिरण्ययः। इन्द्रो दीर्घाय

चक्षसे। आसूर्यं रोहयद्दिवि। विगोभिरद्रिमैरयत्। इन्द्र वाजेषु नो अव। सहस्रप्रधनेषु च।

उग्र उग्राभिरूतिभिः। तमिन्द्रं वाजयामसि। महे वृत्राय हन्तवे। स वृषा वृषभो भुवत्। इन्द्रः स दामने कृतः। ओजिष्ठः स बले हितः। द्युम्नी श्लोकी स सौम्यः। गिरा वज्रो न संभृतः। स बलो अनपच्युतः। ववक्षुरुग्रो अस्तृतः॥

प्रत्यङ्गिरसम्

तै०ब्रा० २.४.२

चक्षुषो हेते मनसो हेते। वाचो हेते ब्रह्मणो हेते। यो माऽघायुरभिदासति। तमग्ने मेन्याऽमेनिं कृणु। यो मा चक्षुषा यो मनसा। यो वाचा ब्रह्मणाऽघायुरभिदासति। तयाँऽग्ने त्वं मेन्या। अमुममेनिं कृणु। यत्किञ्चासौ मनसा यच्च वाचा। यज्ञैर्जुहोति यजुषा हविर्भिः।

तन्मृत्युर्निर्ऋत्या संविदानः। पुराऽदिष्टादाहुतीरस्य हन्तु। यातुधाना निर्ऋतिरादु रक्षः। ते अस्य घ्नन्त्वनृतेन सत्यम्। इन्द्रेषिता आज्यमस्य मथ्नन्तु। मा तत्समृद्धि यदसौ करोति। हन्मि तेऽहं कृतं हविः। यो मे घोरमचीकृतः। अपाञ्चौ त उभौ बाहू। अपनह्याम्यास्यम्।

अपनह्यामि ते बाहू। अपनह्याम्यास्यम्। अग्नेर्देवस्य ब्रह्मणा। सर्वं तेऽवधिषं कृतम्। पुराऽमुष्य वषट्कारात्। यज्ञं देवेषु नस्कृधि। स्विष्टमस्माकं भूयात्। माऽस्मान् प्रापन्नरातयः। अन्ति दूरे सतो

अ॑ग्ने। भ्रातृ॑व्यस्याभि॒दास॑तः। व॒ष॒ट्का॒रेण॒ वज्रे॑ण। कृ॒त्या॑ँ ह॑न्मि कृ॒ताम॒हम्। यो मा॒ नक्तं॒ दिवा॑ सा॒यम्। प्रा॒तश्चाह्नो॑ नि॒पीय॑ति। अ॒द्या तमि॑न्द्र॒ वज्रे॑ण। भ्रातृ॑व्यं पादयामसि॥

प्राणो रक्षति

तै॰ब्रा॰ २.५.१

प्रा॒णो र॑क्षति॒ विश्व॒मेज॑त्। इर्यो॑ भू॒त्वा ब॑हु॒धा ब॒हूनि॑। स इत्सर्वं॒ व्या॑नशे॥ यो दे॒वो दे॒वेषु॑ वि॒भू॒र॒न्तः। आवृ॑दू॒दात् क्षेत्रिय॑ध्व॒गद् वृषा॑॑। तमित्प्रा॒णं म॒न॒सोप॑शिक्षत। अग्रं॑ दे॒वाना॑मि॒दम॑त्तु नो ह॒विः॥ मन॑स॒श्चित्ते॒दम्। भू॒तं भव्यं॑ च गुप्यते। तद्धि दे॒वेष्व॑ग्रि॒यम्॥

आ न॑ एतु पुरश्च॒रम्। स॒ह दे॒वैरि॒म॑ँ हव॑म्। मन॒ः श्रेय॑सि श्रेयसि। कर्म॑न् य॒ज्ञप॑ति॒ं दध॑त्॥ जु॒षता॑ं मे॒ वागि॒द॑ँ ह॒विः। वि॒राड्दे॒वी पु॒रोहि॑ता। ह॒व्य॒वाडन॑पायिनी॥ यया॑ रू॒पाणि॑ बहु॒धा वद॑न्ति। पेशा॑ँसि दे॒वाः प॑र॒मे ज॒नित्रे॑॑। सा नो॑ वि॒राडन॑पस्फुरन्ति।

वाग्दे॒वी जु॑षतामि॒द॑ँ ह॒विः॥ चक्षु॑र्दे॒वाना॒ं ज्योति॑र॒मृते॒ न्य॑क्तम्। अ॒स्य वि॒ज्ञाना॑य बहु॒धा निधी॑यते। तस्य॑ सु॒म्नम॑शीमहि॥ मा नो॑ हासीद्विचक्ष॒णम्। आयु॒रिन्न॒ः प्रती॑॑र्यताम्। अन॑न्धाश्चक्षु॑षा व॒यम्। जी॒वा ज्योति॑रशीमहि। सु॒व॒र्ज्योति॑रु॒तामृत॑॑म्॥ श्रोत्रे॑ण भ॒द्रमु॒त शृ॑ण्वन्ति स॒त्यम्। श्रोत्रे॑ण॒ वाचं॑ बहु॒धोद्यमा॑नाम्। श्रोत्रे॑ण॒ मोद॑श्च॒ मह॑श्च श्रूयते। श्रोत्रे॑ण॒ सर्वा॒ दिश॒ आशृ॑णोमि॥ येन॒ प्राच्या॑ उ॒त द॑क्षि॒णा। प्र॒तीच्यै॑ दि॒शः शृ॒ण्वन्त्यु॑त्त॒रात्। तदिच्छ्रोत्रं॑ बहु॒धोद्यमा॑नम्। अ॒रान्न ने॒मिः परि॒सर्वं॑ बभूव॥

सिंहे व्याघ्र उत

बोधायनोक्तकूष्माण्डहोमे चतुर्णां विनियोगः

तै॰ब्रा॰ २.७.७

सि॒ꣳहे व्या॒घ्र उ॒त या पृदा॑कौ। त्विषि॑र॒ग्नौ ब्रा॑ह्म॒णे सूर्ये॒ या। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना॥१॥ या रा॑ज॒न्ये॑ दुन्दु॒भावाय॑तायाम्। अश्व॑स्य॒ क्रन्द्ये॒ पुरु॑षस्य मा॒यौ। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना॥२॥ या ह॒स्तिनि॑ द्वी॒पिनि॒ या हिर॑ण्ये। त्विषि॒रश्वे॑षु॒ पुरु॑षेषु॒ गोषु॑। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना॥३॥ रथे॑ अ॒क्षेषु॑ वृष॒भस्य॒ वाजे॑। वाते॑ प॒र्जन्ये॒ वरु॑णस्य॒ शुष्मे॑।

इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना॥४॥ राड॑सि वि॒राड॑सि। स॒म्राड॑सि स्व॒राड॑सि। इन्द्रा॑य त्वा॒ तेज॑स्वते॒ तेज॑स्वन्तꣳ श्रीणामि। इन्द्रा॑य॒ त्वौज॑स्वत॒ ओज॑स्वन्तꣳ श्रीणामि।

इन्द्रा॑य त्वा॒ पय॑स्वते॒ पय॑स्वन्तꣳ श्रीणामि। इन्द्रा॑य॒ त्वाऽऽयु॑ष्मत॒ आयु॑ष्मन्तꣳ श्रीणामि। तेजो॑ऽसि। तत्ते॒ प्रय॑च्छामि। तेज॑स्वदस्तु मे॒ मुख॑म्। तेज॑स्व॒च्छिरो॑ अस्तु मे। तेज॑स्वान् वि॒श्वतः॑ प्र॒त्यङ्। तेज॑सा॒ संपि॑पृग्धि मा। ओजो॑ऽसि। तत्ते॒ प्रय॑च्छामि।

ओज॑स्वदस्तु मे॒ मुख॑म्। ओज॑स्व॒च्छिरो॑ अस्तु मे। ओज॑स्वान् वि॒श्वतः॑ प्र॒त्यङ्। ओज॑सा॒ संपि॑पृग्धि मा। पयो॑ऽसि। तत्ते॒ प्रय॑च्छामि। पय॑स्वदस्तु मे॒ मुख॑म्। पय॑स्व॒च्छिरो॑ अस्तु मे। पय॑स्वान् वि॒श्वतः॑ प्र॒त्यङ्। पय॑सा॒ संपि॑पृग्धि मा।

आयु॑रसि। तत्ते॒ प्रय॑च्छामि। आयु॑ष्मदस्तु मे॒ मुख॒॑म्।
आयु॑ष्म॒च्छिरो॑ अस्तु मे। आयु॑ष्मान् वि॒श्वत॑ः प्र॒त्यङ्। आयु॑षा॒
संपि॑पृग्धि मा। इ॒मम॑ग्न॒ आयु॑षे॒ वर्च॑से कृधि। प्रि॒यꣳ रेतो॑ वरुण
सोम राजन्। मा॒तेवा॒॑स्मा अदिते॒ शर्म॑ यच्छ। विश्वे॑देवा॒
जर॑दष्टि॒र्यथा स॑त्।

आयु॑रसि वि॒श्वायु॑रसि। स॒र्वायु॑रसि॒ सर्व॒मायु॑रसि। यतो॒ वातो॒
मनो॑जवाः। यत॒ः क्षर॑न्ति॒ सिन्ध॑वः। तासा॒॑ं त्वा॒ सर्वा॑साꣳ रु॒चा।
अ॒भिषि॑ञ्चामि॒ वर्च॑सा। स॒मु॒द्र इ॑वासि ग॒ह्मना॒॑। सोम॑
इवा॒स्यदा॒॑भ्यः। अ॒ग्निरि॑व वि॒श्वत॑ः प्र॒त्यङ्। सूर्य॑ इव॒ ज्योति॑षा
वि॒भूः।

अ॒पां यो द्रव॑णे॒ रस॑ः। तम॒हम॒स्मा आ॑मुष्याय॒णाय॑। ❀ [21] तेज॑से
ब्रह्मवर्च॒साय॑ गृह्णामि। अ॒पां य ऊ॒र्मौ रस॑ः। तम॒हम॒स्मा
आ॑मुष्याय॒णाय॑। ❀ ओज॑से वी॒र्या॑य गृह्णामि। अ॒पां यो म॑ध्य॒तो
रस॑ः। तम॒हम॒स्मा आ॑मुष्याय॒णाय॑। ❀ पुष्ट्यै॒॑ प्र॒जन॑नाय गृह्णामि।
अ॒पां यो य॒ज्ञियो॒ रस॑ः। तम॒हम॒स्मा आ॑मुष्याय॒णाय॑। ❀ आयु॑षे
दीर्घायु॒त्वाय॑ गृह्णामि॥

---

[21] ❀ चिह्नायां – "तम॒हं अमुकशर्मणे अमुकगोत्राय सहकुटुम्बाय (बालकाय)" इत्येकेषामधिकपाठः।

अहमस्मि प्रथमजा

तै॰ब्रा॰ २.८.८

अ॒हम॑स्मि प्रथम॒जा ऋ॒तस्य॑। पूर्वं॑ दे॒वेभ्यो॑ अ॒मृत॑स्य॒ नाभि॑ः। यो मा॒ ददा॑ति॒ स इदे॒व माऽऽवा᳚ः। अ॒हमन्न॒मन्न॑म॒दन्त॑मद्मि। पूर्व॑म॒ग्नेरपि॑ दह॒त्यन्न᳚म्। य॒त्तौ हा॑ऽऽसाते अहमु॒त्त॒रेषु॑। व्यात्त॑मस्य प॒शव॑ः सु॒जम्भ᳚म्। पश्य॑न्ति॒ धीरा॒ः प्रच॑रन्ति॒ पाका᳚ः। जहा᳚म्य॒न्यं न ज॑हाम्य॒न्यम्। अ॒हमन्नं॒ वश॒मिच्च॑रामि।

स॒मा॒नमर्थं॒ पर्ये॑मि भु॒ञ्जत्। को मामन्नं॑ मनु॒ष्यो॑ दयेत। परा॑के॒ अन्नं॒ निहि॑तं लो॒क ए॒तत्। विश्वै᳚र्दे॒वैः पि॒तृभि॑र्गु॒प्तमन्न᳚म्। यद॒द्यते॑ लु॒प्यते॒ यत्प॑रो॒प्यते᳚। श॒त॒त॒मी सा त॒नूर्मे॑ बभूव। म॒हान्तौ॑ च॒रू स॑कृद् दु॒ग्धेन॑ पप्रौ। दिवं॑ च॒ पृश्नि॑ पृथि॒वीं च॑ सा॒कम्। तत्सं॒पिब॑न्तो॒ न मि॑नन्ति वे॒धस॑ः। नैतद्भूयो॒ भव॑ति॒ नो कनी॑यः।

अन्नं॑ प्रा॒णमन्न॑मपा॒नमा॑हुः। अन्नं॑ मृ॒त्युं तमु॑ जी॒वातु॑माहुः। अन्नं॑ ब्र॒ह्माणो॑ ज॒रसं॑ वदन्ति। अन्न॑माहुः प्र॒जन॑नं प्र॒जाना᳚म्। मोघ॒मन्नं॑ विन्दते॒ अप्र॑चेताः। स॒त्यं ब्र॑वीमि व॒ध इत्स तस्य॑। नार्य॒मणं॒ पुष्य॑ति॒ नो सखा॑यम्। केव॑लाघो भवति केवला॒दी। अ॒हं मे॒घः स्त॒नय॒न् वर्ष॑न्नस्मि। माम॑दन्त्य॒हम॑द्म्य॒न्यान्। अ॒हꣳ सद॒मृतो॑ भवामि। मदा॑दि॒त्या अधि॒ सर्वे॑ तपन्ति।

वाक्सूक्तम्

ब्रा २.४.६.२९

[22] दे॒वीं वाच॑मजनयन्त दे॒वाः। तां वि॒श्वरू॑पाः प॒शवो॑ वदन्ति। सा नो॑ म॒न्द्रेष॒मूर्जं॒ दुहा॑ना। धे॒नुर्वाग॒स्मानुप॒ सुष्टु॒तैतु॑॥ यद्वाग् वद॑न्त्यविचेत॒नानि॑। राष्ट्री॑ दे॒वानां॑ निष॒साद॑ म॒न्द्रा। चत॑स्र॒ ऊर्जं॑ दुदु॒हे पया॑ꣳसि। क्व॑ स्विदस्याः पर॒मं ज॑गाम॥

अ॒न॒न्तामन्ता॒दधि॒ निर्मि॑तां म॒हीम्। यस्यां॑ दे॒वा अ॑दधु॒र्भोज॑नानि। एका॑क्षरां द्वि॒पदा॒ꣳ षट्प॑दां च। वाचं॑ दे॒वा उप॑जीवन्ति॒ विश्वे॑॥ वाचं॑ दे॒वा उप॑जीवन्ति॒ विश्वे॑। वाचं॑ गन्ध॒र्वाः प॒शवो॑ मनु॒ष्याः॑। वा॒चीमा विश्वा॒ भुव॑ना॒न्यर्पि॑ता। सा नो॒ हवं॑ जुषता॒मिन्द्र॑पत्नी। वाग॒क्षरं॑ प्रथम॒जा ऋ॒तस्य॑। वेदा॑नां मा॒ताऽमृत॑स्य॒ नाभिः॑।

सा नो॑ जुषा॒णोप॑ य॒ज्ञमागा॑त्। अव॑न्ती दे॒वी सु॒हवा॑ मे अस्तु। यामृष॑यो मन्त्र॒कृतो॑ मनी॒षिणः॑। अ॒न्वैच्छ॑न् दे॒वास्तप॑सा॒ श्रमे॑ण। तां दे॒वीं वाच॑ꣳ ह॒विषा॑ यजामहे। सा नो॑ दधातु सुकृ॒तस्य॑ लो॒के। च॒त्वारि॒ वाक् परि॑मिता प॒दानि॑। तानि॑ विदुर्ब्राह्म॒णा ये म॑नी॒षिणः॑। गुहा॒ त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति। तु॒रीयं॑ वा॒चो म॑नु॒ष्या॑ वदन्ति॥

श्रद्धासूक्तम्

तै॰ब्रा॰ २.८.८

श्र॒द्धया॒ऽग्निः समि॑ध्यते। श्र॒द्धया॑ विन्दते ह॒विः। श्र॒द्धां भग॑स्य मू॒र्धनि॑। वच॒साऽऽवे॑दयामसि। प्रि॒यꣳ श्र॑द्धे॒ दद॑तः। प्रि॒यꣳ श्र॑द्धे॒

---

[22] दे॒वीं वाच॑मजनयन्त॒ यद्वाग्वद॑न्ती॥

दिदासतः। प्रियं भोजेषु यज्वसु। इदं म उदितं कृधि। यथा देवा असुरेषु। श्रद्धामुग्रेषु चक्रिरे।

एवं भोजेषु यज्वसु। अस्माकमुदितं कृधि। श्रद्धां देवा यजमानाः। वायुगोपा उपासते। श्रद्धाॱ हृदय्ययाऽऽकूत्या। श्रद्धया हूयते हविः। श्रद्धां प्रातर्हवामहे। श्रद्धां मध्यंदिनं परि। श्रद्धाॱ सूर्यस्य निम्रुचि। श्रद्धे श्रद्धापयेह मा।

श्रद्धा देवानधिवस्ते। श्रद्धा विश्वमिदं जगत्। श्रद्धां कामस्य मातरम्। हविषा वर्धयामसि॥

ब्रह्मसूक्तम्

तै०ब्रा० २.८.८

ब्रह्म जज्ञानं प्रथमं पुरस्तात्। वि सीमतः सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठाः। सतश्च योनिमसतश्च विवः। पिता विराजामृषभो रयीणाम्। अन्तरिक्षं विश्वरूप आविवेश।

तमर्कैरभ्यर्चन्ति वत्सम्। ब्रह्म सन्तं ब्रह्मणा वर्धयन्तः। ब्रह्म देवानजनयत्। ब्रह्म विश्वमिदं जगत्। ब्रह्मणः क्षत्रं निर्मितम्। ब्रह्म ब्राह्मण आत्मना। अन्तरस्मिन्निमे लोकाः। अन्तर्विश्वमिदं जगत्। ब्रह्मैव भूतानां ज्येष्ठम्। तेन कोऽर्हति स्पर्धितुम्। ब्रह्मन् देवास्त्रयस्त्रिंॱशत्। ब्रह्मन्निन्द्रप्रजापती। ब्रह्मन् ह विश्वा भूतानि। नावीवान्तः समाहिता। चतस्र आशाः प्रचरन्त्वग्नयः। इमं नो यज्ञं नयतु प्रजानन्। घृतं पिन्वन्नजरॱ सुवीरम्। ब्रह्म समिद्भवत्याहुतीनाम्॥

गोसूक्तम्

तै॰ब्रा॰ २.८.८

आ गावो॑ अग्मन्नु॒त भ॒द्रम॑क्रन्। सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे। प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्युः। इन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः। इन्द्रो॒ यज्व॑ने पृण॒ते च॑ शिक्षति। उपेद्द॑दाति॒ न स्वं मु॑षायति। भूयो॑ भूयो र॒यिमिद॑स्य व॒र्धय॑न्। अभि॑न्ने खि॒ल्ले निद॑धाति देव॒युम्।

तै॰ब्रा॰ २.४.६.९

[23] न ता न॑शन्ति॒ न द॑भाति॒ तस्क॑रः। नैना॑ अमि॒त्रो व्यथि॒राद॑धर्षति। दे॒वाꣳश्च॒ याभि॒र्यज॑ते॒ ददा॑ति च। ज्योगित्ताभि॑ः सचते॒ गोप॑तिः स॒ह॥ न ता अर्वा॑ रे॒णुक॑काटो अश्नुते। न स॑ꣳस्कृतत्रमुप॑यन्ति॒ ता अ॒भि। उ॒रु॒गा॒यमभ॑य॒न्तस्य॒ ता अनु॑। गावो॒ मर्त्य॑स्य॒ विच॑रन्ति॒ यज्व॑नः॥

गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अच्छा॒त्। गाव॒ः सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः। इ॒मा या गाव॒ः स ज॑नास॒ इन्द्र॑ः। इ॒च्छामीद्धृ॒दा मन॑सा चि॒दिन्द्र॒॑म्। यू॒यं गा॑वो मेदयथा कृ॒शं चि॑त्। अ॒श्ली॒लं चि॑त्कृणुथा सु॒प्रती॑कम्।

भ॒द्रं गृ॒हं कृ॑णुथ भद्रवाचः। बृ॒हद्वो॒ वय॑ उच्यते स॒भासु॑। प्र॒जाव॑तीः सू॒यव॑सꣳ रि॒शन्ती॒ः। शु॒द्धा अ॒पः सु॑प्रपा॒णे पिब॑न्तीः। मा व॑ः स्ते॒न ई॑शत॒ माघश॑ꣳसः। परि॑ वो हे॒ती रु॒द्रस्य॑ वृज्यात्।

---

[23] न ता न॑शन्ति॒ न ता अर्वा॒॑।

उपे॒दमु॑प॒पर्च॑नम्। आ॒सु गोषूप॑ पृच्यताम्। उप॑र्ष॒भस्य॒ रेत॑सि। उपै॑न्द्र॒ तव॑ वी॒र्ये॑॥

ता सूर्या चन्द्रमसा

तै॰ब्रा॰ २.८.९

ता सूँ॑र्याचन्द्र॒मसा॑ विश्व॒भृत्त॑मा म॒हत्। तेजो॒ वसु॑मद्राजतो दि॒वि। सामाँ॑त्माना चरतः सामचा॒रिणाँ॑। ययौँ॑र्व्र॒तं न म॒मे जातु॑ दे॒वयौँः। उ॒भावन्तौ॒ परि॑यात॒ अम्र्या॑। दि॒वो न र॒श्मीँ॑स्त॑नु॒तो व्य॑र्ण॒वे। उ॒भा भु॑व॒न्ती भुव॑ना क॒विक्र॑तू। सूर्या॒ न च॒न्द्रा च॑रतो ह॒ताम॑ती। पतीँ॑ द्यु॒मद्वि॑श्व॒विदा॑ उ॒भा दि॒वः। सूर्या॑ उ॒भा च॒न्द्रम॑सा विचक्ष॒णा।

वि॒श्ववा॑रा वरिवो॒भा वरे॑ण्या। ता नो॑ऽवतं मति॒मन्ता॒ महि॑व्रता। वि॒श्व॒वप॑री प्र॒तर॑णा तर॒न्ता। सु॒व॒र्विदा॑ दृ॒शये॒ भूरि॑रश्मी। सूर्या॒ हि च॒न्द्रा वसु॑ त्वे॒षद॑र्शता। म॒न॒स्विनो॒भाऽनु॑चर॒तो नु॒ सं दिव॑म्। अ॒स्य श्रवो॑ न॒द्यः॑ स॒प्त बि॑भ्रति। द्यावा॒ क्षामा॑ पृथि॒वी द॑र्श॒तं वपुः॑। अ॒स्मे सूँ॑र्याचन्द्र॒मसा॑ऽभि॒चक्षेँ॑। श्र॒द्धे कमि॑न्द्र चरतो विचर्तु॒रम्।

पू॒र्वा॒प॒रं च॑रतो मा॒ययै॒तौ। शिशू॒ क्रीड॑न्तौ॒ परि॑यातो अध्व॒रम्। विश्वाँ॒न्य॒न्यो भुव॑नाऽभि॒चष्टेँ॑। ऋ॒तून॒न्यो वि॒दध॑ज्जायते॒ पुनः॑।

[24] हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्विन्द्रः॑। अ॒ग्निं या गर्भं॑ दधि॒रे विरू॑पास्ता न॒ आप॒ः शङ्स्यो॒ना भ॑वन्तु॥ यासा॒ँ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्य॒न् जना॑नाम्।

---

[24] हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासा॒ँ राजाँ॑। यासा॑ दे॒वाः शि॒वेन॑ मा॒ चक्षु॑षा पश्यत। आपो॑ भ॒द्रा आदित्प॑श्यामि॥

म॒धु॒श्चुत॒ः शुच॑यो॒ याः पा॑व॒कास्ता न॒ आप॒ः शग्ग्ं स्यो॒ना भ॑वन्तु॥
यासा॑ग्ं दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा भव॑न्ति।
याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ शु॒क्रास्ता न॒ आप॒ः शग्ग्ं स्यो॒ना भ॑वन्तु॥
शि॒वेन॑ मा॒ चक्षु॑षा पश्यताऽऽपः शि॒वया॑ त॒नुवोप॑ स्पृशत॒ त्वच॑ं मे।
सर्वा॑ꣳ अ॒ग्नीꣳर॑प्सु॒षदो॑ हुवो वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ नि ध॑त्त॥

आपो॑ भ॒द्रा घृ॒तमिदाप॑ आसुर॒ग्नीषोमौ॑ बिभ्र॒त्याप॒ इत्ताः। ती॒व्रो रसो॑ मधु॒पृचा॑मरङ्ग॒म आ मा॑ प्रा॒णेन॑ स॒ह वर्च॑सा गन्॥ आदित् प॑श्याम्यु॒त वा॑ शृणो॒म्यामा॒ घोषो॑ गच्छति॒ वाङ् न॑ आसाम्। मन्ये॑ भेजा॒नो अ॒मृत॑स्य॒ तर्हि॒ हिर॑ण्यवर्णा॒ अतृ॑पं य॒दा व॑ः॥

नासदीयसूक्तम्

तै०ब्रा० २.८.९

नास॑दासी॒न्नो सदा॑सीत्त॒दानी॑म्। नासी॒द्रजो॒ नो व्यो॑मापरो यत्।
किमाव॑रीव॒ः कुह॒ कस्य॒ शर्म॑न्। अम्भ॒ः किमा॑सी॒द्गह॑नं गभी॒रम्।

न मृ॒त्युर॒मृत॑ं तर्हि॒ न। रात्रि॑या॒ अह्न॑ आसीत् प्रके॒तः।
आनी॑दवा॒तग्ग्ं स्व॒धया॒ तदेक॑म्। तस्मा॑द्धा॒न्यं न प॒रः किञ्च॒ नास॑।
तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॑ प्रके॒तम्। स॒लि॒लꣳ सर्व॑मा इ॒दम्।
तु॒च्छेना॒भ्वपि॑हित॒ं यदासी॑त्। तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैक॑म्।
काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑। मन॑सो॒ रेत॑ः प्रथ॒मं यदासी॑त्।

स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्। हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।
ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्। अ॒धस्वि॑दा॒सी३दु॒परि॑ स्विदासी३॒त्।
रे॒तो॒धा आ॑सन्महि॒मान॑ आसन्। स्व॒धा अ॒वस्ता॒त् प्रय॑तिः

प॒रस्ता᳚त्। को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत्। कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः। अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय। अथा॒ को वे॑द॒ यत॑ आ ब॒भूव॑।

इ॒यं विसृ॑ष्टि॒र्यत॑ आ ब॒भूव॑। यदि॑ वा द॒धे यदि॑ वा॒ न। यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्। सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑॥
किꣳस्वि॒द्वनं॒ क उ॒ स वृ॒क्ष आ॑सीत्। यतो॒ द्यावा॑पृथि॒वी निं॑ष्टत॒क्षुः। मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तत्। यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रय॑न्। ब्रह्म॒ वनं॒ ब्रह्म॒ स वृ॒क्ष आ॑सीत्। यतो॒ द्यावा॑पृथि॒वी निं॑ष्टत॒क्षुः।

मनी॑षिणो॒ मन॑सा॒ विब्र॑वीमि वः। ब्रह्मा॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रय॑न्॥

भाग्यसूक्तम्

तै॰ब्रा॰ २.८.९

प्रा॒त॒र॒ग्निं प्रा॒त॒रिन्द्र॑ꣳ हवामहे। प्रा॒त॒र्मि॒त्रावरु॑णा प्रा॒त॒र॒श्विना᳚। प्रा॒तर्भगं॑ पू॒षणं॒ ब्रह्म॑ण॒स्पति᳚म्। प्रा॒तः सोम॑मु॒त रु॒द्रꣳ हु॑वेम। प्रा॒त॒र्जि॒तं॒ भग॑मु॒ग्रꣳ हु॑वेम। व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता। आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॑त्। राजा॑चि॒द्यं भगं॑ भ॒क्षीत्याह॑। भग॒ प्रणे॑त॒र्भग॒ सत्य॑राधः। भगे॒मां धिय॒मुद॑व॒ दद॑न्नः।

भग॒ प्र णो॑ जनय॒ गोभि॒रश्वैः॑। भग॒ प्रनृभि॑र्नृ॒वन्तः॑ स्याम। उ॒तेदानीं॒ भग॑वन्तः स्याम। उ॒त प्रपि॒त्व उ॒त मध्ये॒ अह्ना᳚म्। उ॒तोदि॑ता मघव॒न् सूर्य॑स्य। व॒यं दे॒वानाꣳ॑ सुम॒तौ स्या॑म। भग॑ ए॒व भग॑वाꣳ अस्तु देवाः। तेन॑ व॒यं भग॑वन्तः स्याम।

तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। समध्वरायोषसो नमन्त। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। रथमिवाश्वा वाजिन आवहन्तु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीः सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनाः। यूयं पातः स्वस्तिभिः सदा नः॥

नक्षत्रसूक्तम्

तै॰ब्रा॰ ३.१.१

अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्। इदमासां विचक्षणम्। हविरासञ्जुहोतन। यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा। स कृत्तिकाभिरभिसंवसानः। अग्निर्नो देवः सुविते दधातु॥ (अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा। अम्बायै स्वाहा दुलायै स्वाहा। नितत्न्यै स्वाहाऽभ्रयन्त्यै स्वाहा। मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा। चुपुणीकायै स्वाहा॥)

प्रजापते रोहिणी वेतु पत्नी। विश्वरूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदः सवीराः। रोहिणी देव्युदगात् पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिꣳ हविषा वर्धयन्ती। प्रिया देवानामुपयातु यज्ञम्॥ (प्रजापतये स्वाहा रोहिण्यै स्वाहा। रोचमानायै स्वाहा प्रजाभ्यः स्वाहा॥)

सोमो राजा मृगशीर्षेण आगन्। शिवं नक्षत्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु। यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियꣳ राजन् प्रियतमं प्रियाणाम्। तस्मै ते सोम हविषा विधेम। शं न एधि द्विपदे शं चतुष्पदे॥ (सोमाय

स्वाहा॑ मृगशी॒र्षाय॒ स्वाहा᳚। इ॒न्व॒काभ्य॒ः स्वाहौष॑धीभ्य॒ः स्वाहा᳚। रा॒ज्याय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚॥)

आ॒र्द्रया॑ रु॒द्रः प्रथ॑मान एति। श्रेष्ठो॑ दे॒वानां॒ पति॑रघ्नि॒याना᳚म्। नक्ष॑त्रमस्य ह॒विषा॑ विधेम। मा नः॑ प्र॒जाꣳ री॑रिष॒न्मोत वी॒रान्। हे॒ती रु॒द्रस्य॒ परि॑णो वृणक्तु। आ॒र्द्रा नक्ष॑त्रं जुषताꣳ ह॒विर्नः॑। प्र॒मु॒ञ्चमा॑नौ दु॒रि॒ता॒नि॒ विश्वा᳚। अपा॒घश॑ꣳसं नुदता॒मरा॑तिम्॥ (रु॒द्राय॒ स्वाहा॒ऽऽर्द्रायै॒ स्वाहा᳚। पिन्व॑मानायै॒ स्वाहा॑ प॒शुभ्य॒ः स्वाहा᳚॥)

पुन॑र्नो दे॒व्यदि॑तिस्पृणोतु। पुन॑र्वसू न॒ः पुन॒रेता᳚ं य॒ज्ञम्। पुन॑र्नो दे॒वा अ॒भिय॑न्तु॒ सर्वे᳚। पुन॑ः पुनर्वो ह॒विषा॑ यजामः। ए॒वा न दे॒व्यदि॑तिरन॒र्वा। विश्व॑स्य भ॒र्त्री जग॑तः प्रति॒ष्ठा। पुन॑र्वसू ह॒विषा॑ व॒र्धय॑न्ती। प्रि॒यं दे॒वाना॒मप्ये॑तु॒ पाथ॑ः॥ (अदि॑त्यै॒ स्वाहा॒ पुन॑र्वसुभ्याम्। स्वाहाऽऽभू᳚त्यै॒ स्वाहा॒ प्रजा᳚त्यै॒ स्वाहा᳚॥)

बृ॒ह॒स्पति॑ः प्रथ॒मं जाय॑मानः। ति॒ष्यं॑ नक्ष॑त्रम॒भि सं ब॑भूव। श्रेष्ठो॑ दे॒वानां॒ पृत॑नासु जि॒ष्णुः। दिशोऽनु॒ सर्वा॒ अभ॑यं नो अस्तु। ति॒ष्य॑ः पु॒रस्ता॑दु॒त म॑ध्य॒तो न॑ः। बृह॒स्पति॑र्न॒ः परि॑पातु प॒श्चात्। बाधे॑ता॒ं द्वेषो॒ अभ॑यं कृणुताम्। सु॒वीर्य॑स्य॒ पत॑यः स्याम॥ (बृह॒स्पत॑ये॒ स्वाहा॑ ति॒ष्या॑य॒ स्वाहा᳚। ब्र॒ह्म॒व॒र्च॒साय॒ स्वाहा᳚॥)

इ॒दꣳ स॒र्पेभ्यो॑ ह॒विर॑स्तु॒ जुष्ट᳚म्। आ॒श्रे॒षा येषा॑मनु॒यन्ति॒ चेत॑ः। ये अ॒न्तरि॑क्षं पृथि॒वीं क्षि॒यन्ति॑। ते न॑ः स॒र्पासो॒ हव॒माग॑मिष्ठाः। ये रो॑च॒ने सू॒र्य॒स्यापि॑ स॒र्पाः। ये दिवं॑ दे॒वीमनु॑ सं॒चर॑न्ति। येषा॑माश्रे॒षा

अ॑नु॒यन्ति॒ काम᳚म्। तेभ्यः॑ स॒र्पेभ्यो॒ मधु॑मज्जुहोमि॥ (स॒र्पेभ्यः॒
स्वाहा᳚ऽऽश्रे॒षाभ्यः॒ स्वाहा᳚। द॒न्द॒शू॒के᳚भ्यः॒ स्वाहा᳚॥)

उप॑हूताः पि॒तरो॒ ये म॒घासु॑। मनो॑जवसः सु॒कृतः॑ सुकृ॒त्याः। ते
नो॒ नक्ष॑त्रे॒ हव॒माग॑मिष्ठाः। स्व॒धाभि॑र्य॒ज्ञं प्रय॑तं जुषन्ताम्। ये
अ॑ग्निद॒ग्धा येऽन॑ग्निदग्धाः। ये॑ऽमुं लो॒कं पि॒तरः॑ क्षि॒यन्ति॑। याꣳ॑श्च॑
वि॒द्म याꣳ॑ उ॑ च॒न प्र॑वि॒द्म। म॒घासु॑ य॒ज्ञꣳ सु॒कृ॑तं जुषन्ताम्॥
(पि॒तृभ्यः॒ स्वाहा॑ म॒घाभ्यः॑। स्वाहा॑ऽन॒घाभ्यः॒ स्वाहा॑ऽग॒दाभ्यः॑।
स्वाहा॑ऽरुन्ध॒तीभ्यः॒ स्वाहा᳚॥)

गवां॒ पति॒ः फल्गु॑नीनामसि॒ त्वम्। तद॑र्यमन् वरुण मित्र॒ चारु॑। तं
त्वा॑ व॒यꣳ स॑नि॒तारꣳ॑ सनी॒नाम्। जी॒वा जीव॑न्त॒मुप॒ संवि॑शेम।
येने॒मा विश्वा॒ भुव॑नानि॒ संजि॑ता। यस्य॑ दे॒वा अ॑नु सं॒यन्ति॒ चेतः॑।
अ॒र्य॒मा राजा॒ऽजर॒स्तुवि॑ष्मान्। फल्गु॑नीनामृष॒भो रो॑रवीति॥
(अ॒र्य॒म्णे स्वाहा॒ फल्गु॑नीभ्या॒ꣳ स्वाहा᳚। प॒शुभ्यः॒ स्वाहा᳚)

श्रेष्ठो॑ दे॒वानां᳚ भगवो भगासि। तत्त्वा॑ विदु॒ः फल्गु॑नी॒स्तस्य॑ वित्तात्।
अ॒स्मभ्यं॑ क्ष॒त्रम॒जरꣳ॑ सु॒वीर्य᳚म्। गोम॒दश्व॑व॒दुप॒संनु॑दे॒ह। भगो॑ ह
दा॒ता भग॒ इत्प्र॑दा॒ता। भगो॑ दे॒वीः फल्गु॑नी॒रावि॑वेश। भग॒स्येत्तं
प्र॑स॒वं ग॑मेम। यत्र॑ दे॒वैः स॑ध॒मादं॑ मदेम॥ (भगा॑य॒ स्वाहा॒
फल्गु॑नीभ्या॒ꣳ स्वाहा᳚। श्रेष्ठ्या॑य॒ स्वाहा᳚॥)

आया॑तु दे॒वः स॑वि॒तोप॑यातु। हि॒र॒ण्यये॑न सु॒वृता॒ रथे॑न। व॒हन्
हस्तꣳ॑ सु॒भगं॑ वि॒द्मनाप॑सम्। प्र॒यच्छ॑न्तं॒ पपु॑रिं॒ पुण्य॒मच्छ॑। हस्त॒ः
प्रय॑च्छत्व॒मृतं॒ वसी॑यः। दक्षि॑णेन॒ प्रति॑गृभ्णीम एनत्। दा॒तार॑म॒द्य

स॑वि॒ता वि॑देय। यो नो॒ हस्ता॑य प्रसु॒वाति॑ य॒ज्ञम्॥ (स॒वि॒त्रे स्वाहा॒
हस्ता॑य। स्वाहा॑ दद॒ते स्वाहा॑ पृण॒ते। स्वाहा॒ प्र॒यच्छ॑ते॒ स्वाहा॒
प्रतिगृभ्ण॒ते स्वाहा॒॥)

त्वष्टा॒ नक्ष॑त्रम॒भ्ये॑ति चि॒त्राम्। सु॒भग॑ꣳस॒सं यु॒वति॑ꣳ रोच॑मानाम्।
नि॒वे॒शय॑न्नमृता॒न्मर्त्या॑ꣳश्च। रू॒पाणि॑ पि॒ꣳशन् भुव॑नानि॒ विश्वा॑।
तन्न॒स्त्वष्टा॒ तदु॑ चि॒त्रा विच॑ष्टाम्। तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य॑म्।
तन्न॑ः प्र॒जां वी॒रव॑तीꣳ सनोतु। गोभि॑र्नो॒ अश्वै॒ः सम॑नक्तु य॒ज्ञम्॥
(त्वष्ट्रे स्वाहा॑ चि॒त्रायै॒ स्वाहा॒। चैत्रा॑य॒ स्वाहा॒ प्र॒जायै॒ स्वाहा॒॥)

वा॒युर्नक्ष॑त्रम॒भ्ये॑ति॒ निष्ट्या॑म्। ति॒ग्मशृ॑ङ्गो वृष॒भो रोरु॑वाणः।
स॒मी॒र॒यन्॒ भुव॑ना मात॒रिश्वा॑। अप॒ द्वेषा॑ꣳसि नुदता॒मरा॑तीः। तन्नो॑
वा॒युस्तदु॑ निष्ट्या॑ शृणोतु। तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य॑म्। तन्नो॑
दे॒वासो॒ अनु॑जानन्तु॒ काम॑म्। यथा॒ तरे॑म दुरि॒तानि॒ विश्वा॑॥
(वा॒यवे॒ स्वाहा॒ निष्ट्या॑यै॒ स्वाहा॒। का॒म॒चारा॑य॒ स्वाहा॒ऽभिजि॑त्यै॒
स्वाहा॒॥)

दूर॒म॒स्मच्छत्र॑वो यन्तु भी॒ताः। तदि॑न्द्रा॒ग्नी कृ॑णुतां॒ तद्विशा॑खे। तन्नो॑
दे॒वा अनु॑मदन्तु य॒ज्ञम्। प॒श्चात्पु॒रस्ता॒दभ॑यं नो अस्तु।
नक्ष॑त्राणा॒मधि॑पत्नी॒ विशा॑खे। श्रेष्ठा॑विन्द्रा॒ग्नी भुव॑नस्य गो॒पौ। विषू॑च॒ः
शत्रू॑नप॒बाध॑मानौ। अप॒ क्षुध॑ं नुदता॒मरा॑तिम्॥ (इ॒न्द्रा॒ग्निभ्या॒ꣳ
स्वाहा॒ विशा॑खाभ्या॒ꣳ स्वाहा॒। श्रैष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा॒॥)

पू॒र्णा प॒श्चादु॒त पू॒र्णा पु॒रस्ता॑त्। उन्म॑ध्य॒तः पौ॒र्णमा॒सी जि॑गाय।
तस्या॑ं दे॒वा अधि॑ सं॒वस॑न्तः। उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्ताम्। पृ॒थ्वी

सु॒वर्चा॑ यु॒व॒तिः स॒जोषाः᳚। पौ॒र्ण॒मा॒स्युद॑गा॒च्छोभ॑माना।
आ॒प्या॒यय॑न्ती दु॒रि॒तानि॒ विश्वा᳚। उ॒रुं दुहां॒ यज॑मानाय य॒ज्ञम्।
(पौ॒र्ण॒मा॒स्यै स्वाहा॒ कामा॑य॒ स्वाहाऽऽग॑त्यै॒ स्वाहा᳚॥)

तै॰ब्रा॰ ३.१.२

ऋ॒ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑। मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु।
अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धय॑न्तः। श॒तं जी॑वेम श॒रदः॒ सवी॑राः। चि॒त्रं
नक्ष॑त्र॒मुद॑गात्पु॒रस्ता᳚त्। अ॒नू॒रा॒धास॒ इति॒ यद्वद॑न्ति। तन्मि॒त्र ए॑ति
प॒थिभि॑र्देव॒यानैः᳚। हि॒र॒ण्ययै॒र्वित॑तैर॒न्तरि॑क्षे॥ (मि॒त्राय॒
स्वाहा॑ऽनूरा॒धेभ्यः॒ स्वाहा᳚। मि॒त्र॒धेया॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚॥)

इन्द्रो᳚ ज्ये॒ष्ठामनु॒ नक्ष॑त्रमेति। यस्मि॑न् वृ॒त्रं वृ॑त्र॒तूर्ये॑ त॒तार॑। तस्मि॑न्
व॒यम॒मृतं॒ दुहा॑नाः। क्षुधं॑ तरेम॒ दुरि॑तिं॒ दुरि॑ष्टिम्। पु॒र॒न्द॒राय॑
वृ॒ष॒भाय॑ धृ॒ष्णवे᳚। अषा॑ढाय॒ सह॑मानाय मी॒ढुषे᳚। इन्द्रा॑य ज्ये॒ष्ठा
मधु॑म॒द्दुहा॑ना। उ॒रुं कृ॑णोतु॒ यज॑मानाय लो॒कम्॥ (इन्द्रा॑य॒ स्वाहा᳚
ज्ये॒ष्ठायै॒ स्वाहा᳚। ज्यैष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚॥)

मूलं॑ प्र॒जां वी॒रव॑तीं विदेय। परा᳚च्येतु॒ निर्ऋ॑तिः परा॒चा।
गोभि॒र्नक्ष॑त्रं प॒शुभिः॒ सम॑क्तम्। अह॑र्भूया॒द्यज॑मानाय॒ मह्य᳚म्। अह॑र्नो
अ॒द्य सु॑वि॒ते द॑धातु। मूलं॒ नक्ष॑त्रमिति॒ यद्वद॑न्ति। परा॑चीं वा॒चा
निर्ऋ॑तिं नुदामि। शि॒वं प्र॒जायै॑ शि॒वम॑स्तु॒ मह्य᳚म्॥ (प्र॒जाप॑तये॒
स्वाहा॒ मूला॑य॒ स्वाहा᳚। प्र॒जायै॒ स्वाहा᳚॥)

या दि॒व्या आपः॒ पय॑सा संबभू॒वुः। या अ॒न्तरि॑क्ष उ॒त
पार्थि॑वी॒र्याः। यासा॑मषा॒ढा अ॑नु॒यन्ति॒ काम᳚म्। ता न॒ आपः॒
शꣳस्यो॒ना भ॑वन्तु। याश्च॒ कूप्या॒ याश्च॑ ना॒द्याः᳚ समु॒द्रियाः᳚। याश्च॑

वैश॒न्तीरु॒त प्रा॑स॒चीर्याः। यासा॑मषा॒ढा मधु॑ भ॒क्षय॑न्ति। ता न॒ आप॒ः शꣳस्यो॒ना भ॑वन्तु॥ (अ॒द्भ्यः स्वाहा॑ऽषा॒ढाभ्य॒ः स्वाहा᳚। स॒मु॒द्राय॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚। अ॒भिजि॑त्यै॒ स्वाहा᳚॥)

तन्नो॒ विश्वे॒ उप॑ शृण्वन्तु दे॒वाः। तद॑षा॒ढा अ॒भि सं य॑न्तु य॒ज्ञम्। तन्नक्ष॑त्रं प्रथतां प॒शुभ्य॑ः। कृ॒षिर्वृ॒ष्टिर्यज॑मानाय कल्पताम्। शु॒भ्राः क॒न्या॑ युव॒तय॑ः सु॒पेश॑सः। क॒र्म॒कृत॑ः सु॒कृतो॑ वी॒र्या॑वतीः। विश्वा᳚न्दे॒वान् ह॒विषा॑ व॒र्धय॑न्तीः। अ॒षा॒ढाः काम॒मुप॑यान्तु य॒ज्ञम्॥ (विश्वे᳚भ्यो दे॒वेभ्य॒ः स्वाहा॑ऽषा॒ढाभ्य॒ः स्वाहा᳚। अ॒न॒प॒ज॒य्याय॒ स्वाहा॒ जित्यै॒ स्वाहा᳚॥)

यस्मि॒न् ब्रह्मा॒भ्यज॑य॒त्सर्व॑मे॒तत्। अ॒मुं च॑ लो॒कमि॒दमू॑ च॒ सर्व᳚म्। तन्नो॒ नक्ष॑त्रमभि॒जिद्वि॒जित्य॑। श्रियं॑ दधा॒त्वहृ॑णीयमानम्। उ॒भौ लो॒कौ ब्रह्म॑णा॒ संजि॑ते॒मौ। तन्नो॒ नक्ष॑त्रमभि॒जिद्विच॑ष्टाम्। तस्मि॑न्वय॒ं पृत॑नाः॒ संज॑येम। तन्नो॑ दे॒वासो॒ अनु॑जानन्तु॒ काम᳚म्॥ (ब्रह्म॑णे॒ स्वाहा॑ऽभि॒जिते॒ स्वाहा᳚। ब्र॒ह्म॒लो॒काय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚॥)

शृण्वन्ति॑ श्रो॒णाम॒मृत॑स्य गो॒पाम्। पुण्या॑मस्या॒ उप॑शृणोमि॒ वाच᳚म्। म॒हीं दे॒वीं विष्णु॑पत्नीमजू॒र्याम्। प्र॒तीची॑मेनाꣳ ह॒विषा॑ यजामः। त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे। म॒हीं दिवं॑ पृथि॒वीम॒न्तरि॑क्षम्। तच्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना। पुण्य॒ꣳ श्लोक॒ं यज॑मानाय कृण्व॒ती॥ (विष्ण॑वे॒ स्वाहा᳚ श्रो॒णायै॒ स्वाहा᳚। श्लोका॑य॒ स्वाहा᳚ श्रु॒ताय॒ स्वाहा᳚॥)

अ॒ष्टौ दे॒वा वस॑वः सो॒म्यास॑ः। चत॑स्रो दे॒वीर॒जरा॒ः श्रवि॑ष्ठाः। ते य॒ज्ञं पा᳚न्तु॒ रज॑सः प॒रस्ता᳚त्। सं॒व॒त्स॒रीण॑मम॒ृतꣳ स्व॒स्ति। य॒ज्ञं न॑ः

पान्तु वसवः पुरस्तात्। दक्षिणतोऽभियन्तु श्रविष्ठाः। पुण्यं नक्षत्रमभि संविशाम। मा नो अरातिरघशꣳसाऽगन्॥ (वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा। अग्राय स्वाहा परीत्यै स्वाहा॥)

क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणाꣳ शतभिषग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतꣳ सहस्रा भेषजानि धत्तः। यज्ञं नो राजा वरुण उपयातु। तन्नो विश्वे अभि संयन्तु देवाः। तन्नो नक्षत्रꣳ शतभिषग्जुषाणम्। दीर्घमायुः प्रतिरद्भेषजानि॥ (वरुणाय स्वाहा शतभिषजे स्वाहा। भेषजेभ्यः स्वाहा॥)

अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रति मोदमानः। तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः। विभ्राजमानः समिधान उग्रः। आऽन्तरिक्षमरुहदगन्द्याम्। तꣳ सूर्यं देवमजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥ (अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा। तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा॥)

अहिर्बुध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणाम्। तं ब्राह्मणाः सोमपाः सोम्यासः। प्रोष्ठपदासो अभि रक्षन्ति सर्वे। चत्वार एकमभि कर्म देवाः। प्रोष्ठपदा स इति यान् वदन्ति। ते बुध्नियं परिषद्यꣳ स्तुवन्तः। अहिꣳ रक्षन्ति नमसोपसद्य॥ (अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा। प्रतिष्ठायै स्वाहा॥)

पूषा रेवत्यन्वेति पन्थाम्। पुष्टिपती पशुपा वाजबस्त्यौ। इमानि हव्या प्रयता जुषाणा। सुगैर्नो यानैरुपयातां यज्ञम्। क्षुद्रान् पशून्

रक्षतु रेवती नः। गावो नो अश्वाꣳ अन्वेतु पूषा। अन्नꣳ रक्षन्तौ बहुधा विरूपम्। वाजꣳ सनुतां यजमानाय यज्ञम्॥ (पूष्णे स्वाहा रेवत्यै स्वाहा। पशुभ्यः स्वाहा।

तदश्विनावश्वयुजोपयाताम्। शुभं गमिष्ठौ सुयमेभिरश्वैः। स्वं नक्षत्रꣳ हविषा यजन्तौ। मध्वा संपृक्तौ यजुषा समक्तौ। यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूतावमृतस्य गोपौ। तौ नक्षत्रं जुजुषाणोपयाताम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्॥ (अश्विभ्याꣳ स्वाहाऽश्वयुग्भ्याꣳ स्वाहा। श्रोत्राय स्वाहा श्रुत्यै स्वाहा॥)

अप पाप्मानं भरणीर्भरन्तु। तद्यमो राजा भगवान् विचष्टाम्। लोकस्य राजा महतो महान् हि। सुगं नः पन्थामभयं कृणोतु। यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिञ्चन्त देवाः। तदस्य चित्रꣳ हविषा यजाम। अप पाप्मानं भरणीर्भरन्तु॥ (यमाय स्वाहाऽपभरणीभ्यः स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहा॥)

तै॰सं॰ ३.५.१.१

[25] निवेशनी संगमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती। सहस्रपोषꣳ सुभगा रराणा सा न आ गन्वर्चसा संविदाना॥ यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्॥ (अमावास्यायै स्वाहा कामाय स्वाहाऽऽगत्यै स्वाहा॥)

---

[25] निवेशनी यत्ते देवा अदधुः॥

नवोनवो भवति

तै॰ब्रा॰ ३.१.३
तै॰सं॰ २.४.१४

[26] नवो॑नवो भवति॒ जाय॑मा॒नोऽह्नां॓ के॒तुरु॒षसा॑मे॒त्यग्रं॓। भा॒गं दे॒वेभ्यो॒ वि द॑धात्या॒यन् प्रच॒न्द्रमा॓स्तिरिति दी॒र्घमायुः॑॥ यमा॑दि॒त्या अ॒ꣳशुमा॓प्या॒यय॑न्ति॒ यमक्षि॑त॒मक्षि॑तय॒ः पिब॑न्ति। तेन॑ नो॒ राजा॒ वरु॑णो॒ बृह॒स्पति॒रा प्या॑ययन्तु॒ भुव॑नस्य गो॒पाः॥ (च॒न्द्रमं॑से॒ स्वाहा॓ प्रती॒दृश्या॑यै॒ स्वाहा॓। अ॒हो॒रा॒त्रेभ्य॒ः स्वाहा॓ऽर्धमा॒सेभ्य॒ः स्वाहा॓। मासे॓भ्य॒ः स्वाह॒र्तुभ्य॒ः स्वाहा॓। सं॒व॒त्स॒राय॒ स्वाहा॓॥)

ये विरू॑पे॒ सम॑नसा सं॒व्यय॑न्ती। स॒मा॒नं तन्तुं॑ परि ता॒तना॓ते। वि॒भू प्र॒भू अ॑नु॒भू वि॒श्वतो॑ हुवे। ते नो॒ नक्ष॑त्रे हव॒माग॑मेतम्। व॒यं दे॒वी ब्रह्म॑णा संविदा॒नाः। सु॒रत्ना॑सो दे॒ववी॑तिं॒ दधा॑नाः। अ॒हो॒रा॒त्रे ह॒विषा॑ व॒र्धय॑न्तः। अति॑ पा॒प्मान॒मति॑मुक्त्या गमेम। (अह्ने॒ स्वाहा॒ रात्रि॑यै॒ स्वाहा॓। अति॑मुक्त्यै॒ स्वाहा॓॥)

प्रत्यु॑वदृश्याय॒ती व्यु॒च्छन्ती॑ दु॒हि॒ता दि॒वः। अ॒पो म॒ही वृ॑णुते॒ चक्षु॑षा। तमो॒ ज्योति॑ष्कृणोति सू॒नरी॓। उदु॒स्त्रिया॓ः सचते॒ सूर्यः॑। सचा॑ उ॒द्यन्नक्ष॑त्रमर्चि॒मत्। तवेद॑षो॒ व्युषि॒ सूर्य॑स्य च। सं भ॒क्तेन॑ गमेमहि। (उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहा॓। व्यू॒षुष्यै॒ स्वाहा॓ व्यु॒च्छन्त्यै॒ स्वाहा॓। व्यु॑ष्टायै॒ स्वाहा॓॥)

---

[26] नवो॑नवो भवति॒ जाय॑मानो॒ यमा॑दि॒त्या अ॒ꣳशुमा॓प्या॒यय॑न्ति॥

तन्नो नक्षत्रमर्चिमत्। भानुमत्तेज उच्चरत्। उप यज्ञमिहागमत्। प्र नक्षत्राय देवाय। इन्द्रायेन्दुꣳ हवामहे। स नः सविता सुवत्सनिम्। पुष्टिदां वीरवत्तमम्। (नक्षत्राय स्वाहोदेष्यते स्वाहा। उद्यते स्वाहोदिताय स्वाहा। हरसे स्वाहा भरसे स्वाहा। भ्राजसे स्वाहा तेजसे स्वाहा। तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा॥)

तै॰सं॰ १.४.४३

[27] उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आ प्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च। (सूर्याय स्वाहा नक्षत्रेभ्यः स्वाहा। प्रतिष्ठायै स्वाहा॥)

तै॰सं॰ १.५.११.५

[28] अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु। अदितिः पात्वꣳहसः॥ महीमूषु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतम्। (अदित्यै स्वाहा प्रतिष्ठायै स्वाहा॥)

तै॰सं॰ १.२.१३॥ तै॰ब्रा॰ २.४.३

[29] इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुरे॥ प्र तद्विष्णुः स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः।

---

27 उदुत्यं चित्रम्॥

28 अदितिर्न उरुष्यतु महीमूषु मातरम्॥

29 इदं विष्णुः प्र तद्विष्णुः॥

यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु। अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा॑॥
(विष्ण॑वे॒ स्वाहा॑ य॒ज्ञाय॒ स्वाहा॑। प्र॒ति॒ष्ठायै॒ स्वाहा॑॥)

तै॰सं॰ ४.४.४॥ ४.४.४॥

[30] अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत्पतिः॑ पृथि॒व्या अ॒यम्। अ॒पाꣳ रेता॑ꣳसि जिन्वति॥ भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता यत्रा॑ नि॒युद्भिः॒ सच॑से शि॒वाभिः॑। दि॒वि मू॒र्धानं॑ दधिषे सु॒वर्षां॑ जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म्॥

तै॰सं॰ ३.३.११

[31] अनु॑ नो॒ऽद्यानु॑मतिर्य॒ज्ञं दे॒वेषु॑ मन्यताम्। अ॒ग्निश्च॑ हव्य॒वाह॑नो॒ भव॑तां दा॒शुषे॒ मयः॑॥ अन्वि॒दनु॑मते॒ त्वं मन्या॑सै॒ शं च॑ नः कृधि। क्रत्वे॒ दक्षा॑य नो हि नु॒ प्रण॒ आयू॑ꣳषि तारिषः॥

तै॰ब्रा॰ २.४.१

[32] ह॒व्य॒वाह॑मभिमाति॒षाह॑म्। र॒क्षो॒हणं॒ पृत॑नासु जि॒ष्णुम्। ज्योति॑ष्मन्तं॒ दीद्य॑तं॒ पुर॑न्धिम्। अ॒ग्निꣳ स्वि॑ष्ट॒कृत॒मा हु॑वेम॥ स्वि॑ष्टमग्ने अ॒भि तत्पृ॑णाहि। विश्वा॑ देव॒ पृत॑ना अ॒भिष्य। उ॒रुं न॒ः पन्थां॑ प्रदि॒शन्वि भा॑हि। ज्योति॑ष्मद्धेह्य॒जरं॑ न॒ आयुः॑॥

---

30 अ॒ग्निर्मू॒र्धा भुवः॑॥

31 अनु॑ नो॒ऽद्यानु॑मति॒रन्वि॒दनु॑मते॒ त्वम्॥

32 ह॒व्य॒वा॒हꣳ स्वि॑ष्टम्॥

सुरभिमतीः, अब्लिङ्गाः

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत् प्रण आयूꣳषि तारिषत्॥ आपो हि ष्ठा मयो भुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥

वरुणसूक्तम्

तै॰सं॰ १.५.११॥ १.२.८॥ ३.४.११॥ ३.४.११॥ १.५.११॥ २.१.११॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः। आऽसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि॥ यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याँश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥ कितवासो यद्रिरिपु र्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः॥ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः॥

हिरण्यवर्णीयाः

तै॰सं॰ ५.६.१

हिर॑ण्यवर्णाः॒ शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्विन्द्रः॑।
अ॒ग्निं या गर्भं॑ दधि॒रे विरू॑पा॒स्ता न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥
यासा॒ꣳ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्य॒न् जना॑नाम्।
म॒धु॒श्चु॒तः॒ शुच॑यो॒ याः पा॑व॒कास्ता न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥
यासां॑ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे ब॒हु॒धा भव॑न्ति।
याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ शु॒क्रास्ता न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥
शि॒वेन॑ मा॒ चक्षु॑षा पश्यताऽऽपः शि॒वया॑ त॒नुवोप॑ स्पृशत॒ त्वचं॑ मे।
सर्वा॑ꣳ अ॒ग्नीꣳर॑प्सु॒षदो॑ हुवो वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ नि ध॑त्त॥

यद॒दः सं॑ प्रय॒तीरहा॒वन॑दता ह॒ते। तस्मा॒दा न॒द्यो॑ नाम॑ स्थ॒ ता वो॒ नामा॑नि सिन्धवः॥ यत्प्रेषि॑ता॒ वरु॑णेन॒ ताः शीभ॑ꣳ स॒मव॑ल्गत। तदा॑प्नो॒दिन्द्रो॑ वो य॒तीस्तस्मा॒दापो॒ अनु॑ स्थन॥ अ॒प॒का॒मꣳ स्यन्द॑माना॒ अवी॑वरत वो॒ हिक॑म्। इन्द्रो॑ व॒ः शक्ति॑भिर्देवी॒स्तस्मा॒द् वार्णाम॑ वो हि॒तम्॥ एको॑ दे॒वो अप्य॑तिष्ठ॒त् स्यन्द॑माना यथाव॒शम्। उदा॑निषुर्म॒हीरिति॒ तस्मा॑दुद॒कमु॑च्यते॥ आपो॑ भ॒द्रा घृ॒तमिदाप॑ आसुर॒ग्नीषोमौ॑ बिभ्र॒त्याप॒ इत्ताः। ती॒व्रो रसो॑ मधु॒पृचा॑मरङ्ग॒म आ मा॑ प्रा॒णेन॑ स॒ह वर्च॑सा गन्॥ आदित् प॑श्याम्यु॒त वा॑ शृणो॒म्यामा॒ घोषो॑ गच्छति॒ वाङ् न॑ आसाम्। मन्ये॑ भेजा॒नो अ॒मृत॑स्य॒ तर्हि॒ हिर॑ण्यवर्णा॒ अतृ॑पं य॒दा व॑ः॥

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन। म॒हे रणा॑य॒ चक्ष॑से॥
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑ः। उ॒श॒तीरि॑व मा॒तर॑ः॥

तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च
नः॥

दि॒वि श्र॑यस्वा॒न्तरि॑क्षे यतस्व पृथि॒व्या सं भ॑व ब्रह्मवर्च॒सम॑सि
ब्रह्मवर्च॒साय॑ त्वा॥

पवमानसूक्तम्

तै॰ब्रा॰ १.४.८

पव॑मानः॒ सुव॒र्जनः॑ । प॒वित्रे॑ण॒ विच॑र्षणिः। यः पोता॒ स पु॑नातु
मा। पु॒नन्तु॑ मा देवज॒नाः। पु॒नन्तु॒ मन॑वो धि॒या। पु॒नन्तु॒ विश्व॑
आ॒यवः॑। जात॑वेदः प॒वित्र॑वत्। प॒वित्रे॑ण पुनाहि मा। शु॒क्रेण॑ देव॒
दीद्य॑त्। अग्ने॒ क्रत्वा॒ क्रतू॒ꣳरनु॑॥

यत् ते॑ प॒वित्र॑म॒र्चिषि॑। अग्ने॒ वित॑तमन्त॒रा। ब्रह्म॒ तेन॑ पुनीमहे।
उ॒भाभ्या᳚ं देवसवितः। प॒वित्रे॑ण स॒वेन॑ च। इ॒दं ब्रह्म॑ पुनीमहे।
वै॒श्व॒दे॒वी पु॑न॒ती दे॒व्यागा᳚त्। यस्यै॑ ब॒ह्वीस्त॒नुवो॑ वी॒तपृ॑ष्ठाः। तया॒
मद॑न्तः सध॒माद्ये॑षु। व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्॥

वै॒श्वा॒न॒रो र॒श्मिभि॑र्मा पुनातु। वातः॑ प्रा॒णेने॑षि॒रो म॑यो॒भूः।
द्यावा॑पृथि॒वी पय॑सा॒ पयो॑भिः। ऋ॒ताव॑री य॒ज्ञिये॑ मा पुनीताम्।
बृ॒हद्भिः॑ सवित॒स्तृभिः॑। वर्षि॑ष्ठैर्दे॒वमन्म॑भिः। अग्ने॒ दक्षैः᳚ पुनाहि मा।
येन॑ दे॒वा अपु॑नत। येनापो॑ दि॒व्यं कशः॑। तेन॑ दि॒व्येन॒ ब्रह्म॑णा॥

इ॒दं ब्रह्म॑ पुनीमहे। यः पा॑वमा॒नीर॒ध्येति॑। ऋषि॑भि॒ः संभृ॑त॒ꣳ रस᳚म्।
सर्व॒ꣳ स पू॒तम॑श्नाति। स्व॒दि॒तं मा॑त॒रिश्व॑ना। पा॒व॒मानीर्यो॑ अ॒ध्येति॑।

ऋषि॑भि॒ः संभृ॑त॒ꣳ रस᳚म्। तस्मै॒ सर॑स्वती दुहे। क्षी॒रꣳ स॒र्पिर्मधू॑द॒कम्। पा॒व॒मा॒नीः स्व॒स्त्यय॑नीः॥

सु॒दुघा॒ हि पय॑स्वतीः। ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः। ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम्। पा॒व॒मा॒नीर्दि॑शन्तु नः। इ॒मं लो॒कमथो॑ अ॒मुम्। कामा॒न् सम॑र्धयन्तु नः। दे॒वीर्दे॒वैः स॒माभृ॑ताः। पा॒व॒मा॒नीः स्व॒स्त्यय॑नीः। सु॒दुघा॒ हि घृ॑त॒श्चुत॑ः। ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः॥

ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम्। येन॑ दे॒वाः प॒वित्रे॑ण। आ॒त्मान॑ं पु॒नते॒ सदा᳚। तेन॑ स॒हस्र॑धारेण। पा॒व॒मा॒न्यः पु॑नन्तु मा। प्रा॒जा॒प॒त्यं प॒वित्र᳚म्। श॒तोद्या॑मꣳ हिर॒ण्मय᳚म्। तेन॑ ब्रह्म॒विदो॑ व॒यम्। पू॒तं ब्रह्म॑ पुनीमहे। इन्द्र॑ः सुनी॒ती स॒ह मा॑ पुनातु।

सोम॑ः स्व॒स्त्या वरु॑णः स॒मीच्या᳚। यमो॒ राजा᳚ प्रमृ॒णाभि॑ः पुनातु मा। जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु॥

व्याहृत्यादयः

भूर्भुव॒ः सुव॑ः। तच्छं॒ यो रावृ॑णीमहे। गा॒तुं य॒ज्ञाय॑। गा॒तुं य॒ज्ञप॑तये। दैवी᳚ः स्व॒स्तिर॑स्तु नः। स्व॒स्तिर्मानु॑षेभ्यः। ऊ॒र्ध्वं जि॑गातु भेष॒जम्। शं नो॑ अस्तु द्वि॒पदे᳚। शं चतु॑ष्पदे। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

आयुष्यसूक्तम्

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी। ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन॥ विभ्राजमानः सरिरस्य मध्याद् रोचमानो घर्मरुचिर्य आगात्। स

मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत् तु देवः॥ ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम्। सुवर्णरम्भ ग्रहमर्कमर्च्यं तमायुषे वर्धयामो घृतेन॥ श्रियं लक्ष्मीमौबलामम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः। तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन॥ दाक्षायण्यः सर्वयोन्यः सुयोन्यः सहस्रशो विश्वरूपा विरूपाः। ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्ताम्॥ दिव्यागणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान्। तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाꣳ रीरिषो मोत वीरान्॥ एकः पुरस्ताद् य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनꣳ साम्पराये स नो हविर्घृतमिहायुषेऽत्तु देवः॥ वसून् रुद्रानादित्यान् मरुतोऽथ साध्यानृभून् यक्षान् गन्धर्वाꣳश्च पितॄꣳश्च विश्वान्। भृगून् सर्पाꣳश्चाङ्गिरसोऽथ सर्वान् घृतꣳ हुत्वा स्वायुष्या महयाम शश्वत्॥

परिधानीया

नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नमः॑ पृथि॒व्यै नम॒ ओष॑धीभ्यः। नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे बृह॒ते क॑रोमि॥

विष्णो॒ त्वं नो॒ अन्त॑म॒ः शर्म॑ यच्छ सहन्त्य। प्र ते॒ धारा॑ मधु॒श्चुत॒ उत्सं॑ दुह्रते॒ अक्षि॑तम्॥ आ॒भिर्गी॒र्भिर्यदतो॑ न ऊ॒नमाप्या॑य य हरिवो॒ वर्ध॑मानः। य॒दा स्तो॒तृभ्यो॒ महि॑गो॒त्रा रु॒जासि॑ भूयि॒ष्ठभाजो॒ अध॑ते स्याम। ब्रह्म॒ प्रावा॑दिष्म॒ तन्नो॒ माहा॑सीत्॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

प्रोक्षणमन्त्राः

तै॰ब्रा॰ २.६.५.२

देवस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो॑र्बा॒हुभ्या॑म्। पू॒ष्णो हस्ता॑भ्याम्। अ॒श्विनो॒र्भैष॑ज्येन। तेज॑से ब्रह्मवर्च॒सायाभिषि॑ञ्चामि। दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो॑र्बा॒हुभ्या॑म्। पू॒ष्णो हस्ता॑भ्याम्। सर॑स्वत्यै भैष॑ज्येन। वी॒र्या॑या॒ न्नाद्या॑या॒भिषि॑ञ्चामि। दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो॑र्बा॒हुभ्या॑म्। पू॒ष्णो हस्ता॑भ्याम्। इन्द्र॑स्येन्द्रि॒येण॑। श्रि॒यै यश॑से॒ बला॑या॒भिषि॑ञ्चामि॥

तै॰सं॰ १.७.१०.३

च॒ वा॒जिन॑म्। सोम॒ꣳ राजा॑न॒ं वरु॑णम॒ग्निम॒न्वार॑भामहे। आ॒दि॒त्यान् विष्णु॒ꣳ सूर्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति॑म्। दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॑ऽश्विनो॑र्बा॒हुभ्या॒ं पू॒ष्णो हस्ता॑भ्या॒ꣳ सर॑स्वत्यै वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा॑ज्येना॒भिषि॑ञ्चा॒मीन्द्र॑स्य त्वा॒ साम्रा॑ज्येना॒भिषि॑ञ्चामि॒ बृह॒स्पते॑स्त्वा॒ साम्रा॑ज्येना॒भिषि॑ञ्चामि॥

चर॑णं प॒वित्र॒ं वित॑तं पुरा॒णं येन॑ पू॒तस्तर॑ति दुष्कृ॒तानि॑। तेन॑ प॒वित्रे॑ण शु॒द्धेन॑ पू॒ता अति॑पा॒प्मान॒मरा॑तिं तरेम। लो॒कस्य॒ द्वार॑मर्चि॒मत् प॒वित्र॒ं ज्योति॑ष्म॒द् भ्राज॑मान॒ं मह॑स्वत्। अ॒मृत॑स्य॒ धारा॑ बहु॒धा दोह॑मान॒ं चर॑णं नो लो॒के सुधि॑तां दधातु॥

तै॰ब्रा॰ ३.५.१०.४

आयु॒राशा॑स्ते॒ऽयं यज॑मानो॒ऽसौ। आयु॒राशा॑स्ते। सु॒प्र॒जा॒स्त्वमाशा॑स्ते। स॒जा॒त॒व॒न॒स्यामाशा॑स्ते। उत्त॑रां देवय॒ज्यामाशा॑स्ते। भूयो॑ हवि॒ष्करं॑ण॒माशा॑स्ते। दि॒व्यं धामाशा॑स्ते। विश्व॑ं प्रि॒यमाशा॑स्ते। तद॑श्या॒त् तद्द॑ध्यात्। तद॑स्मै दे॒वारा॑सन्ताम्।

तद॒ग्निर्दे॒वो दे॒वेभ्यो॒ वन॑ते। व॒यम॒ग्नेर्मानु॑षाः। इ॒ष्टं च॑ वी॒तं च॑। उ॒भे च॑ नो॒ द्यावा॑पृथि॒वी अ॑ꣳ ह॑स्पाताम्। इ॒ह गति॑र्वा॒मस्ये॒दं च॑। नमो॑ दे॒वेभ्यः॑॥

प्राशनमन्त्राः

तै॰ब्रा॰ २.४.४.१०॥ २.६.६॥

द्रु॒प॒दादि॑व मुमुचा॒नः। द्रु॒प॒दादि॒वेन्मु॑मुचा॒नः। स्वि॒न्नः स्ना॒त्वी मला॑दिव। पू॒तं प॒वित्रे॑णे॒वाज्य᳚म्। आप॑ः शुन्धन्तु॒ मैन॑सः॥ उद्व॒यं तम॑स॒स्परि॑। पश्य॑न्तो॒ ज्योति॒रुत्त॑रम्। दे॒वं दे॑व॒त्रा सूर्य᳚म्। अग॑न्म॒ ज्योति॑रुत्त॒मम्॥ प्रति॑युतो॒ वरु॑णस्य॒ पाश॑ः। प्रत्य॑स्तो॒ वरु॑णस्य॒ पाश॑ः॥

मृग्यम्

आप॒ इद्वा उ॑भेष॒जीरापो॑ अमीव॒ चात॑नीः। आप॒ः सर्व॑स्य भेष॒जीस्ता मे॑ (तास्ते॑) कृण्वन्तु भेष॒जम्॥

तै॰आ॰ १.२६.५

आ॒म॒या॒वी चि॑न्वीत। आपो॒ वै भे॑ष॒जम्। भे॒ष॒ज॒मे॒वास्मै॑ करोति। सर्व॒मायु॑रेति॥

महान्यासादयः

रावणोक्ता पञ्चाङ्गप्रार्थना

ओङ्कारमन्त्र-संयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं तस्मै नकाराय नमो नमः॥

नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः। नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑ः। या त॒ इषु॑ः शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनु॑ः। शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय॥ पूर्वाङ्ग रुद्राय नमः॥

महादेवं महात्मानं महापातकनाशनम्। महापापहरं वन्दे मकाराय नमो नमः॥

निध॑नपतये॒ नमः। निध॑नपतान्तिकाय॒ नमः। ऊर्ध्वाय॒ नमः। ऊर्ध्वलिङ्गाय॒ नमः। हिरण्याय॒ नमः। हिरण्यलिङ्गाय॒ नमः। सुवर्णाय॒ नमः। सुवर्णलिङ्गाय॒ नमः। दिव्याय॒ नमः। दिव्यलिङ्गाय॒ नमः। भवाय॒ नमः। भवलिङ्गाय॒ नमः। शर्वाय॒ नमः। शर्वलिङ्गाय॒ नमः। शिवाय॒ नमः। शिवलिङ्गाय॒ नमः। ज्वलाय॒ नमः। ज्वललिङ्गाय॒ नमः। आत्माय॒ नमः। आत्मलिङ्गाय॒ नमः। परमाय॒ नमः। परमलिङ्गाय॒ नमः। एतत्सोऽमस्य॑ सू॒र्य॒स्य॒ सर्वलिङ्ग॑ꣳ स्था॒प॒यति॒ पाणिमन्त्र॑ं पवि॒त्रम्॥ दक्षिणाङ्ग रुद्राय नमः॥

शिवं शान्तं जगन्नाथं लोकानुग्रहकारणम्। शिवमेकं परं वन्दे शिकाराय नमो नमः॥

अपैतु मृत्युरमृतं न आगंन्वैवस्वतो नो अभंयं कृणोतु। पर्णं वनस्पतेरिवाभि नंः शीयताꣳ रयिः सचंतां नः शचीपतिंः॥
पश्चिमाङ्ग रुद्राय नमः॥

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम्। वामे शक्तिधरं वन्दे वकाराय नमो नमः।

प्राणानां ग्रन्थिरसि रुद्रो मां विशान्तकः। तेनान्नेनाँप्यायस्व। नमो रुद्राय विष्णवे मृत्युंर्मेपाहि॥ उत्तराङ्ग रुद्राय नमः॥

यत्र कुत्र स्थितं देवं सर्वव्यापिनमीश्वरं यल्लिङ्गं पूजयेन्नित्यं यकाराय नमो नमः॥

यो रुद्रो अग्नौ यो अप्सु य ओषंधीषु यो रुद्रो विश्वा भुवंनाऽऽविवेश तस्मैं रुद्राय नमों अस्तु॥ ऊर्ध्वाङ्ग रुद्राय नमः॥

रावणोक्ता पञ्चमुखप्रार्थना

तत्पुरुंषाय विद्महें महादेवायं धीमहि। तन्नों रुद्रः प्रचोदयाँत्॥

संवर्ताग्नि-तडित्प्रदीप्तकनक-प्रस्पर्धितेजोमयं गम्भीरध्वनि-सामगान-जनकं ताम्राधरं सुन्दरम्। अर्धेन्दुद्युति-लोलपिङ्गलजटाभार-प्रबद्धोरगं वन्दे सिद्धसुरासुरेन्द्र-नमितं पूर्वं मुखं शूलिनः। पूर्वमुखाय नमः।

अघोरेँभ्योऽथ घोरेँभ्यो घोर घोरंतरेभ्यः। सर्वेँभ्यः सर्व शर्वेँभ्यो नमंस्ते अस्तु रुद्ररूंपेभ्यः॥

कालाभ्रभ्रमराञ्जन-द्युतिनिभं व्यावृत्तपिङ्गेक्षणं कर्णोद्भासित-भोगिमस्तक-मणिप्रोद्भिन्न-दंष्ट्राङ्कुरम्। सर्पप्रोतकपाल-शुक्तिशकल-व्याकीर्णताशेखरं वन्दे दक्षिणमीश्वरस्य कुटिलं भ्रूभङ्गरौद्रं मुखम्। दक्षिणमुखाय नमः।

स॒द्योजा॒तं प्र॑पद्या॒मि॒ स॒द्योजा॒ता॒य॒ वै नमो॒ नम॑ः। भ॒वेभ॑वे॒ नाति॑भवे भवस्व॒ माम्। भ॒वोद्भ॑वा॒य॒ नम॑ः॥

प्रालेयाचलमिन्दुदुन्दधवलं गोक्षीरफेनप्रभं भस्माभ्यक्तमनङ्गदेह-दहनज्वालावली-लोचनम्। ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिः वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम्। पश्चिममुखाय नमः।

वा॒म॒दे॒वा॒य॒ नमो॑ ज्ये॒ष्ठा॒य॒ नम॑ः श्रे॒ष्ठा॒य॒ नमो॑ रु॒द्रा॒य॒ नम॒ः काला॑य नम॒ः कल॑विकरणा॒य॒ नमो॒ बल॑विकरणा॒य॒ नमो॒ बला॑य॒ नमो॒ बल॑प्रमथना॒य॒ नम॒ः सर्व॑भूतदमना॒य॒ नमो॑ म॒नोन्म॑ना॒य॒ नम॑ः॥

गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं भ्रूविक्षेप-कटाक्षवीक्षणलसत्-संसक्त-कर्णोत्पलम्। स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतं वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम्। उत्तरमुखाय नमः।

ईशानः सर्व॑विद्या॒ना॒मीश्वरः सर्व॑भूता॒ना॒ं ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्।

व्यक्ताव्यक्तगुणात्परं च परतः षड्विंशतत्वात्मकं तस्मादुत्तम-तत्त्वमक्षरमिति ध्येयं सदा योगिभिः॥ वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मत्परं शान्तं पञ्चममीश्वरस्य वदनं खव्याप्त-तेजोमयम्। ऊर्ध्वमुखाय नमः।

शिखादिः प्रथमो न्यासः

या ते॑ रुद्र शि॒वा त॒नूरघो॒रापा॑पकाशिनी। तया॑ नस्त॒नुवा॒ शन्त॑मया॒ऽगिरि॑शन्ता॒भि चा॑कशीहि॥ शिखायै नमः॥

अ॒स्मिन् म॑ह॒त्य॑र्ण॒वे॑ऽन्तरि॑क्षे भ॒वा अधि॑। तेषा॑ँ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ शिरसे नमः॥

स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा अधि॒ भूम्या॑म्। तेषा॑ँ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ ललाटाय नमः॥

तै॰आ॰ १०

ह॒ँसः शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत्। नृ॒षद्व॑र॒सदृ॑त॒सद् व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत्॥ भ्रुवोर्मध्याय नमः॥

त्र्य॑म्बकं यजामहे सुग॒न्धिं पु॑ष्टि॒वर्ध॑नम्। उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॑त्॥ नेत्राभ्यां नमः॥

नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॥ कर्णाभ्यां नमः॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो ऽवधीर्हविष्मन्तो नमसा विधेम ते॥ नासिकायै नमः॥

अवतत्य धनुस्तवꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ मुखाय नमः॥

नीलग्रीवाः शितिकण्ठाँः शर्वा अधः क्षमाचराः। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ कण्ठाय नमः॥

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ उपकण्ठाय नमः॥

नमस्ते अस्त्वायुधायानातताय धृष्णवेँ। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ बाहुभ्यां नमः॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्वमयक्ष्मयाया परिब्भुज॥ उपबाहुभ्यां नमः॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ मणिबन्धाभ्यां नमः॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ हस्ताभ्यां नमः॥

स॒द्योजा॒तं प्र॑प॒द्या॒मि॒ स॒द्योजा॒ताय॒ वै नमो॒ नमः॑। भ॒वे भ॑वे॒ नाति॑भवे भवस्व॒ माम्। भ॒वोद्भ॑वाय॒ नमः॑॥ अङ्गुष्ठाभ्यां नमः॥

वा॒म॒दे॒वाय॒ नमो॑ ज्ये॒ष्ठाय॒ नमः॑ श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नम॒ः काला॑य॒ नम॒ः कल॑विकरणाय॒ नमो॒ बल॑विकरणाय॒ नमो॒ बला॑य॒ नमो॒ बल॑प्रमथनाय॒ नम॒ः सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नमः॑॥ तर्जनीभ्यां नमः॥

अ॒घोरे॑भ्योऽथ॒ घोरे॑भ्यो॒ घोर॒ घोर॑तरेभ्यः। सर्वे॑भ्यः सर्व॒ शर्वे॑भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥ मध्यमाभ्यां नमः॥

तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि। तन्नो॑ रुद्रः प्रचो॒दया॑त्॥ अनामिकाभ्यां नमः॥

ईशानः सर्व॑विद्या॒ना॒मीश्वरः सर्व॑भूता॒ना॒ं ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्॥ कनिष्ठिकाभ्यां नमः॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरन्यपतयेऽम्बिकापतय उमापतये पशुपतये॑ नमो॒ नमः॥ करतलकरपृष्ठाभ्यां नमः।

नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यः॥ हृदयाय नमः॥

ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः॥ तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि। उदराय नमः॥

नमः॑ शं॒भवे॑ च मयो॒भवे॑ च॒ नमः॑ शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नमः॑ शि॒वाय॑ च शि॒वत॑राय च॥ कक्षाभ्यां नमः॥

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमः॑॥ पृष्ठाय नमः॥

नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमः॑॥ कक्षाभ्यां नमः॥

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमः॑॥ पार्श्वाभ्यां नमः॥

विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाँ उ॒त। अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑॥ जठराय नमः॥

हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्। स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ नाभ्यै नमः॥

मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑ सु॒मना॑ भव। प॒र॒मे वृ॒क्ष आयु॑धं नि॒धाय॒ कृत्तिं॒ वसा॑न॒ आच॑र॒ पिना॑कं॒ बिभ्र॒दाग॑हि॥ कट्यै नमः॥

ये भू॒ताना॒मधि॑पतयो विशि॒खासः॑ कप॒र्दिनः॑। तेषा॑ँ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि। गुह्याय नमः॥

ये अन्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जना॑न्। तेषा॑ँ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ अण्डाभ्यां नमः॥

स॒शि॒रा जा॒तवे॑दा अ॒क्षरं॑ पर॒मं प॒दम्। वेदा॑ना॒ꣳ शिर॑सि मा॒ता॒ आ॒यु॒ष्मन्तं॑ करोतु॒ माम्॥ अपानाय नमः॥

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्। मा नो॑ऽवधीः पि॒तरं॒ मोत मा॒तरं॑ प्रि॒या मा न॑स्त॒नुवो॑ रुद्र रीरिषः॥ ऊरुभ्यां नमः॥

ए॒ष ते॑ रुद्र भा॒गस्तं जु॑षस्व॒ तेना॑व॒सेन॑ प॒रोमूज॑व॒तोऽती॒ह्यव॑ततधन्वा॒ पिना॑कहस्त॒ः कृत्ति॑वासाः॥ जानुभ्यां नमः॥

स॒ꣳ सृ॒ष्ट॒जित्सो॑म॒पा बा॑हुश॒र्ध्यू᳚र्ध्वध॑न्वा॒ प्रति॑हिताभि॒रस्ता᳚। बृह॑स्पते॒ परि॑दीया॒ रथे॑न रक्षो॒हामित्रा॑ꣳ अप॒बाध॑मानः॥ जङ्घाभ्यां नमः॥

विश्वं॑ भू॒तं भुव॑नं चि॒त्रं ब॑हु॒धा जा॒तं जाय॑मानं च॒ यत्। सर्वो॒ ह्ये॑ष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॥ गुल्फाभ्यां नमः॥

ये प॒थां प॑थि॒रक्ष॑य ऐलबृ॒दा य॒व्युध॑ः। तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ पादाभ्यां नमः॥

अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक्। अही॑ꣳश्च॒ सर्वा᳚ञ्ज॒म्भय॒न् सर्वा᳚श्च यातुधा॒न्य॑ः॥ कवचाय हुम्॥

नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॥ उपकवचाय हुम्॥

नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे॓। अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकरं॒ नम॑ः॥ तृतीयनेत्राय वौषट्॥

प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्याम्। याश्च॑ ते॒ हस्त॒ इष॑व॒ः परा॒ ता भ॑गवो वप॥ अस्त्राय फट्॥

य ए॒ताव॑न्तश्च॒ भूया॑ꣳसश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे। तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ इति दिग्बन्धः॥

दशाक्षरी द्वितीयो न्यासः

ॐ नमः (मूर्ध्ने) । नं नमः (नासिकायै) । मों नमः (ललाटाय) । भं नमः (मुखाय) । गं नमः (कण्ठाय) । वं नमः (हृदयाय)। तें नमः (दक्षिणहस्ताय) । रुं नमः (वामहस्ताय) । द्रां नमः (नाभ्यै) । यं नमः (पादाभ्याम्) ॥

पादादिस्तृतीयो न्यासः

स॒द्योजा॒तं प्र॑पद्या॒मि॒ स॒द्योजा॒ताय॒ वै नमो॒ नम॑ः। भ॒वे भ॑वे॒ नाति॑भवे भवस्व॒ माम्। भ॒वोद्भ॑वाय॒ नम॑ः॥ पादाभ्यां नमः॥

वा॒म॒दे॒वाय॒ नमो॓ ज्ये॒ष्ठाय॒ नम॑ः श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नम॒ः काला॑य॒ नम॒ः कल॑विकरणाय॒ नमो॒ बल॑विकरणाय॒ नमो॒ बला॑य॒ नमो॒ बल॑प्रमथनाय॒ नम॒ः सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नम॑ः॥ ऊरुमध्यमाभ्यां नमः॥

अघोरेभ्योऽथ घोरेभ्यो घोर घोरंतरेभ्यः। सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ हृदयाय नमः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ मुखाय नमः॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ मूर्ध्ने नमः॥

हंसगायत्री

अस्य श्री हंसगायत्री महामन्त्रस्य। अव्यक्तपरब्रह्म ऋषिः। अनुष्टुप् छन्दः। परमहंसो देवता। हंसां बीजं। हंसीं शक्तिः। हंसूं कीलकम्। परमहंस प्रसादसिध्यर्थे जपे विनियोगः।

हंसां अङ्गुष्ठाभ्यां नमः। हंसीं तर्जनीभ्यां नमः। हंसूं मध्यमाभ्यां नमः। हंसैं अनामिकाभ्यां नमः। हंसौं कनिष्ठिकाभ्यां नमः। हंसः करतलकरपृष्ठाभ्यां नमः। हंसां हृदयाय नमः। हंसीं शिरसे स्वाहा। हंसूं शिखायै वषट्। हंसैं कवचाय हुं। हंसौं नेत्रत्रयाय वौषट्। हंसः अस्त्राय फट्। भूर्भुवस्सुवरों इति दिग्बन्धः।

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम्। पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम्। देहो देवालयः प्रोक्तो जीवो देवः सनातनः। त्जयेदज्ञान निर्माल्यं सोऽहं भावेन पूजयेत्॥ हंसहंसः परमहंसः सोऽहं हंसः सोऽहं हंसः। हंसः

सोऽहम्। सोऽहं हंसः। हं॒स॒हं॒साय॑ वि॒द्महे॑ परमहं॒साय॑ धीमहि। तन्नो॑ हंसः प्रचो॒दया॑त्।

दिग्पालकमन्त्रप्रतीकाः

मन्त्राः 28 पुटे द्रष्टव्याः

त्रा॒तार॒मिन्द्र॑ ००० पूर्वदिग्भागे ललाटस्थाने इन्द्राय नमः।

त्वं नो॑ अग्ने ००० आग्नेयदिग्भागे नेत्रस्थाने अग्नये नमः।

सु॒गं न॒ः पन्थां॒ ००० दक्षिणदिग्भागे कर्णस्थाने यमाय नमः।

असुं॑न्वन्त॒मयं॑जमानं ००० निर्ऋतिदिग्भागे मुखस्थाने निर्ऋतये नमः।

तत्त्वा॑ यामि॒ ब्रह्मं॑णा॒ ००० पश्चिमदिग्भागे बाहुस्थाने वरुणाय नमः।

आ नो॑ नि॒युद्भिः॑ ००० वायव्यदिग्भागे नासिकास्थाने वायवे नमः।

व॒यꣳ सो॑म व्र॒ते तव॑ ००० उत्तरदिग्भागे हृदयस्थाने सोमाय नमः।

तमीशा॑नं॒ जग॑तः ००० ईशान्यदिग्भागे नाभिस्थाने ईशानाय नमः।

अ॒स्मे रु॒द्रा मे॒हना॒ ००० ऊर्ध्वदिग्भागे मूर्धस्थाने आकाशाय नमः।

स्योना पृंथिवि भवां ॰॰॰ अधोदिग्भागे पादस्थाने पृथिव्यै नमः।

रौद्रीकरणम् (सानुषङ्गम्)

तै॰सं॰ १.३.३.१

विभूरंसि प्रवाहंणो रौद्रेणानींकेन पाहि माँग्ने पिपृहि मा मा मां हिꣳसीः॥ शिखास्थाने रुद्राय नमः।

वह्निरसि हव्यवाहंनो रौद्रेणानींकेन ॰ शिरस्थाने रुद्राय नमः।

श्वात्रोंऽसि प्रचेंता रौद्रेणानींकेन ॰ मूर्धस्थाने रुद्राय नमः।

तुथोंऽसि विश्ववेंदा रौद्रेणानींकेन ॰ ललाटस्थाने रुद्राय नमः।

उशिगंसि कवी रौद्रेणानींकेन ॰ नेत्रस्थाने रुद्राय नमः।

अङ्घांरिरसि बंभांरी रौद्रेणानींकेन ॰ कर्णस्थाने रुद्राय नमः।

अवस्युरंसि दुवंस्वान् रौद्रेणानींकेन ॰ मुखस्थाने रुद्राय नमः।

शुन्ध्यूरंसि मार्जालीयो रौद्रेणानींकेन ॰ कण्ठस्थाने रुद्राय नमः।

सम्राडंसि कृशानू रौद्रेणानींकेन ॰ बाहुस्थाने रुद्राय नमः।

परिषद्योंसि पवंमानो रौद्रेणानींकेन ॰ हृदयस्थाने रुद्राय नमः।

प्रतक्वांसि नभंस्वान् रौद्रेणानींकेन ॰ नाभिस्थाने रुद्राय नमः॥

असंमृष्टोऽसि हव्यसूदो रौद्रेणानींकेन ॰ कटिस्थाने रुद्राय नमः।

ऋ॒तधा॑मासि॒ सुव॑र्ज्योती॒ रौद्रे॒णानी॑केन ॰ ऊरु स्थाने रुद्राय नमः।

ब्रह्म॑ज्योतिरसि॒ सुव॑र्द्धामा॒ रौद्रे॒णानी॑केन ॰ जानुस्थाने रुद्राय नमः।

अ॒जो॑ऽस्येक॑पा॒द्रौद्रे॒णानी॑केन ॰ जङ्घास्थाने रुद्राय नमः।

अहि॑रसि बु॒ध्नियो॒ रौद्रे॒णानी॑केन ॰ पादस्थाने रुद्राय नमः।

गुह्यादिश्चतुर्थो न्यासः

मनो॒ ज्योति॑र्जुषता॒माज्यं॒ विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धातु। या इ॒ष्टा उ॒षसो॑ नि॒म्रुत॑श्च॒ ताः संद॑धामि ह॒विषा॑ घृ॒तेन॑॥ गुह्याय नमः॥

अबो॑ध्य॒ग्निः स॒मिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाऽऽय॒तीमु॒षास॑म्। य॒ह्वा इ॑व॒ प्र॒व॒यामु॒ज्जिहा॑नाः॒ प्र॒भा॒नव॑ः सिस्र॒ते॒ ना॒कमच्छ॑॥ नाभ्यै नमः॥

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत्पति॑ः पृथि॒व्या अ॒यम्। अ॒पाꣳ रेता॑ꣳसि जिन्वति॥ हृदयाय नमः॥

मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒ताय॑ जा॒तम॒ग्निम्। क॒विꣳ स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः॥ कण्ठाय नमः॥

मर्मा॑णि ते॒ वर्म॑भिश्छादयामि॒ सोम॑स्त्वा॒ राजा॒ऽमृते॑ना॒भिऽव॑स्ताम्। उ॒रोर्वरी॑यो॒ वरि॑वस्ते अस्तु॒ जय॑न्त॒न्त्वामनु॑ मदन्तु दे॒वाः॥ मुखाय नमः॥

जा॒तवे॑दा॒ यदि॑वा पाव॒कोऽसि॑। वै॒श्वा॒न॒रो यदि॑ वा वैद्यु॒तोऽसि॑। शं प्र॒जाभ्यो॒ यज॑मानाय लो॒कम्। ऊर्जं॒ पुष्टिं॒ दद॑द॒भ्याव॑वृत्स्व॥
शिरसे नमः।

आत्मरक्षा

तै॰ब्रा॰ २.३.११

ब्रह्मा॑त्म॒न्वद॑सृजत। तद॑कामयत। समा॒त्मना॑ पद्ये॒येति॑ आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ दश॒मꣳ हू॒तः प्रत्य॑शृणोत्। स दश॑हूतोऽभवत्। दश॑हूतो ह॒ वै नामै॒षः। तं वा ए॒तं दश॑हू॒त॒ꣳ सन्त॑म्। दश॑हो॒तेत्याच॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।

आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ सप्त॒मꣳ हू॒तः प्रत्य॑शृणोत्। स स॒प्तहू॑तोऽभवत्। स॒प्तहू॑तो ह॒ वै नामै॒षः। तं वा ए॒तꣳ स॒प्तहू॒त॒ꣳ सन्त॑म्। स॒प्तहो॒तेत्याच॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।

आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ ष॒ष्ठꣳ हू॒तः प्रत्य॑शृणोत्। स षड्ढू॑तोऽभवत्। षड्ढू॑तो ह॒ वै नामै॒षः। तं वा ए॒तꣳ षड्ढू॒त॒ꣳ सन्त॑म्। षड्ढो॒तेत्याच॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।

आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ पञ्च॒मꣳ हू॒तः प्रत्य॑शृणोत्। स पञ्च॑हूतोऽभवत्। पञ्च॑हूतो ह॒ वै नामै॒षः। तं वा ए॒तं पञ्च॑हू॒त॒ꣳ सन्त॑म्। पञ्च॑हो॒तेत्याच॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।

आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ चतु॒र्थꣳ हू॒तः प्रत्य॑शृणोत्। स चतु॑र्हूतोऽभवत्। चतु॑र्हूतो ह॒ वै नामै॒षः। तं वा ए॒तं चतु॑र्हू॒त॒ꣳ सन्त॑म्। चतु॑र्हो॒तेत्याच॑क्षते प॒रोक्षे॑ण। प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।

तमंब्रवीत्। त्वं वै मे नेदिंष्ठ॒ हूतः प्रत्यंश्रौषीः। त्वयैंनानाख्यातार॒ इतिं। तस्मान्नु हैंनाङ्श्चतुंर्होतार॒ इत्याचंक्षते। तस्माँच्छुश्रूषुः पुत्राणा॒ हृद्यंतमः। नेदिंष्ठो॒ हृद्यंतमः। नेदिंष्ठो॒ ब्रह्मंणो भवति। य ए॒वं वेदं॥

शिवसंकल्पः

सौत्रमन्त्राः (स्वरविहीना), शुक्ल० मन्त्रा वा

(शुक्ल) येने॒दं भूतं भुवंनं भवि॒ष्यत् परिंगृहीतम॒मृतें॒न सर्वम्। येनं य॒ज्ञस्ता॒यते स॒प्तहोंता॒ तन्मे॒ मनंः शि॒वसंङ्कल्पमस्तु॥३४.४॥

(श्लो) येन॒ कर्मांणि प्र॒चरंन्ति॒ धीरा॒ यतों वा॒चा मनंसा चारु॒ यन्तिं। यत्स॒म्मित॒मनुं स॒ंयन्तिं प्रा॒णिन॒स्तन्मे॒ मनंः शि॒वसंङ्क॒ल्पमंस्तु॥

(शुक्ल) येन॒ कर्मांण्य॒पसों मनी॒षिणों य॒ज्ञे कृ॒ण्वन्तिं वि॒दथेंषु॒ धीराः। यदंपूर्वं य॒क्षम॒न्तः प्र॒जानां॒ तन्मे॒ मनंः शि॒वसंङ्कल्पमस्तु॥३४.२॥

(शुक्ल) यत्प्र॒ज्ञानंमु॒त चेतो॒ धृतिंश्च॒ यज्ज्योतिं॒रन्त॒रमृतं प्र॒जासुं। यस्मा॒न्न ऋ॒ते किञ्च॒ न कर्मं क्रि॒यते॒ तन्मे॒ मनंः शि॒वसंङ्कल्पमस्तु॥३४.३॥

(शुक्ल) सु॒षा॒र॒थिरश्वांनिव॒ यन्मंनु॒ष्याँन्नेनी॒यते॒ऽभीशुंभिर्वा॒जिनं इव। हृत्प्रतिं॒ष्ठं यदंजि॒रं जविं॒ष्ठं तन्मे॒ मनंः शि॒वसंङ्कल्पमस्तु॥३४.६॥

(शुक्ल) यस्मिन्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता
रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः
शिवसंङ्कल्पमस्तु॥३४.५॥

(श्लो) यदत्रं षष्ठं त्रिशतꣳ सुवीरं यज्ञस्यं गुह्यं नवनावमाय्यम्।
दश पञ्चं त्रिꣳशतं यत्परं च तन्मे मनः शिवसंङ्कल्पमस्तु॥

(शुक्ल) यज्ञाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरङ्गमं
ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंङ्कल्पमस्तु॥३४.१॥

(श्लो) येनेदं विश्वं जगतो बभूव यदेवापि महतो जातवेदाः।
तदेवाग्निस्तमसो ज्योतिरेकं तन्मे मनः शिवसंङ्कल्पमस्तु॥

(श्लो) येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसंङ्कल्पमस्तु॥

(श्लो) ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः।
ते श्रोत्रे चक्षुषी संचरन्तं तन्मे मनः शिवसंङ्कल्पमस्तु॥

(श्लो) अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत्।
सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसंङ्कल्पमस्तु॥

एका च दश शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं च
न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः
शिवसंङ्कल्पमस्तु॥

(श्लो) ये प॑ञ्च॒ पञ्च॑ दश श॒तꣳ स॒हस्र॑मयु॒तं न्य॑र्बुदं च। ते
अ॑ग्निचि॒त्येष्ट॑का॒स्तꣳ शरी॑रं॒ तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑मादि॒त्यव॑र्णं॒ तम॑सः॒ पर॑स्तात्। यस्य॒ योनिं॒
परि॒पश्य॑न्ति॒ धीरा॒स्तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) यस्ये॒दं धीरा᳚ः पु॒नन्ति॑ क॒वयो᳚ ब्रह्माण॑मे॒तं त्वा॑ वृणत॒
इन्दु᳚म्। स्था॒व॒रं जङ्ग॑मं॒ द्यौरा॑का॒शं तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) परा᳚त्प॒रत॑रं चै॒व॒ य॒त्परा᳚च्चैव॒ यत्प॑रम्। य॒त्परा॑त्पर॑तो ज्ञे॒यं॒
तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) परा᳚त्प॒रत॑रो ब्र॒ह्मा॒ त॒त्परा᳚त्प॒रतो ह॑रिः।
त॒त्परा॑त्पर॑तोऽधी॒श॒स्तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) या वे॑दा॒दिषु॑ गाय॒त्री॒ स॒र्वव्या॑पी म॒हेश्व॑री। ऋग्यजु॑ः
सामा॑थर्वै॒श्च॒ तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) यो वै᳚ दे॒वं म॑हादे॒वं॒ प्र॒णवं॑ प॒रमेश्व॑रम्। यः सर्वे॑ सर्व॑वेदे॒श्च॒
तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) प्रय॑तः॒ प्रण॑वोङ्का॒रं॒ प्र॒णवं॑ पु॒रुषोत्त॑मं। ओङ्का॑रं॒ प्रण॑वात्मा॒नं॒
तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) योऽसौ᳚ स॒र्वेषु॑ वेदे॒षु॒ प॒ठ्यते᳚ ह्यज॒ ईश्व॑रः। अ॒कायो॑ निर्गु॑णो
ह्या॒त्मा॒ तन्मे॒ मन॑ः शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) गोभि॒र्जुष्टं॑ धने॑न॒ ह्यायु॑षा च॒ बले॑न च। प्र॒जया॑ प॒शुभिः॑ पुष्करा॒क्षं तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) कैला॑स॒शिख॑रे र॒म्ये॒ श॒ङ्कर॑स्य शि॒वाल॑ये। दे॒वता॑स्तत्र॑ मोद॒न्ते॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) कैला॑स॒शिख॑रावा॒सं॒ हि॒मव॑द्गिरि॒संस्थि॑तम्। नील॑क॒ण्ठं त्रि॑णेत्र॒ं च॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

त्र्यं॑म्बकं यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्। उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॒त्तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्। संबा॒हुभ्यां॒ नम॑ति॒ संपत॑त्रै॒र्द्यावा॑पृथि॒वी ज॒नय॑न्दे॒व एक॒स्तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) च॒तुरो॑ वे॒दान॑धीयी॒त॒ स॒र्वशा॑स्त्रम॒यं वि॑दुः। इ॒ति॒हा॒सपु॑राणा॒ना॒ं तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्। मा नो॑ वधीः पि॒तर॒ं मोत मा॒तरं॑ प्रि॒या मा न॑स्त॒नुवो॑ रुद्र रीरिष॒स्तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः। वी॒रान्मानो॑ रुद्र भामि॒तो व॑धीर्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

ऋ॒तꣳ स॒त्यं प॑रं ब्र॒ह्म पु॒रुषं॑ कृष्ण॒ पिङ्ग॑लम्। ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं॒ वि॒श्वरू॑पाय॒ वै नमो॒ नम॒स्तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

कद्रु॒द्राय॒ प्रचे॑तसे मी॒ढुष्ट॑माय॒ तव्य॑से। वो॒चेम॒ शन्त॑मꣳ हृ॒दे। सर्वो॒ ह्ये॑ष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

ब्रह्म॑जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द् विसी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॒स्तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

यः प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑। य ईशे॑ अ॒स्य द्वि॒पद॒श्चतु॑ष्पद॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः। यस्य॑ छा॒याऽमृत॒ं यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु य ओष॑धीषु॒ यो रु॒द्रो विश्वा॒ भुव॑नाऽऽवि॒वेश॒ तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॒ तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

ग॒न्ध॒द्वा॒रां दु॑राध॒र्षा॒ं नि॒त्यपु॑ष्टां करी॒षिणी॑म्। ई॒श्वरी॑ꣳ सर्व॑भूता॒ना॒ं तामि॒होप॑ह्वये॒ श्रियं तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) न॒मकं॑ चम॑कं चै॒व॒ पु॒रु॒षसू॑क्तं च॒ यद्वि॑दुः। महादेवं च॑ तत्तु॒ल्य॒ं तन्मे॒ मनः॑ शि॒वसं॑ङ्क॒ल्पम॑स्तु॥

(श्लो) य इ॒दꣳ शि॒वस॑ङ्क॒ल्पꣳ स॒दा ध्या॑यन्ति ब्राह्म॑णाः। ते प॒रं मोक्षं॑ गमिष्य॒न्ति॒ तन्मे॒ मनः॑ शि॒वस॑ङ्क॒ल्पम॑स्तु॥

ॐ नमो भगवते॑ रुद्रा॒य। शिवसङ्कल्पं हृदयाय नमः।

पुरुषसूक्तम्

सर्वदेवाभिषेचने, षोडचोपचारपूजायां, महान्यासे च विनियोगः

तै॰आ॰ ३.१२

स॒हस्र॑शीर्षा॒ पुरु॑षः। स॒ह॒स्रा॒क्षः स॒हस्र॑पात्। स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा। अत्य॑तिष्ठद् दशाङ्गु॒लम्॥ पुरु॑ष ए॒वेदꣳ सर्व॑म्। यद्भू॒तं यच्च॒ भव्य॑म्। उ॒ताम॑तृ॒त्वस्येशा॑नः। यदन्ने॑नाति॒रोह॑ति॥ ए॒तावा॑नस्य महि॒मा। अतो॒ ज्याया॑ꣳश्च॒ पूरु॑षः॥

पादो॑ऽस्य॒ विश्वा॑ भूतानि॑। त्रि॒पाद॑स्या॒मृतं॑ दि॒वि॥ त्रि॒पादू॒र्ध्व उदै॒त् पुरु॑षः। पादो॑ऽस्ये॒हाऽभ॑वा॒त् पुनः॑। ततो॒ विश्व॒ं व्य॑क्रामत्। सा॒श॒ना॒न॒श॒ने अ॒भि॥ तस्मा॑द् वि॒राड॑जायत। वि॒राजो॒ अधि॒ पूरु॑षः। स जा॒तो अत्य॑रिच्यत। प॒श्चाद् भूमि॒मथो॑ पु॒रः॥

यत् पुरु॑षेण ह॒विषा॑। दे॒वा य॒ज्ञमत॑न्वत। व॒स॒न्तो अ॑स्यासी॒दाज्य॑म्। ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः॥ स॒प्तास्या॑ऽसन् परि॒धय॑ः। त्रिः स॒प्त स॒मिध॑ः कृ॒ताः। दे॒वा यद् य॒ज्ञं त॑न्वा॒नाः। अब॑ध्न॒न् पुरु॑षं प॒शुम्॥ तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न्। पुरु॑षं जा॒तम॑ग्र॒तः॥

तेन॑ दे॒वा अय॑जन्त। सा॒ध्या ऋष॑यश्च॒ ये॥ तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॑ः। संभृ॑तं पृषदा॒ज्यम्। प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑।

आरण्यान् ग्राम्याश्च ये॥ तस्माद् यज्ञात् सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः॥ यत् पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते॥ ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः॥

ऊरू तदस्य यद् वैश्यः। पद्भ्यां शूद्रो अजायत॥ चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद् वायुरजायत॥ नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकां अकल्पयन्॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते॥ धाता पुरस्ताद् यमुदाजहार। शक्रः प्रविद्वान् प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥

(तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीः स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे। ॐ शान्तिः शान्तिः शान्तिः॥)

पुरुषसूक्तं शिरसे स्वाहा।

उत्तरनारायणम्

सर्वदेवाभिषेचने, महान्यासे च विनियोगः

तै॰आ॰ ३.१३

अ॒द्भ्यः संभू॑तः पृथि॒व्यै रसा᳚च्च। वि॒श्वक॑र्मणः॒ सम॑वर्त॒ताधि॑। तस्य॒ त्वष्टा॑ वि॒दध॑द् रू॒पमे॑ति। तत् पुरु॑षस्य॒ विश्व॒मा॑जान॒मग्रे᳚। वेदा॒हमे॒तं पुरु॑षं म॒हान्त᳚म्। आ॒दि॒त्यव॑र्णं॒ तम॑सः॒ पर॑स्तात्। तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति। नान्यः पन्था॑ विद्यतेऽय॑नाय॥ प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः। अ॒जाय॑मानो बहु॒धा विजा॑यते॥

तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि᳚म्। मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः॥ यो दे॒वेभ्य॒ आत॑पति। यो दे॒वाना᳚ं पु॒रोहि॑तः। पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः। नमो॑ रु॒चाय॒ ब्राह्म॑ये॥ रुचं॑ ब्रा॒ह्मं ज॒नय॑न्तः। दे॒वा अग्रे॒ तद॑ब्रुवन्। यस्त्वै॒वं ब्रा᳚ह्म॒णो वि॒द्यात्। तस्य॑ दे॒वा अस॒न् वशे᳚॥ ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ᳚। अ॒हो॒रा॒त्रे पा॒र्श्वे। नक्ष॑त्राणि रू॒पम्। अ॒श्विनौ॒व्यात्त᳚म्। इ॒ष्टं म॑निषाण। अ॒मुं म॑निषाण। सर्वं॑ मनिषाण॥

उत्तरनारायणं शिखायै वषट्।

अप्रतिरथम्

उदकशान्त्यन्तर्गतानुवाकोऽयं 316 तमे पुटे द्रष्टव्याः

आ॒शुः शिशा॑नः ००० ॥

तै॰सं॰ ५.४.६.४

(असु॑रानजय॒न्तदप्र॑तिरथस्याप्रतिर॒थत्वं यदप्र॑तिरथं द्वि॒तीयो॒ होता॒ऽन्वाहा᳚प्र॒त्ये॑व तेन॒ यज॑मानो॒ भ्रातृ॑व्यान् जय॒त्यथो॒ अन॑भिजितमे॒वाभि ज॑यति दश॒र्चं भ॑वति॒ दशा᳚क्षरा वि॒राड्

वि॒राजे॒मौ लो॒कौ विधृ॑ताव॒नयो॑र्लो॒कयो॒र्विधृ॑त्या॒ अथो॒ दशा॑क्षरा वि॒राडन्नं॑ वि॒राड् वि॒राज्ये॒वान्नाद्ये॒ प्रति॑ तिष्ठत्यस॑दिव॒ वा अ॒न्तरि॑क्षम॒न्तरि॑क्षमि॒वा ऽग्नी॑ध्र॒माग्नी॑ध्रे॥)

प्रति पूरुषम् (सं०)

तै०सं० १.८.६

प्र॒ति॒पू॒रु॒षमेक॑कपाला॒न्निर्व॑प॒त्येक॒मति॑रिक्तं॒ याव॑न्तो गृ॒ह्याः॑ स्मस्तेभ्य॒ः कम॑करं पश॒ूनां॑ शर्मा॑सि॒ शर्म॒ यज॑मानस्य॒ शर्म॑ मे य॒च्छैक॑ ए॒व रु॒द्रो न द्वि॒तीया॑य तस्थ आ॒खुस्ते॑ रुद्र प॒शुस्तं जु॑षस्वै॒ष ते॑ रुद्र भा॒गः स॒ह स्वस्रा ऽम्बि॑कया॒ तं जु॑षस्व भेष॒जं गवे ऽश्वा॑य॒ पुरु॑षाय भेष॒जमथो॑ अ॒स्मभ्यं॑ भेष॒जं॑ सुभे॑षज॒ं यथा ऽस॑ति। सु॒गं मे॒षाय॑ मे॒ष्यां॑ अवा॑म्ब रु॒द्रम॑दिम॒ह्यव॑ दे॒वं त्र्यं॑म्बकम्। यथा॑ न॒ः श्रेय॑स॒ः कर॒द्यथा॑ नो॒ वस्य॑स॒ः कर॒द्यथा॑ नः पश॒ुमत॒ः कर॒द्यथा॑नो व्यवसा॒यया॑त्। त्र्यं॑म्बकं यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्। उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ मा ऽमृता॑त्॥ ए॒ष ते॑ रुद्र भा॒गस्तं जु॑षस्व॒ तेना॑व॒सेन॑ प॒रो मूज॑व॒तो ऽती॒ह्यव॑ततधन्वा॒ पिना॑कहस्त॒ः कृत्ति॑वासाः॥

प्रति पूरुषम् (ब्रा०)

तै०ब्रा० १.६.१०

प्र॒ति॒पू॒रु॒षमेक॑कपाला॒न्निर्व॑पति। जा॒ता ए॒व प्र॒जा रु॒द्रान्नि॒रव॑दयते। ए॒कमति॑रिक्तम्। ज॒नि॒ष्यमा॑णा ए॒व प्र॒जा रु॒द्रान्नि॒रव॑दयते। एक॑कपाला भवन्ति। ए॒क॒धैव रु॒द्रन्नि॒रव॑दयते। नाभिघा॑रयति। यद॑भिघा॒रयै॑त्। अ॒न्त॒र॒व॒चा॒रिणं॑ रु॒द्रं कु॑र्यात्। ए॒को॒ल्मु॒केन॑ यन्ति।

तद्धि रुद्रस्य भागधेयम्। इमां दिशं यन्ति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदयते। रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्। न ग्राम्यान् पशून् हिनस्ति। नारण्यान्। चतुष्पथे जुहोति। एष वा अग्नीनां पड्बीशो नाम। अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति। स्रुग्घ्येषा। अथो खलु। अन्तमेनैव होतव्यम्। अन्तत एव रुद्रं निरवदयते। एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा। तया वा एष हिनस्ति। यꣳ हिनस्ति। तयैवैनꣳ सह शमयति। भेषजं गव इत्याह। यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजं करोति। अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामा शास्ते। त्र्यम्बकं यजामह इत्याह। मृत्योर्मुक्षीय माऽमृतादिति वावैतदाह। उत्किरन्ति। भगस्य लीप्सन्ते। मूते कृत्वाऽसजन्ति। यथाजनं यतेऽवसं करोति। तादृगेव तत्। एष ते रुद्र भाग इत्याह निरवत्यै। अप्रतीक्षमा यन्ति। अपः परिषिञ्चति। रुद्रस्यान्तर्हित्यै। प्र वा एतेऽस्माल्लोकाच्च्यवन्ते। ये त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः। अस्यामेव प्रति तिष्ठन्ति॥

ऋ॰सं॰ १०.१७०.१

(ऋ॰) (विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति॥)

शतरुद्रीयम् (सं॰)

तै॰सं॰ १.३.१४

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वꣳ शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे। त्वं वातै॑ररु॒णैर्या॑सि शङ्ग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना᳚। आ वो॒ राजा॑नमध्व॒रस्य॑ रु॒द्रꣳ होता॑रꣳ सत्य॒यज॒ꣳ रोद॑स्योः। अ॒ग्निं पु॒रा त॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरूप॒मव॑से कृणुध्वम्। अ॒ग्निर्होता॒ नि ष॑सादा॒ जयी॑यानु॒पस्थे॑ मा॒तुः सु॑र॒भावु॑ लो॒के। युवा॑ क॒विः पु॑रुनि॒ष्ठर्ऋ॒तावा॑ ध॒र्ता कृ॑ष्टी॒नामु॒त मध्य॑ इ॒द्धः।

सा॒ध्वीम॑कर्दे॒ववी॑तिं नो अ॒द्य य॒ज्ञस्य॑ जि॒ह्वाम॑विदाम॒ गुह्या᳚म्। स आयु॒रागा᳚त् सुर॒भिर्वसा॑नो भ॒द्राम॑कर्दे॒वहू॑तिं नो अ॒द्य। अक्र॑न्दद॒ग्निः स्त॒नय॑न्निव॒ द्यौः क्षामा॒ रेरि॑हद् वी॒रुधः॑ सम॒ञ्जन्। स॒द्यो ज॑ज्ञा॒नो वि हीमि॒द्धो अख्य॒दा रोद॑सी भा॒नुना॑ भात्य॒न्तः। त्वे वसू॑नि पुर्वणीक होतर्दो॒षा वस्तो॒रेरि॑रे य॒ज्ञिया॑सः।

क्षामे॑व॒ विश्वा॒ भुव॑नानि॒ यस्मि॒न् सꣳ सौभ॑गानि दधि॒रे पा॑व॒के। तुभ्य॒ं ता अ॑ङ्गिरस्तम॒ विश्वाः᳚ सुक्षि॒तय॒ः पृथ॑क्। अग्ने॒ कामा॑य येमिरे। अ॒श्याम॒ तं काम॑मग्ने॒ तवो॒त्य॑श्याम॑ र॒यिꣳ र॑यिवः सु॒वीर᳚म्। अ॒श्याम॒ वाज॑म॒भि वा॒जय॑न्तो॒ऽश्याम॑ द्यु॒म्नम॑जरा॒जर॑न्ते। श्रेष्ठ॑ं यविष्ठ भार॒ताग्ने᳚ द्यु॒मन्त॒मा भ॑र।

वसो॑ पुरु॒स्पृह॑ꣳ र॒यिम्। सः श्वि॑ता॒नस्त॑न्य॒तू रो॑चन॒स्था अ॒जरे॑भि॒र्नान॑दद्भि॒र्यवि॑ष्ठः। यः पा॑व॒कः पु॑रु॒तमः॑ पु॒रूणि॑ पृ॒थून्य॒ग्निर॑नु॒याति॒ भर्व॑न्। आयु॑ष्टे वि॒श्वतो॑ दधद॒यम॒ग्निर्वरे᳚ण्यः। पुन॑स्ते प्रा॒ण आय॑ति॒ परा॒ यक्ष॑ꣳ सुवामि ते। आ॒यु॒र्दा अ॑ग्ने ह॒विषो॑

जुषा॒णो घृ॒तप्र॑तीको घृ॒तयो॑निरेधि। घृ॒तं पी॒त्वा मधु॒ चारु॒ गव्यं॑
पि॒तेव॑ पु॒त्रम॒भि र॑क्षतादि॒मम्।

तस्मै॑ ते प्रति॒हर्य॑ते॒ जात॑वेदो॒ विच॑र्षणे। अग्ने॒ जना॑मि सुष्टु॒तिम्।
दि॒वस्परि॑ प्रथ॒मं ज॑ज्ञे अ॒ग्निर॒स्मद् द्वि॒तीयं॒ परि॑ जा॒तवे॑दाः।
तृ॒तीय॑म॒प्सु नृ॒मणा॒ अज॑स्र॒मिन्धा॑न एनं जरते स्वा॒धीः। शुचि॑ः
पावक॒ वन्द्योऽग्ने॑ बृ॒हद्वि रो॑चसे। त्वं घृ॒तेभि॒राहु॑तः। दृ॒शा॒नो रु॒क्म
उ॒र्व्या व्य॑द्यौद् दु॒र्मर्ष॒मायु॑ः श्रि॒ये रु॑चा॒नः। अ॒ग्निर॒मृतो॑ अभव॒द्
वयो॑भि॒र्यदे॑नं॒ द्यौरज॑नयत् सु॒रेता᳚ः।

आ यदि॒षे नृ॒पतिं॒ तेज॒ आन॒ट्छुचि॒ रेतो॒ निषि॑क्तं॒ द्यौर॒भीके᳚। अ॒ग्निः
शर्ध॑मनव॒द्यं युवा॑नꣳ स्वा॒धियं॑ जनयत् सू॒दय॑च्च। स तेजी॑यसा॒
मन॑सा॒ त्वोत॑ उ॒त शि॑क्ष स्वप॒त्यस्य॑ शि॒क्षोः। अग्ने॑ रा॒यो नृत॑मस्य॒
प्रभू॑तौ भू॒याम॑ ते सुष्टु॒तय॑श्च॒ वस्वः॑। अग्ने॒ सह॑न्त॒मा भ॑र द्यु॒म्नस्य॑
प्रा॒सहा॑ र॒यिम्।

विश्वा॒ यश्च॑र्षणीर॒भ्या॑सा वाजे॑षु सा॒सह॑त्। तम॑ग्ने पृतना॒सह॑ꣳ र॒यिꣳ
स॑हस्व॒ आ भ॑र। त्वꣳ हि स॒त्यो अद्भु॑तो दा॒ता वाज॑स्य॒ गोम॑तः।
उ॒क्षान्ना॑य व॒शान्ना॑य॒ सोम॑पृष्ठाय वे॒धसे᳚। स्तोमै᳚र्विधेमा॒ग्नये᳚। व॒द्मा हि
सू॑नो॒ अस्य॑द्म॒सद्वा॑ च॒क्रे अ॒ग्निर्ज॒नुषाज्मान्न᳚म्। स त्वं न॑ ऊर्जसन॒
ऊर्जं॑ धा॒ राजे॑व जेरवृ॒के क्षे᳚ष्य॒न्तः।

अग्न॒ आयू॑ꣳषि पवस॒ आ सु॒वोर्ज॒मिषं॑ च नः। आ॒रे बा॑धस्व
दु॒च्छुना᳚म्। अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे वर्चः॑ सु॒वीर्य᳚म्। दध॒त् पोष॑ꣳ
र॒यिं मयि॑। अग्ने॑ पावक रो॒चिषा॑ म॒न्द्रया॑ देव जि॒ह्वया᳚। आ दे॒वान्

व॑क्षि॒ यक्षि॑ च। स न॑ः पावक दीदि॒वोऽग्ने॑ दे॒वाꣳ इ॒हा व॑ह। उप॑ य॒ज्ञꣳ ह॒विश्च॑ नः। अ॒ग्निः शुचि॑ व्रतत॒मः शु॒चि॒र्विप्र॑ः शुचि॑ः क॒विः। शुची॑ रोचत॒ आहु॑तः। अद॑ग्ने॒ शुच॑य॒स्तव॑ शु॒क्रा भ्राज॑न्त ईरते। तव॒ ज्योती॑ꣳष्य॒र्चय॑ः॥

शतरुद्रीयम् (ब्रा०)

तै॰ब्रा॰ ३.११.२

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वः। त्वꣳ शर्धो॒ मारु॑तं पृ॒क्ष ईशिषे। त्वं वातै॑ररु॒णैर्या॑सि शंग॒यः। त्वं पूषा वि॑ध॒तः पा॑सि॒ नु त्मना॑ँ। देवा॑ दे॒वेषु॑ श्रयध्वम्। प्रथ॑मा द्वि॒तीये॑षु श्रयध्वम्। द्विती॑यास्तृ॒तीये॑षु श्रयध्वम्। तृती॑याश्चतु॒र्थेषु॑ श्रयध्वम्। च॒तु॒र्थाः प॑ञ्च॒मेषु॑ श्रयध्वम्। प॒ञ्च॒माः ष॒ष्ठेषु॑ श्रयध्वम्। ष॒ष्ठाः स॑प्त॒मेषु॑ श्रयध्वम्। स॒प्त॒मा अ॑ष्ट॒मेषु॑ श्रयध्वम्। अ॒ष्ट॒मा न॑व॒मेषु॑ श्रयध्वम्। न॒व॒मा द॑श॒मेषु॑ श्रयध्वम्। द॒श॒मा ए॑काद॒शेषु॑ श्रयध्वम्। ए॒का॒द॒शा द्वा॑द॒शेषु॑ श्रयध्वम्। द्वा॒द॒शास्त्र॑योद॒शेषु॑ श्रयध्वम्। त्र॒यो॒द॒शाश्च॑तुर्द॒शेषु॑ श्रयध्वम्। च॒तु॒र्द॒शाः प॑ञ्चद॒शेषु॑ श्रयध्वम्। प॒ञ्च॒द॒शाः षो॑ड॒शेषु॑ श्रयध्वम्। षो॒ड॒शाः स॑प्तद॒शेषु॑ श्रयध्वम्। स॒प्त॒द॒शा अ॑ष्टाद॒शेषु॑ श्रयध्वम्। अ॒ष्टा॒द॒शा ए॑कान्नवि॒ꣳशेषु॑ श्रयध्वम्। ए॒का॒न्न॒वि॒ꣳशा वि॒ꣳशेषु॑ श्रयध्वम्। वि॒ꣳशा ए॑कवि॒ꣳशेषु॑ श्रयध्वम्। ए॒क॒वि॒ꣳशा द्वा॑वि॒ꣳशेषु॑ श्रयध्वम्। द्वा॒वि॒ꣳशास्त्र॑योवि॒ꣳशेषु॑ श्रयध्वम्। त्र॒यो॒वि॒ꣳशाश्च॑तुर्वि॒ꣳशेषु॑ श्रयध्वम्। च॒तु॒र्वि॒ꣳशाः प॑ञ्चवि॒ꣳशेषु॑ श्रयध्वम्। प॒ञ्च॒वि॒ꣳशाः ष॑ड्वि॒ꣳशेषु॑ श्रयध्वम्। ष॒ड्वि॒ꣳशाः स॑प्तवि॒ꣳशेषु॑ श्रयध्वम्। स॒प्त॒वि॒ꣳशा अ॑ष्टावि॒ꣳशेषु॑ श्रयध्वम्। अ॒ष्टा॒वि॒ꣳशा ए॑कान्नत्रि॒ꣳशेषु॑ श्रयध्वम्। ए॒का॒न्न॒त्रि॒ꣳशास्त्रि॒ꣳशेषु॑ श्रयध्वम्। त्रि॒ꣳशा ए॑कत्रि॒ꣳशेषु॑ श्रयध्वम्।

एकत्रिꣳशा द्वाँत्रिꣳशेषु श्रयध्वम्। द्वात्रिꣳशास्त्रयस्त्रिꣳशेषु श्रयध्वम्। देवाँस्त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशाः। उत्तरे भवत। उत्तरवर्त्मान उत्तरसत्वानः। यत्काम इदं जुहोमि। तन्मे समृध्यताम्। वयꣳ स्याम पतयो रयीणाम्। भूर्भुवः स्वः स्वाहा॥

शतरुद्रीयम् अस्त्राय फट्।

पञ्चाङ्गम्

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

प्रतद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

तत्सवितुर्वृणीमहे। वयं देवस्य भोजनम्। श्रेष्ठꣳ सर्वधातमम्। तुरं भगस्य धीमहि॥

विष्णुर्योनिं कल्पयतु। त्वष्टा रूपाणि पिꣳशतु। आसिञ्चतु प्रजापतिः। धाता गर्भं दधातु ते॥

अष्टाङ्गम्

उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते॥

हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्। स दा॑धारपृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ उरसा उमामहेश्वराभ्यां नमः॥

यः प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑। य ईशे॑ अ॒स्य द्वि॒पद॒श्चतु॑ष्पद॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥ शिरसा उमामहेश्वराभ्यां नमः॥

ब्रह्म॑जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द् विसी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑ः॥ दृष्ट्या उमामहेश्वराभ्यां नमः॥

म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम्। पि॒पृ॒तान्नो॒ भरी॑मभिः॥ मनसा उमामहेश्वराभ्यां नमः॥

उप॑श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्। स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑सेध॒ शत्रू॑न्॥ वचसा उमामहेश्वराभ्यां नमः॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान्। यु॒यो॒ध्य॑स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑ उक्तिं विधेम। पद्भ्यां उमामहेश्वराभ्यां नमः॥

या ते॑ अग्ने॒ रुद्रि॑या त॒नूस्तया॑ नः पाहि॒ तस्या॑स्ते॒ स्वाहा॑॥ कराभ्यां उमामहेश्वराभ्यां नमः॥

इ॒मं य॑मप्रस्त॒रमाहि सीदाङ्गि॑रोभिः पि॒तृभि॑ः सं॑विदा॒नः। आत्त्वा॒ मन्त्रा॑ः कविश॒स्ता व॑हन्त्वे॒ना रा॑जन् ह॒विषा॑ मादयस्व॥ कर्णाभ्यां उमामहेश्वराभ्यां नमः॥

लघुशिवन्यासः

ॐ। प्रजनने ब्रह्मा तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयोर्हरस्तिष्ठतु। बाह्वोरिन्द्रस्तिष्ठतु। जठरे अग्निस्तिष्ठतु। हृदये शिवस्तिष्ठतु। कण्ठे वसवस्तिष्ठन्तु। वक्त्रे सरस्वतीतिष्ठतु। नासिकयोर्वायुस्तिष्ठतु। नयनयोश्चन्द्रादित्यौतिष्ठेताम्। कर्णयोरश्विनौ तिष्ठेताम्। ललाटे रुद्राः तिष्ठन्तु। मूर्धनि आदित्यास्तिष्ठन्तु। शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिः सर्वतोऽग्निज्वालामालापरिवृतस्तिष्ठतु। सर्वेष्वङ्गेषु सर्वा देवता यथा यथास्थानानि तिष्ठन्तु। मां सकुटुम्बं रक्षन्तु।

साधारणन्यासः

तै॰ब्रा॰ ३.१०.८.४

अ॒ग्निर्मे॑ वा॒चि श्रि॒तः। वाग्घृद॑ये। हृद॑यं॒ मयि॑। अ॒ह॒ममृतं॑। अ॒मृतं॒ ब्रह्म॑णि॥

वा॒युर्मे॑ प्रा॒णे श्रि॒तः। प्रा॒णो हृद॑ये। ॰
सूर्यो॑ मे॒ चक्षु॑षि श्रि॒तः। चक्षु॒र्हृद॑ये। ॰
च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः। मनो॒ हृद॑ये। ॰

दिशो मे श्रोत्रे श्रिताः। श्रोत्रं हृदये। ०
आपो मे रेतसि श्रिताः। रेतो हृदये। ०
पृथिवी मे शरीरे श्रिता। शरीरं हृदये। ०
ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। ०
इन्द्रो मे बले श्रितः। बलं हृदये। ०
पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। ०
ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। ०
आत्मा म आत्मनि श्रितः। आत्मा हृदये। ०

पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्।
वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः।

ध्यानम्

अथात्मानं शिवात्मानं पञ्चास्यं चिन्तयेद्बुधः। त्रिलोचनं चतुर्बाहुं सर्वाऽभरणभूषितम्॥ नीलग्रीवं शशाङ्काङ्कं शुद्धस्फटिकसन्निभम्। नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकम्॥ कमण्डलुधरं देवं अक्षमालाधरं विभुम्। वरदाभयहस्तं च नमज्ञनवरप्रदम्॥ वृषपृष्ठसमारूढं उमादेहार्धधारिणम्। दुर्दन्तं कपिलजटं शिखामुद्योतधारिणम्॥ अमृतेनाप्लुतं हृष्टं दिव्यभोगसमन्वितम्। दिग्देवता समायुक्तं सुराऽसुरनमस्कृतम्॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्। सर्वव्यापिनं ईशानं रुद्रं वै विश्वरूपिणम्॥ एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्। आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वामनुगृहाण महेश्वर॥

हृत्पद्मकर्णिकामध्यात् उमया सह शङ्कर। आगच्छत्वं महादेव सर्वैरावरणैः सह॥

संक्षिप्तपूजा

आ त्वा॑ वहन्तु॒ हर॑यः॒ सचे॑तसः श्वे॒तैरश्वैः॑ स॒ह केतु॑म॒द्भि॒र्वाता॑जितै॒र्बल॑वद्भि॒र्मनो॑जवैः॒ राया॑हि शी॒घ्रं मम॑ ह॒व्याय॑ श॒र्वोम्। ईशानः सर्व॑विद्या॒ना॒मीश्वरः सर्व॑भूता॒नां॒ ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्। ईशानमावाहयामि॥ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत् त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥ स्थिरो भव। वरदो भव। सुप्रसन्नो भव। सुप्रतिष्ठितो भव॥

स॒द्योजा॒तं प्र॑पद्या॒मि। आसनं समर्पयामि। स॒द्योजा॒ताय॒ वै नमो॒ नमः॑। पाद्यं समर्पयामि। भ॒वे भ॑वे॒ नाति॑भवे भवस्व॒ माम्। अर्घ्यं समर्पयामि। भ॒वोद्भ॑वाय॒ नमः॑। आचमनीयं समर्पयामि। वा॒म॒दे॒वाय॒ नमः॑। स्नानं समर्पयामि। ज्ये॒ष्ठाय॒ नमः॑। वस्त्रं समर्पयामि। श्रे॒ष्ठाय॒ नमः॑। उपवीतं समर्पयामि। रु॒द्राय॒ नमः॑। आभरणं समर्पयामि। काला॑य॒ नमः॑। गन्धं समर्पयामि। कल॑विकरणाय॒ नमः॑। अक्षतान् समर्पयामि। बल॑विकरणाय॒ नमः॑। पुष्पाणि समर्पयामि। बला॑य॒ नमः॑। धूपमाघ्रापयामि। बल॑प्रमथनाय॒ नमः॑। दीपं दर्शयामि। सर्व॑भूतदमनाय॒ नमः॑। नैवेद्यं समर्पयामि। म॒नोन्म॑नाय॒ नमः॑। ताम्बूलं समर्पयामि। हिरण्यगर्भाय नमः॑। मङ्गलनीराजनदीपं दर्शयामि।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्।
संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन्देव एकः॥
विश्वतश्चक्षुरिति मन्त्रपुष्पं समर्पयामि।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥ तत्पुरुषाय नमः। वेदोक्तमन्त्रपुष्पं समर्पयामि। ईशानाय नमः। प्रदक्षिणनमस्कारादि सर्वोपचारपूजाः समर्पयामि।

अथास्याष्टभिर्मन्त्रैरष्टौ पुष्पाणि ददाति।

अर्कचम्पकपुन्नागनन्द्यावर्तानि पाटली। बृहतीकरवीराणी द्रोणपुष्पाणि चार्चयेत्॥ ॐ भवाय देवाय नमः। अर्क पुष्पं समर्पयामि। ॐ शर्वाय देवाय नमः। चम्पक पुष्पं समर्पयामि। ॐ ईशानाय देवाय नमः। पुन्नाग पुष्पं समर्पयामि। ॐ पशुपतये देवाय नमः। नन्द्यावर्त पुष्पं समर्पयामि। ॐ रुद्राय देवाय नमः। पाटली पुष्पं समर्पयामि। ॐ उग्राय देवाय नमः। बृहती पुष्पं समर्पयामि। ॐ भीमाय देवाय नमः। करवीर पुष्पं समर्पयामि। ॐ महते देवाय नमः। द्रोण पुष्पं समर्पयामि।

ॐ भवस्य देवस्य पत्न्यै नमः। अर्क पुष्पं समर्पयामि। ॐ शर्वस्य देवस्य पत्न्यै नमः। चम्पक पुष्पं समर्पयामि। ॐ ईशानस्य देवस्य पत्न्यै नमः। पुन्नाग पुष्पं समर्पयामि। ॐ पशुपतेर्देवस्य पत्न्यै नमः। नन्द्यावर्त पुष्पं समर्पयामि। ॐ रुद्रस्य देवस्य पत्न्यै नमः। पाटली पुष्पं समर्पयामि। ॐ उग्रस्य देवस्य पत्न्यै नमः। बृहती पुष्पं समर्पयामि। ॐ भीमस्य देवस्य पत्न्यै

नमः। करवीर पुष्पं समर्पयामि। ॐ मह॒तो दे॒वस्य॒ पत्न्यै॒ नमः। द्रोण पुष्पं समर्पयामि।

ॐ भवं देवं तर्पयामि। ॐ शर्वं देवं तर्पयामि। ॐ ईशानं देवं तर्पयामि। ॐ पशुपतिं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि। ॐ उग्रं देवं तर्पयामि। ॐ भीमं देवं तर्पयामि। ॐ महान्तं देवं तर्पयामि॥ ॐ भवस्य देवस्य पत्नीं तर्पयामि। ॐ शर्वस्य देवस्य पत्नीं तर्पयामि। ॐ ईशानस्य देवस्य पत्नीं तर्पयामि। ॐ पशुपतेर्देवस्य पत्नीं तर्पयामि। ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि। ॐ उग्रस्य देवस्य पत्नीं तर्पयामि। ॐ भीमस्य देवस्य पत्नीं तर्पयामि। ॐ महतो देवस्य पत्नीं तर्पयामि॥

अथास्याघोरतनूरुपतिष्ठते। अ॒घोरे॓भ्योऽथ॒ घोरे॓भ्यो॒ घोर॒ घोर॑तरेभ्यः। सर्वे॓भ्यः सर्व॒ शर्वे॓भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥ तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि। तन्नो॑ रुद्रः प्रचो॒दया॓त्॥ ईशानः सर्व॑विद्या॒ना॒मीश्वरः सर्व॑भूता॒नां॒ ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्। इति दशकृत्वः शतकृत्वः सहस्रकृत्वोऽपरिमितकृत्वो वा।

अथैनमायुराशास्त इति जपेत्॥ आयु॒राशा॓स्ते॒ऽयं यज॑मानो॒ऽसौ। आयु॒राशा॓स्ते। सु॒प्र॒जा॒स्तमाशा॓स्ते। स॒जा॒त॒व॒न॒स्यामाशा॓स्ते। उत्त॑रां देवय॒ज्यामाशा॓स्ते। भूयो॑ हवि॒ष्कर॑ण॒माशा॓स्ते। दि॒व्यं धमाशा॓स्ते। विश्वं॑ प्रि॒यमाशा॓स्ते। यद॒नेन॑ ह॒विषाऽऽशा॓स्ते। तद॑श्या॒त्तदृ॑ध्यात्। तद॑स्मै दे॒वा रा॑सन्ताम्। तद॒ग्निर्दे॒वो दे॒वेभ्यो॒ वन॑ते।

व॒यम॒ग्नेर्मानु॑षाः। इ॒ष्टं च॑ वी॒तं च॑। उ॒भे च॑ नो॒ द्यावा॑पृथि॒वी अꣳहं॑सस्पाताम्। इ॒हगति॑र्वा॒मस्ये॒दं च॑। नमो॑ दे॒वेभ्यः॑।

रुद्रप्रश्नन्यासः

तै॰सं॰ १.५.३॥ ४.४.४॥ १.४.१३॥ ४.६.४॥ ४.५.१॥ ४.५.१०॥

मनो॒ ज्योति॑र्जुषता॒माज्यं॒ विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धातु। या इ॒ष्टा उ॒षसो॑ नि॒म्रुत॑श्च॒ ताः सन्द॑धामि ह॒विषा॑ घृ॒तेन॑॥ ब्रह्मात्मने हृदयाय नमः॥ अबो॑ध्य॒ग्निः स॒मिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाऽऽय॒तीमु॒षास॑म्। य॒ह्वा इ॑व॒ प्रव॒यामु॒ज्जिहा॑ना॒ः प्रभा॒नवः॑ सिस्रते॒ नाक॒मच्छ॑॥ विष्णवात्मने शिरसे स्वाहा॥ मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒ताय॑ जा॒तम॒ग्निम्। क॒विꣳ स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः। रुद्रात्मने शिखायै वषट्॥ मर्मा॑णि ते॒ वर्म॑भिश्छादयामि॒ सोम॑स्त्वा॒ राजा॒ऽमृते॑ना॒भिऽव॑स्ताम्। उ॒रोर्वरी॑यो॒ वरि॑वस्ते अस्तु॒ जय॑न्तं॒ त्वामनु॑ मदन्तु दे॒वाः। ईश्वरात्मने कवचाय हुम्॥ विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त। अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑॥ सदाशिवात्मने नेत्रत्रयाय वौषट्॥ स॒हस्रा॑णि सहस्र॒धा बा॑हु॒वोस्तव॑ हे॒तयः॑। तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि॥ सर्वात्मने अस्त्राय फट्॥ ॐ नमो भगवते॑ रुद्रा॒य॥

रुद्रप्रश्नः

तै॰सं॰ ४.५

नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नमः॑। नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नमः॑॥ या त॒ इषुः॑ शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनुः॑।

शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय॥ या ते॑ रुद्र शि॒वा
त॒नूरघो॒राऽपा॑पकाशिनी। तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भि
चा॑कशीहि॥ यामिषुं॑ गिरिशन्त॒ हस्ते॒ बिभ॒र्ष्यस्त॑वे। शि॒वां गि॑रित्र॒
तां कु॑रु॒ मा हि॑ꣳसीः॒ पुरु॑षं॒ जग॑त्॥ शि॒वेन॒ वच॑सा त्वा॒
गिरि॒शाच्छा॑ वदामसि। यथा॑ नः॒ सर्व॒मिज्जग॑दय॒क्ष्मꣳ सु॒मना॒
अस॑त्॥ अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक्। अहीꣳ॑श्च॒
सर्वा᳚न् ज॒म्भय॒न् सर्वा᳚श्च यातुधा॒न्य॑ः॥ अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त
ब॒भ्रुः सु॑म॒ङ्गल॑ः। ये चे॒माꣳ रु॒द्रा अ॒भितो॑ दि॒क्षु श्रि॒ताः
स॑हस्र॒शोऽवै॑षा॒ꣳ हेड॑ ईमहे॥ अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒
विलो॑हितः। उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्य॑ः। उ॒तैनं॒ विश्वा॑
भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः॥ नमो॑ अस्तु॒ नील॑ग्रीवाय
सहस्रा॒क्षाय॑ मी॒ढुषे᳚। अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकरं॒ नम॑ः॥
प्र मु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्याम्। याश्च॑ ते॒ हस्त॒ इष॑व॒ः परा॒
ता भ॑गवो वप॥ अ॒व॒तत्य॒ धनु॒स्त्वꣳ सह॑स्राक्ष॒ शते॑षुधे। नि॒शीर्य॑
श॒ल्याना॒ं मुखा॑ शि॒वो न॑ः सु॒मना॑ भव॥ विज्यं॒ धनु॑ः कप॒र्दिनो॒
विश॑ल्यो॒ बाण॑वाꣳ उ॒त। अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथि॑ः॥ या
ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑ः। तया॒ऽस्मान्
वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज॥ नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय
धृ॒ष्णवे᳚। उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒ं तव॒ धन्व॑ने॥ परि॑ ते॒
धन्व॑नो हे॒तिर॒स्मान् वृ॑णक्तु वि॒श्वत॑ः। अथो॒ य इ॑षु॒धिस्तवा॒रे
अ॒स्मन्नि धे॑हि॒ तम्॥१॥

(नम॑स्ते अस्तु भगवन् विश्वेश्व॒राय॑ महादे॒वाय॑ त्र्यम्ब॒काय॑ त्रिपुरान्त॒काय॑ त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑ नीलक॒ण्ठाय॑ मृत्युञ्ज॒याय॑ सर्वेश्व॒राय॑ सदाशि॒वाय॑ श्रीमन्महादे॒वाय॒ नमः॑॥)

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒ ❁ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमो॒ ❁ नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒ ❁ नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये नमो॒ ❁ नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये नमो॒ ❁ नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒ पत॑ये॒ नमो॒ ❁ नमो॑ रु॒द्राया॑ऽऽतता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ ❁ नमः॑ सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒ ❁ नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒ ❁ नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये नमो॒ ❁ नमो॑ भुव॒न्तये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒ ❁ नम॑ उ॒च्चैर्घो॑षायाऽऽक्र॒न्दय॑ते पत्ती॒नां पत॑ये॒ नमो॒ ❁ नमः॑ कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्त्व॑नां॒ पत॑ये॒ नमः॑॥२॥

नमः॒ सह॑मानाय निव्या॒धिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ ❁ नमः॑ ककु॒भाय॑ निष॒ङ्गिणेँ॑ स्ते॒नानां॒ पत॑ये॒ नमो॒ ❁ नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒ ❁ नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒ ❁ नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒ ❁ नमः॑ सृका॒विभ्यो॒ जिघां॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒ ❁ नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒ ❁ नम॑ उष्णी॒षिने॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒ ❁ नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒ ❁ नम॑ आतन्वा॒नेभ्य॑ प्रति॒दधा॑नेभ्यश्च वो॒

नमो॒ ❀ नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒ ❀ नमोऽस्य॑द्भ्यो॒
विद्ध्य॑द्भ्यश्च वो॒ नमो॒ ❀ नम॒ आसी॑नेभ्यः॒ शया॑नेभ्यश्च वो॒ नमो॒ ❀
नमः॑ स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒ ❀ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒
नमो॒ ❀ नमः॑ स॒भाभ्यः॑ स॒भाप॑तिभ्यश्च वो॒ नमो॒ ❀ नमो॒
अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नमः॑॥३॥

नम॑ आव्या॒धिनी᳚भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒ ❀ नम॒
उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒ ❀ नमो॑ गृ॒त्सेभ्यो॑
गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒ ❀ नमो॒ व्राते᳚भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒
❀ नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ ❀ नमो॒ विरू॑पेभ्यो
वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ ❀ नमो॑ म॒हद्भ्यः॑ क्षु॒ल्ल॒केभ्य॑श्च वो॒ नमो॒ ❀
नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒ ❀ नमो॒ रथे᳚भ्यो॒ रथ॑पतिभ्यश्च वो॒
नमो॒ ❀ नमः॒ सेना᳚भ्यः सेना॒निभ्य॑श्च वो॒ नमो॒ ❀ नमः॑ क्ष॒त्तृभ्यः॑
संग्रही॒तृभ्य॑श्च वो॒ नमो॒ ❀ नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ ❀
नमः॒ कुला॑लेभ्यः क॒र्मारे᳚भ्यश्च वो॒ नमो॒ ❀ नमः॑ पु॒ञ्जिष्टे᳚भ्यो
निषा॒देभ्य॑श्च वो॒ नमो॒ ❀ नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒ ❀
नमो॑ मृग॒युभ्यः॑ श्व॒निभ्य॑श्च वो॒ नमो॒ ❀ नमः॒ श्वभ्यः॒ श्वप॑तिभ्यश्च
वो॒ नमः॑॥४॥

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ ❀ नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च॒ ❀
नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ ❀ नमः॑ कप॒र्दिने॑ च॒
व्यु॑प्तकेशाय च॒ ❀ नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒ ❀ नमो॑
गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ ❀ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ ❀
नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ ❀ नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒ ❀

नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒ ❁ नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒ ❁
नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ ❁ नमः॒ शीघ्रि॑याय च॒ शीभ्या॑य च॒ ❁
नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒ ❁ नमः॑ स्रोत॒स्या॑य च॒ द्वीप्या॑य
च॥५॥

नमो᳚ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ ❁ नमः॑ पूर्व॒जाय॑ चापर॒जाय॑ च॒ ❁
नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒ ❁ नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय
च॒ ❁ नमः॑ सो॒भ्या॑य च प्रतिस॒र्या॑य च॒ ❁ नमो॒ याम्या॑य च॒
क्षेम्या॑य च॒ ❁ नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒ ❁ नमः॒ श्लोक्या॑य
चाऽवसा॒न्या॑य च॒ ❁ नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ ❁ नमः॑ श्र॒वाय॑
च प्रतिश्र॒वाय॑ च॒ ❁ नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒ ❁ नमः॒
शूरा॑य चावभिन्द॒ते च॒ ❁ नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒ ❁ नमो॑
बि॒ल्मिने॑ च कव॒चिने॑ च॒ ❁ नमः॑ श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॥६॥

नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒ ❁ नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ ❁
नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒ ❁ नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒ ❁
नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒ ❁ नमः॑ स्वायु॒धाय॑ च सु॒धन्व॑ने च॒ ❁
नमः॒ स्रुत्या॑य च॒ पथ्या॑य च॒ ❁ नमः॑ का॒ट्या॑य च नी॒प्या॑य च॒ ❁
नमः॒ सूद्या॑य च सर॒स्या॑य च॒ ❁ नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒ ❁
नमः॒ कूप्या॑य चाव॒ट्या॑य च॒ ❁ नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒ ❁
नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒ ❁ नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒ ❁
नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒ ❁ नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑
च॥७॥

नम॒ः सोमा॑य च रु॒द्राय॑ च॒ ❁ नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒ ❁ नम॑ः श॒ङ्गाय॑ च पशु॒पत॑ये च॒ ❁ नम॑ उ॒ग्राय॑ च भी॒माय॑ च॒ ❁ नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ ❁ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ ❁ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ ❁ नम॑स्ता॒राय॒ ❁ नम॑ः श॒म्भवे॑ च मयो॒भवे॑ च॒ ❁ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒ ❁ नम॑ः शि॒वाय॑ च शि॒वत॑राय च॒ ❁ नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒ ❁ नम॑ः पा॒र्या॑य चावा॒र्या॑य च॒ ❁ नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च॒ ❁ नम॑ आता॒र्या॑य चाला॒द्या॑य च॒ ❁ नम॒ः शष्प्या॑य च॒ फेन्या॑य च॒ ❁ नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च॥८॥

नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒ ❁ नम॑ः किꣳशि॒लाय॑ च॒ क्षय॑णाय च॒ ❁ नम॑ः कप॒र्दिने॑ च पुल॒स्तये॑ च॒ ❁ नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒ ❁ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ ❁ नम॑ः का॒ट्या॑य च गह्वरे॒ष्ठाय॑ च॒ ❁ नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒ ❁ नम॑ः पाꣳस॒व्या॑य च रज॒स्या॑य च॒ ❁ नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒ ❁ नमो॒ लोप्या॑य चोल॒प्या॑य च॒ ❁ नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒ ❁ नम॑ः प॒र्ण्या॑य च पर्णश॒द्या॑य च॒ ❁ नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ ❁ नम॑ आक्खिद॒ते च॑ प्रक्खिद॒ते च॒ ❁ [33] नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विक्षीण॒केभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ आनिर्ह॒तेभ्यो॒ नम॑ आमीव॒त्केभ्य॑ः॥९॥

---

[33] ॰ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ ❁ नमो॑ विक्षीण॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ ❁ नमो॑ विचिन्व॒त्केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ ❁ नम॑ आनिर्ह॒तेभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ ❁ नम॑ आमीव॒त्केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यः॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा
भेर्माऽरो मो एषां किञ्चनाममत्॥ या ते रुद्र शिवा तनूः शिवा
विश्वाह भेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥
इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा
नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥
मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥ मा
नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नोवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥
मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु
रीरिषः। वीरान्मा नो रुद्र भामितोवधीर्हविष्मन्तो नमसा विधेम
ते॥ आरात् ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु।
रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः॥
स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। मृडा जरित्रे
रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः॥ परिणो रुद्रस्य
हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा
मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ मीढुष्टम शिवतम
शिवो नः सुमना भव। परमे वृक्ष आयुधं निधाय कृत्तिं वसान
आचर पिनाकं बिभ्रदागहि॥ विकिरिद विलोहित नमस्ते अस्तु
भगवः। यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः॥ सहस्राणि
सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना
मुखा कृधि॥१०॥

स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा अधि॒ भूम्या॑म्। तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ अ॒स्मिन् म॑ह॒त्य॑र्ण॒वे॑ऽन्तरि॑क्षे भ॒वा अधि॑॥ नील॑ग्रीवाः शिति॒कण्ठा॑ः श॒र्वा अ॒धः क्ष॑माच॒राः॥ नील॑ग्रीवाः शिति॒कण्ठा॒ दिव॑ꣳ रु॒द्रा उप॑श्रिताः॥ ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः॥ ये भू॒ताना॒मधि॑पतयो विशि॒खास॑ः कप॒र्दिन॑ः॥ ये अन्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जना॑न्॥ ये प॒थां प॑थि॒रक्ष॑य ऐलबृ॒दा य॒व्युध॑ः॥ ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काव॑न्तो निष॒ङ्गिण॑ः॥[34] य ए॒ताव॑न्तश्च॒ भूया॑ꣳसश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे। तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥

नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां यें॑ऽन्तरि॑क्षे॒ ये दि॒वि येषा॒मन्नं॒ वातो॑ व॒र्षमिष॑व॒स्तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वास्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥११॥

सानुषङ्गः

नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां येषा॒मन्न॒मिष॑व॒स्तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वास्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॥

---

[34] ये वना॑न्युप॒ सर्प॑न्ति॒ तेभ्यो॒ वृ॑ष्टिरु॒दाच॑ते। ये ग्रा॒म्यानु॑प॒सर्प॑न्ति॒ तेभ्यो॒ व्यु॑ष्टिमु॒पास॑ते॥ (इति अधिकः पाठः कुत्रचित् श्रूयते)

नमो रुद्रेभ्यो येँऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

रुद्रप्रार्थनमन्त्राः

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रः सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेमशन्तमꣳ हृदे॥ सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

एष ते रुद्र भागस्तं जुषस्व तेनावसेन परोमूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरन्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः।

स॒द्योजा॒तं प्र॑पद्या॒मि स॒द्योजा॒ताय॒ वै नमो॒ नमः॑। भ॒वे भ॑वे॒
नाति॑भवे भवस्व॒ माम्। भ॒वोद्भ॑वाय॒ नमः॑। वा॒म॒दे॒वाय॒ नमो᳚
ज्ये॒ष्ठाय॒ नमः॑ श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नम॒ः काला॑य॒ नम॒ः
कल॑विकरणाय॒ नमो॒ बल॑विकरणाय॒ नमो॒ बला॑य॒ नमो॒
बल॑प्रमथनाय॒ नम॒ः सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नमः॥
अ॒घोरे᳚भ्योऽथ॒ घोरे᳚भ्यो॒ घोर॒ घोर॑तरेभ्यः। सर्वे᳚भ्यः सर्व॒ शर्वे᳚भ्यो॒
नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥ तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्॥ ईशानः सर्व॑विद्या॒ना॒मीश्वरः सर्व॑भूता॒ना॒ं
ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्।

यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु य ओष॑धीषु॒ यो रु॒द्रो विश्वा॒
भुव॑नाऽऽवि॒वेश॒ तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॥ यस्मा॒त् पर॒ं नाप॑र॒मस्ति॒
किञ्चि॒द् यस्मा॒न्नाणी॑यो॒ न ज्याया᳚ऽस्ति॒ कश्चि॑त्। वृक्ष इ॑व स्तब्धो
दि॒वि ति॑ष्ठ॒त्येक॒स्तेने॒दं पू॒र्णं पुरु॑षेण॒ सर्व᳚म्॥ तमु॑ष्टुहि॒ यः स्वि॒षुः
सु॒धन्वा॒ यो विश्व॑स्य॒ क्षय॑ति भेष॒जस्य॑। यक्ष्वा᳚म॒हे सौ᳚मन॒साय॑ रु॒द्रं
नमो᳚भिर्दे॒वमसु॑रं दुवस्य॥ अ॒यं मे॒ हस्तो॒ भग॑वान॒यं मे॒ भग॑वत्तरः।
अ॒यं मे᳚ वि॒श्वभे᳚षजो॒ऽयꣳ शि॒वाभि॑मर्शनः॥ ये ते॑ स॒हस्र॑म॒युतं॒
पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे। तान् य॒ज्ञस्य॑ मा॒यया॒ सर्वा॒नव॑
यजामहे। मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा᳚॥ ॐ नमो भगवते रुद्राय
विष्णवे मृत्यु॑र्मे पा॒हि। प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तकः।
तेनान्नेना᳚प्याय॒स्व। स॒दा॒शि॒वोम्॥

चमकम्

तै॰सं॰ ४.७

अग्ना॑विष्णू स॒जोष॑से॒मा व॑र्धन्तु वा॒ङ्गिरः॑। द्यु॒म्नैर्वाजे॑भि॒राग॑तम्॥

वाज॑श्च मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒ प्रसि॑तिश्च मे धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒ स्वर॑श्च मे॒ श्लोक॑श्च मे श्रा॒वश्च॑ मे॒ श्रुति॑श्च मे॒ ज्योति॑श्च मे॒ सुव॑श्च मे प्रा॒णश्च॑ मेऽपा॒नश्च॑ मे व्या॒नश्च॒ मेऽसु॑श्च मे चि॒त्तं च॑ म॒ आधी॑तं च मे॒ वाक् च॑ मे॒ मन॑श्च मे॒ चक्षु॑श्च मे॒ श्रोत्रं॑ च मे॒ दक्ष॑श्च मे॒ बलं॑ च म॒ ओज॑श्च मे॒ सह॑श्च म॒ आयु॑श्च मे ज॒रा च॑ म आ॒त्मा च॑ मे त॒नूश्च॑ मे॒ शर्म॑ च मे॒ वर्म॑ च मे॒ऽङ्गा॑नि च मे॒ऽस्थानि॑ च मे॒ परू॑ꣳषि च मे॒ शरी॑राणि च मे॥१॥

ज्यैष्ठ्यं॑ च म॒ आधि॑पत्यं च मे म॒न्युश्च॑ मे॒ भाम॑श्च॒ मेऽम॑श्च॒ मेऽम्भ॑श्च मे जे॒मा च॑ मे महि॒मा च॑ मे वरि॒मा च॑ मे प्रथि॒मा च॑ मे व॒र्ष्मा च॑ मे द्राघु॒या च॑ मे वृ॒द्धं च॑ मे॒ वृद्धि॑श्च मे स॒त्यं च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च मे॒ धनं॑ च मे॒ वश॑श्च मे॒ त्विषि॑श्च मे क्री॒डा च॑ मे॒ मोद॑श्च मे जा॒तं च॑ मे जनि॒ष्यमा॑णं च मे सू॒क्तं च॑ मे सुकृ॒तं च॑ मे वि॒त्तं च॑ मे॒ वेदं॑ च मे भू॒तं च॑ मे भवि॒ष्यच्च॑ मे सु॒गं च॑ मे सु॒पथं॑ च म ऋ॒द्धं च॑ म॒ ऋद्धि॑श्च मे क्लृ॒प्तं च॑ मे॒ क्लृप्ति॑श्च मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे॥२॥

शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्वं॑ च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म

ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सु॒दिनं॑ च मे॥३॥

ऊर्क्च॑ मे सू॒नृता॑ च मे॒ पय॑श्च मे॒ रस॑श्च मे घृ॒तं च॑ मे॒ मधु॑ च मे॒ सग्धि॑श्च मे॒ सपी॑तिश्च मे कृ॒षिश्च॑ मे॒ वृष्टि॑श्च मे॒ जैत्रं॑ च म॒ औद्भि॑द्यं च मे र॒यिश्च॑ मे॒ राय॑श्च मे पु॒ष्टं च॑ मे॒ पुष्टि॑श्च मे वि॒भु च॑ मे प्र॒भु च॑ मे ब॒हु च॑ मे॒ भूय॑श्च मे पू॒र्णं च॑ मे पू॒र्णत॑रं च॒ मेऽक्षि॑तिश्च मे॒ कूय॑वाश्च॒ मेऽन्नं॑ च॒ मेऽक्षु॑च्च मे व्री॒हिय॑श्च मे॒ यवा॑श्च मे॒ माषा॑श्च मे॒ तिला॑श्च मे मु॒द्गाश्च॑ मे ख॒ल्वा॑श्च मे गो॒धूमा॑श्च मे म॒सुरा॑श्च मे प्रि॒यङ्ग॑वश्च॒ मेऽण॑वश्च मे श्या॒मका॑श्च मे नी॒वारा॑श्च मे॥४॥

अश्मा॑ च मे॒ मृत्ति॑का च मे गि॒रय॑श्च मे॒ पर्व॑ताश्च मे॒ सिक॑ताश्च मे॒ वन॒स्पत॑यश्च मे॒ हिर॑ण्यं च॒ मेऽय॑श्च मे॒ सीसं॑ च मे॒ त्रपु॑श्च मे श्या॒मं च॑ मे लो॒हं च॑ मे॒ऽग्निश्च॑ म॒ आप॑श्च मे वी॒रुध॑श्च म॒ ओष॑धयश्च मे कृष्टप॒च्यं च॑ मेऽकृष्टप॒च्यं च॑ मे ग्रा॒म्याश्च॑ मे प॒शव॑ आर॒ण्याश्च॑ य॒ज्ञेन॑ कल्पन्तां वि॒त्तं च॑ मे॒ वित्ति॑श्च मे भू॒तं च॑ मे॒ भूति॑श्च मे॒ वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म॑ च मे॒ शक्ति॑श्च॒ मेऽर्थ॑श्च म॒ एम॑श्च म॒ इति॑श्च मे॒ गति॑श्च मे॥५॥

अ॒ग्निश्च॑ म॒ इन्द्र॑श्च मे॒ सोम॑श्च म॒ इन्द्र॑श्च मे सवि॒ता च॑ म॒ इन्द्र॑श्च मे॒ सर॑स्वती च म॒ इन्द्र॑श्च मे पू॒षा च॑ म॒ इन्द्र॑श्च मे॒ बृह॒स्पति॑श्च म॒ इन्द्र॑श्च मे मि॒त्रश्च॑ म॒ इन्द्र॑श्च मे॒ वरु॑णश्च म॒ इन्द्र॑श्च मे॒ त्वष्टा॑ च म॒ इन्द्र॑श्च मे धा॒ता च॑ म॒ इन्द्र॑श्च मे॒ विष्णु॑श्च म॒ इन्द्र॑श्च मे॒ऽश्विनौ॑ च म॒ इन्द्र॑श्च मे म॒रुत॑श्च म॒ इन्द्र॑श्च मे॒ विश्वे॑ च मे दे॒वा इन्द्र॑श्च मे

पृथिवी चं म इन्द्रंश्च मेऽन्तरिंक्षं च म इन्द्रंश्च मे द्यौश्चं म
इन्द्रंश्च मे दिशंश्च म इन्द्रंश्च मे मूर्धा चं म इन्द्रंश्च मे
प्रजापंतिश्च म इन्द्रंश्च मे॥६॥

अ॒ꣳशुश्चं मे र॒श्मिश्च॒ मेऽदाँभ्यश्च॒ मेऽधिंपतिश्च म उपा॒ꣳशुश्चं
मेऽन्तर्या॒मश्चं म ऐन्द्रवाय॒वश्चं मे मैत्रावरु॒णश्चं म आश्वि॒नश्चं मे
प्रतिप्र॒स्थानंश्च मे शु॒क्रश्चं मे म॒न्थी चं म आग्रय॒णश्चं मे वैश्वदे॒वश्चं
मे ध्रु॒वश्चं मे वैश्वान॒रश्चं म ऋतुग्र॒हाश्चं मेऽतिग्रा॒ह्याँश्च म ऐन्द्रा॒ग्नश्चं
मे वैश्वदे॒वश्चं मे मरुत्व॒तीयाँश्च मे माहे॒न्द्रश्चं म आदि॒त्यश्चं मे
सावि॒त्रश्चं मे सारस्व॒तश्चं मे पौ॒ष्णश्चं मे पात्नीव॒तश्चं मे
हारियोज॒नश्चं मे॥७॥

इ॒ध्मश्चं मे ब॒र्हिश्चं मे॒ वेदिंश्च मे॒ धिष्णिंयाश्च मे॒ स्रुचंश्च मे चम॒साश्चं
मे॒ ग्रावांणश्च मे॒ स्वरंवश्च म उपर॒वाश्चं मेऽधि॒षवंणे च मे
द्रोणकल॒शश्चं मे वाय॒व्यांनि च मे पूत॒भृच्चं म आधव॒नीयंश्च म॒
आग्नींध्रं च मे हवि॒र्धानं च मे गृ॒हाश्चं मे॒ सदंश्च मे पुरो॒डाशाँश्च मे
पच॒ताश्चं मेऽवभृ॒थश्चं मे स्वगाका॒रश्चं मे॥८॥

अ॒ग्निश्चं मे घ॒र्मश्चं मे॒ऽर्कश्चं मे॒ सूर्यंश्च मे प्रा॒णश्चं मेऽश्वमे॒धश्चं मे
पृथि॒वी च॒ मेऽदिंतिश्च मे॒ दितिंश्च मे॒ द्यौश्चं मे॒ शक्वंरीर॒ङ्गुलंयो॒
दिशंश्च मे य॒ज्ञेनं कल्पन्ता॒मृक् चं मे॒ सामं च मे॒ स्तोमंश्च मे॒
यजुंश्च मे दी॒क्षा चं मे॒ तपंश्च म ऋ॒तुश्चं मे व्र॒तं चं
मेऽहोरा॒त्रयोँर्वृ॒ष्ट्या बृंहद्रथन्त॒रे चं मे य॒ज्ञेनं कल्पेताम्॥९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वां च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग् यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥१०॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद् विश्वेदेवाः सूक्तवाचः पृथिवीमातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु॥ ॐ शान्तिः शान्तिः शान्तिः॥

रुद्रत्रिशतिः

नमो॒ हिर॑ण्यबाहवे॒ नम॑ः। से॒ना॒न्ये॑ नम॑ः। दि॒शां च॒ पत॑ये॒ नम॑ः। नमो॑ वृ॒क्षेभ्यो॒ नम॑ः। हरि॑केशेभ्यो॒ नम॑ः। प॒शू॒नां पत॑ये॒ नम॑ः। नम॑ः स॒स्पिञ्ज॑राय॒ नम॑ः। त्विषी॑मते॒ नम॑ः। प॒थी॒नां पत॑ये॒ नम॑ः। नमो॑ बभ्लु॒शाय॒ नम॑ः। वि॒व्या॒धिने॒ नम॑ः। अन्ना॑नां॒ पत॑ये॒ नम॑ः। नमो॒ हरि॑केशाय॒ नम॑ः। उ॒प॒वी॒तिने॒ नम॑ः। पु॒ष्टानां॒ पत॑ये॒ नम॑ः। नमो॑ भ॒वस्य॑ हे॒त्यै नम॑ः। जग॑तां॒ पत॑ये॒ नम॑ः। नमो॑ रु॒द्राय॒ नम॑ः। आ॒त॒ता॒विने॒ नम॑ः। क्षेत्रा॑णां॒ पत॑ये॒ नम॑ः। नम॑ः सू॒ताय॒ नम॑ः। अह॑न्त्याय॒ नम॑ः। वना॑नां॒ पत॑ये॒ नम॑ः। नमो॒ रोहि॑ताय॒ नम॑ः। स्थ॒पत॑ये॒ नम॑ः। वृ॒क्षाणां॒ पत॑ये॒ नम॑ः। नमो॑ म॒न्त्रिणे॒ नम॑ः। वा॒णि॒जाय॒ नम॑ः। कक्षा॑णां॒ पत॑ये नम॑ः। नमो॑ भुव॒न्तये॒ नम॑ः। वा॒रि॒व॒स्कृ॒ताय॒ नम॑ः। ओष॑धीनां॒ पत॑ये॒ नम॑ः। नम॑ उ॒च्चैर्घो॑षाय॒ नम॑ः। आ॒क्र॒न्दय॑ते॒ नम॑ः। प॒त्तीनां॒ पत॑ये॒ नम॑ः। नम॑ः कृत्स्नवी॒ताय॒ नम॑ः। धाव॑ते॒ नम॑ः। सत्त्व॑नां॒ पत॑ये॒ नम॑ः॥३८॥

नम॒ः सह॑मानाय॒ नम॑ः। नि॒व्या॒धिने॒ नम॑ः। आ॒व्या॒धिनी॑नां॒ पत॑ये॒ नम॑ः। नम॑ः ककु॒भाय॒ नम॑ः। नि॒ष॒ङ्गिणे॒ नम॑ः। स्ते॒नानां॒ पत॑ये॒ नम॑ः। नमो॑ निष॒ङ्गिणे॒ नम॑ः। इ॒षु॒धि॒मते॒ नम॑ः। तस्क॑राणां॒ पत॑ये॒ नम॑ः। नमो॒ वञ्च॑ते॒ नम॑ः। प॒रि॒वञ्च॑ते॒ नम॑ः। स्ता॒यू॒नां पत॑ये॒ नम॑ः। नमो॑ नि॒चे॒रवे॒ नम॑ः। प॒रि॒च॒राय॒ नम॑ः। अर॑ण्यानां॒ पत॑ये॒ नम॑ः। नम॑ः सृका॒विभ्यो॒ नम॑ः। जिघा॑ꣳसद्भ्यो॒ नम॑ः। मु॒ष्ण॒तां पत॑ये॒ नम॑ः। नमो॑ऽसि॒मद्भ्यो॒ नम॑ः। नक्तं॒चर॑द्भ्यो॒ नम॑ः। प्र॒कृ॒न्ताना॒ं पत॑ये॒ नम॑ः। नम॑ उष्णी॒षिने॒ नम॑ः। गि॒रि॒च॒राय॒ नम॑ः। कु॒लु॒ञ्चानां॒ पत॑ये॒

नम॑ः। नम॒ इषु॑मद्भ्यो॒ नम॑ः। ध॒न्वा॒विभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नम॑
आतन्वा॒नेभ्यो॒ नम॑ः। प्र॒ति॒दधा॑नेभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॑
आ॒यच्छ॑द्भ्यो॒ नम॑ः। वि॒सृ॒जद्भ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नमोऽस्य॑द्भ्यो॒
नम॑ः। विध्य॑द्भ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॒ आसी॑नेभ्यो॒ नम॑ः।
शया॑नेभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॑ः स्व॒पद्भ्यो॒ नम॑ः। जाग्र॑द्भ्यश्च॒
नम॑ः। वो॒ नम॑ः। नम॒स्तिष्ठ॑द्भ्यो॒ नम॑ः। धाव॑द्भ्यश्च॒ नम॑ः। वो॒ नम॑ः।
नम॑ः स॒भाभ्यो॒ नम॑ः। स॒भाप॑तिभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नमो॒
अश्वे᳚भ्यो॒ नम॑ः। अश्व॑पतिभ्यश्च॒ नम॑ः। वो॒ नम॑ः॥८९॥

नम॑ आव्या॒धिनी᳚भ्यो॒ नम॑ः। वि॒विध्य॑न्तीभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॒
उग॑णाभ्यो॒ नम॑ः। तृ॒ꣳह॒तीभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नमो॑ गृ॒त्सेभ्यो॒
नम॑ः। गृ॒त्सप॑तिभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नमो॒ व्राते᳚भ्यो॒ नम॑ः।
व्रात॑पतिभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नमो॑ ग॒णेभ्यो॒ नम॑ः। ग॒णप॑तिभ्यश्च॒
नम॑ः। वो॒ नम॑ः। नमो॒ विरू॑पेभ्यो॒ नम॑ः। वि॒श्वरू॑पेभ्यश्च॒ नम॑ः। वो॒
नम॑ः। नमो॑ म॒हद्भ्यो॒ नम॑ः। क्षु॒ल्ल॒केभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नमो॑
र॒थिभ्यो॒ नम॑ः। अ॒र॒थेभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नमो॒ रथे᳚भ्यो॒ नम॑ः।
रथ॑पतिभ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॒ः सेना᳚भ्यो॒ नम॑ः। से॒ना॒निभ्य॑श्च॒
नम॑ः। वो॒ नम॑ः। नम॑ः क्ष॒त्तृभ्यो॒ नम॑ः। स॒ङ्ग्र॒ही॒तृभ्य॑श्च॒ नम॑ः। वो॒
नम॑ः। नम॒स्तक्ष॑भ्यो॒ नम॑ः। र॒थ॒का॒रेभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नम॒ः
कुला॑लेभ्यो॒ नम॑ः। क॒र्मारे᳚भ्यश्च॒ नम॑ः। वो॒ नम॑ः। नम॑ः पु॒ञ्जिष्टे᳚भ्यो॒
नम॑ः। नि॒षा॒देभ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नम॑ इषु॒कृद्भ्यो॒ नम॑ः।
ध॒न्व॒कृद्भ्य॑श्च॒ नम॑ः। वो॒ नम॑ः। नमो॑ मृग॒युभ्यो॒ नम॑ः। श्व॒निभ्य॑श्च॒
नम॑ः। वो॒ नम॑ः। नम॒ः श्वभ्यो॒ नम॑ः। श्वप॑तिभ्यश्च॒ नम॑ः। वो॒
नम॑ः॥१४०॥

नमो॑ भ॒वाय॑ च॒ नमः॑। रु॒द्राय॑ च॒ नमः॑। नमः॑ श॒र्वाय॑ च॒ नमः॑। प॒शु॒पत॑ये च॒ नमः॑। नमो॒ नील॑ग्रीवाय च॒ नमः॑। शि॒ति॒कण्ठा॑य च॒ नमः॑। नमः॑ कप॒र्दिने॑ च॒ नमः॑। व्यु॑प्तकेशाय च॒ नमः॑। नमः॑ सह॒स्रा॒क्षाय॑ च॒ नमः॑। श॒तध॑न्वने च॒ नमः॑। नमो॑ गिरि॒शाय॑ च॒ नमः॑। शि॒पि॒वि॒ष्टाय॑ च॒ नमः॑। नमो॑ मी॒ढुष्ट॑माय च॒ नमः॑। इषु॑मते च॒ नमः॑। नमो॑ ह्र॒स्वाय॑ च॒ नमः॑। वा॒म॒नाय॑ च॒ नमः॑। नमो॑ बृह॒ते च॒ नमः॑। वर्षी॑यसे च॒ नमः॑। नमो॑ वृ॒द्धाय॑ च॒ नमः॑। सं॒वृध्व॑ने च॒ नमः॑। नमो॒ अग्रि॑याय च॒ नमः॑। प्र॒थ॒माय॑ च॒ नमः॑। नम॑ आ॒शवे॑ च॒ नमः॑। अ॒जि॒राय॑ च॒ नमः॑। नमः॒ शीघ्रि॑याय च॒ नमः॑। शीभ्या॑य च॒ नमः॑। नम॑ ऊ॒र्म्या॑य च॒ नमः॑। अ॒व॒स्व॒न्या॑य च॒ नमः॑। नमः॑ स्रोत॒स्या॑य च॒ नमः॑। द्वीप्या॑य च॒ नमः॑॥१७०॥

नमो॑ ज्ये॒ष्ठाय॑ च॒ नमः॑। क॒नि॒ष्ठाय॑ च॒ नमः॑। नमः॑ पूर्व॒जाय॑ च॒ नमः॑। अ॒प॒र॒जाय॑ च॒ नमः॑। नमो॑ मद्ध्य॒माय॑ च॒ नमः॑। अ॒प॒ग॒ल्भाय॑ च॒ नमः॑। नमो॑ जघ॒न्या॑य च॒ नमः॑। बुध्नि॑याय च॒ नमः॑। नमः॑ सो॒भ्या॑य च॒ नमः॑। प्र॒ति॒स॒र्या॑य च॒ नमः॑। नमो॒ याम्या॑य च॒ नमः॑। क्षेम्या॑य च॒ नमः॑। नम॑ उर्व॒र्या॑य च॒ नमः॑। खल्या॑य च॒ नमः॑। नमः॒ श्लोक्या॑य च॒ नमः॑। अ॒व॒सा॒न्या॑य च॒ नमः॑। नमो॒ वन्या॑य च॒ नमः॑। कक्ष्या॑य च॒ नमः॑। नमः॑ श्र॒वाय॑ च॒ नमः॑। प्र॒ति॒श्र॒वाय॑ च॒ नमः॑। नम॑ आ॒शुषे॑णाय च॒ नमः॑। आ॒शुर॑थाय च॒ नमः॑। नमः॒ शूरा॑य च॒ नमः॑। अ॒व॒भि॒न्द॒ते च॒ नमः॑। नमो॑ व॒र्मिणे॑ च॒ नमः॑। व॒रू॒थिने॑ च॒ नमः॑। नमो॑ बि॒ल्मिने॑ च॒ नमः॑। क॒व॒चिने॑ च॒ नमः॑। नमः॑ श्रु॒ताय॑ च॒ नमः॑। श्रु॒त॒से॒नाय॑ च॒ नमः॑॥२००॥

नमो॑ दुन्दु॒भ्या॑य च॒ नम॑ः। आ॒ह॒न॒न्या॑य च॒ नम॑ः। नमो॑ धृ॒ष्णवे॑ च॒ नम॑ः। प्र॒मृ॒शाय॑ च॒ नम॑ः। नमो॑ दू॒ताय॑ च॒ नम॑ः। प्रहि॑ताय च॒ नम॑ः। नमो॑ निष॒ङ्गिणे॑ च॒ नम॑ः। इ॒षु॒धि॒मते॑ च॒ नम॑ः। नम॑स्ती॒क्ष्णेष॑वे च॒ नम॑ः। आ॒यु॒धिने॑ च॒ नम॑ः। नम॑ः स्वायु॒धाय॑ च॒ नम॑ः। सु॒धन्व॑ने च॒ नम॑ः। नम॒ः स्रुत्या॑य च॒ नम॑ः। पथ्या॑य च॒ नम॑ः। नम॑ः का॒ट्या॑य च॒ नम॑ः। नी॒प्या॑य च॒ नम॑ः। नम॒ः सूद्या॑य च॒ नम॑ः। स॒र॒स्या॑य च॒ नम॑ः। नमो॑ ना॒द्याय॑ च॒ नम॑ः। वै॒श॒न्ताय॑ च॒ नम॑ः। नम॒ः कूप्या॑य च॒ नम॑ः। अ॒व॒ट्या॑य च॒ नम॑ः। नमो॒ वर्ष्या॑य च॒ नम॑ः। अ॒व॒र्ष्याय॑ च॒ नम॑ः। नमो॑ मे॒घ्या॑य च॒ नम॑ः। वि॒द्यु॒त्या॑य च॒ नम॑ः। नम॑ ई॒ध्रिया॑य च॒ नम॑ः। आ॒त॒प्या॑य च॒ नम॑ः। नमो॒ वात्या॑य च॒ नम॑ः। रेष्मि॑याय च॒ नम॑ः। नमो॑ वास्त॒व्या॑य च॒ नम॑ः। वास्तु॒पाय॑ च॒ नम॑ः॥२३२॥

नम॒ः सोमा॑य च॒ नम॑ः। रु॒द्राय॑ च॒ नम॑ः। नम॑स्ता॒म्राय॑ च॒ नम॑ः। अ॒रु॒णाय॑ च॒ नम॑ः। नम॑ः श॒ङ्गाय॑ च॒ नम॑ः। प॒शु॒पत॑ये च॒ नम॑ः। नम॑ उ॒ग्राय॑ च॒ नम॑ः। भी॒माय॑ च॒ नम॑ः। नमो॑ अग्रेव॒धाय॑ च॒ नम॑ः। दू॒रे॒व॒धाय॑ च॒ नम॑ः। नमो॑ ह॒न्त्रे च॒ नम॑ः। हनी॑यसे च॒ नम॑ः। नमो॑ वृ॒क्षेभ्यो॒ नम॑ः। हरि॑केशेभ्यो॒ नम॑ः। नम॑स्ता॒राय॒ नम॑ः। नम॑ः श॒म्भवे॑ च॒ नम॑ः। म॒यो॒भवे॑ च॒ नम॑ः। नम॑ः शङ्क॒राय॑ च॒ नम॑ः। म॒य॒स्क॒राय॑ च॒ नम॑ः। नम॑ः शि॒वाय॑ च॒ नम॑ः। शि॒वत॑राय च॒ नम॑ः। नम॒स्तीर्थ्या॑य च॒ नम॑ः। कूल्या॑य च॒ नम॑ः। नम॑ः पा॒र्या॑य च॒ नम॑ः। अ॒वा॒र्या॑य च॒ नम॑ः। नम॑ः प्र॒तर॑णाय च॒ नम॑ः। उ॒त्तर॑णाय च॒ नम॑ः। नम॑ आता॒र्या॑य च॒ नम॑ः। आ॒ला॒द्या॑य च॒ नम॑ः। नम॒ः शष्प्या॑य च॒

नम॑ः। फेन्या॑य च॒ नम॑ः। नम॑ः सिक॒त्या॑य च॒ नम॑ः। प्र॒वा॒ह्या॑य च॒ नम॑ः॥२६५॥

नम॑ इरि॒ण्या॑य च॒ नम॑ः। प्र॒प॒थ्या॑य च॒ नम॑ः। नम॑ः किꣳशि॒लाय॑ च॒ नम॑ः। क्षय॑णाय च॒ नम॑ः। नम॑ः कप॒र्दिने॑ च॒ नम॑ः। पु॒ल॒स्तये॑ च॒ नम॑ः। नमो॒ गोष्ठ्या॑य च॒ नम॑ः। गृह्या॑य च॒ नम॑ः। नम॒स्तल्प्या॑य च॒ नम॑ः। गेह्या॑य च॒ नम॑ः। नम॑ः का॒ट्या॑य च॒ नम॑ः। ग॒ह्व॒रे॒ष्ठाय॑ च॒ नम॑ः। नमो᳚ हृद॒य्या॑य च॒ नम॑ः। नि॒वे॒ष्प्या॑य च॒ नम॑ः। नम॑ः पाꣳस॒व्या॑य च॒ नम॑ः। र॒ज॒स्या॑य च॒ नम॑ः। नम॒ः शुष्क्या॑य च॒ नम॑ः। ह॒रि॒त्या॑य च॒ नम॑ः। नमो॒ लोप्या॑य च॒ नम॑ः। उ॒ल॒प्या॑य च॒ नम॑ः। नम॑ ऊ॒र्व्या॑य च॒ नम॑ः। सू॒र्म्या॑य च॒ नम॑ः। नम॑ः प॒र्ण्या॑य च॒ नम॑ः। प॒र्ण॒श॒द्या॑य च॒ नम॑ः। नमो॑ऽपगु॒रमा॑णाय च॒ नम॑ः। अ॒भि॒घ्न॒ते च॒ नम॑ः। नम॑ आक्खिद॒ते च॒ नम॑ः। प्र॒क्खि॒द॒ते च॒ नम॑ः। वो॒ नम॑ः। कि॒रि॒केभ्यो॒ नम॑ः। दे॒वाना॒ꣳ॒ हृद॑येभ्यो॒ नम॑ः। नमो॑ विक्षीण॒केभ्यो॒ नम॑ः। नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ः। नम॑ आनिर्ह॒तेभ्यो॒ नम॑ः। नम॑ आमीव॒त्केभ्यो॒ नम॑ः॥३००॥

तैत्तिरीयोपनिषत्

शीक्षावल्ली

तै॰आ॰ ७

शं नो॑ मि॒त्रः शं वरु॑णः। शं नो॑ भवत्वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पति॑ः। शं नो॒ विष्णु॑रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि। ऋ॒तं व॑दिष्यामि। स॒त्यं व॑दिष्यामि। तन्माम॑वतु। तद्व॒क्तार॑मवतु। अव॑तु॒ माम्। अव॑तु व॒क्तार॑म्। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥१॥

शीक्षां व्या॑ख्यास्या॒मः। वर्ण॒ः स्वरः। मात्रा॒ बलम्। साम॑ सन्ता॒नः। इत्युक्तः शी॑क्षाध्या॒यः॥२॥

संहितोपासना

स॒ह नौ॒ यशः। सह नौ ब्र॑ह्मव॒र्चसम्। अथातः स॰हिताया उपनिषदं व्या॑ख्यास्या॒मः। पञ्चस्वधिक॑रणे॒षु। अधिलोकमधि- ज्यौतिषमधिविद्यमधिप्रज॑मध्या॒त्मम्। ता महास॰हिता इ॑त्याच॒क्षते॥

अथा॑धिलो॒कम्। पृथिवी पू॑र्वरू॒पम्। द्यौरुत्त॑ररू॒पम्। आका॑शः स॒न्धिः। वायु॑ः सन्धा॒नम्। इत्य॑धिलो॒कम्॥

अथा॑धिज्यौ॒तिषम्। अग्निः पू॑र्वरू॒पम्। आदित्य उत्त॑ररू॒पम्। आ॑पः स॒न्धिः। वैद्युत॑ः सन्धा॒नम्। इत्य॑धिज्यौ॒तिषम्॥

अथाधिविद्यम्। आचार्यः पूर्वरूपम्॥ अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनꣳ सन्धानम्। इत्यधिविद्यम्॥

अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननꣳ सन्धानम्। इत्यधिप्रजम्॥

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्॥

इतीमा महा सꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन॥३॥

जपहोममन्त्राः

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधयाऽपिहितः। श्रुतं मे गोपाय। आवहन्ती वितन्वाना॥ कुर्वाणाऽचीरमात्मनः। वासाꣳसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।

लोमशां पशुभिः सह स्वाहा। आ मा यन्तु ब्रह्मचारिणः स्वाहा। वि माऽऽयन्तु ब्रह्मचारिणः स्वाहा। प्र माऽऽयन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा॥ यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा।

तस्मिँन् स॒हस्रं॑शाखे। निभ॑गा॒हं त्वयि॑ मृजे॒ स्वाहाँ॑। यथाऽऽप॒ः प्रव॑ता॒ यन्ति॑। यथा॒ मासा॑ अहर्ज॒रम्। ए॒वं मां ब्र॑ह्मचा॒रिण॑ः। धात॒राय॑न्तु स॒र्वत॒ः स्वाहाँ॑। प्र॒ति॒वे॒शो॑ऽसि॒ प्र मा॑ भाहि॒ प्र मा॑ पद्यस्व॥४॥

व्याहृत्यात्मब्रह्मोपासना

भूर्भुव॒ः सुव॒रिति॒ वा ए॒तास्ति॒स्रो व्याहृ॑तयः। तासा॑मु ह स्मै॒तां च॑तु॒र्थीम्। माहा॑चमस्य॒ः प्रवे॑दयते। मह॒ इति॑। तद् ब्रह्म॑। स आ॒त्मा। अङ्गाँ॑न्य॒न्या दे॒वताः॑॥

भूरि॒ति॒ वा अ॒यं लो॒कः। भुव॒ इत्य॒न्तरि॑क्षम्। सुव॒रित्य॒सौ लो॒कः। मह॒ इत्या॑दि॒त्यः। आ॒दि॒त्येन॒ वाव सर्वे॑ लो॒का मही॑यन्ते॥

भूरि॒ति वा अ॒ग्निः। भुव॒ इति॑ वा॒युः। सुव॒रित्या॑दि॒त्यः। मह॒ इति॑ च॒न्द्रमाः॑। च॒न्द्रम॑सा॒ वाव सर्वा॑णि॒ ज्योती॑ꣳषि॒ मही॑यन्ते॥

भूरि॒ति वा ऋच॑ः। भुव॒ इति॒ सामा॑नि। सुव॒रिति॒ यजू॑ꣳषि। मह॒ इति॒ ब्रह्म॑। ब्रह्म॑णा॒ वाव सर्वे॑ वे॒दा मही॑यन्ते॥

भूरि॒ति॒ वै प्रा॒णः। भुव॒ इत्य॑पा॒नः। सुव॒रिति॑ व्या॒नः। मह॒ इत्यन्नँ॑म्। अन्ने॑न॒ वाव सर्वे॑ प्रा॒णा मही॑यन्ते॥

ता वा ए॒ताश्चत॑स्रश्चतु॒र्धा। चत॑स्रश्चतस्रो॒ व्याहृ॑तयः। ता यो वेद॑। स वे॑द॒ ब्रह्म॑। सर्वेँ॑ऽस्मै दे॒वा ब॒लिमाव॑हन्ति॥५॥

महाब्रह्मोपासन स्थानादि

स य एषौऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः।
अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते।
सैन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले॥
भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ। सुवरित्यादित्ये। मह
इति ब्रह्मणि। आप्नोति स्वाराँज्यम्। आप्नोति मनसस्पतिम्।
वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत् ततो भवति।
आकाशशरीरं ब्रह्म। सत्यात्मप्राणारामं मनआनन्दम्।
शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपाःस्व॥६॥

ब्रह्मणः पाङ्क्तरूपेणोपासनम्

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः। अग्निर्वायुरादित्यश्चन्द्रमा
नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा।
इत्यधिभूतम्॥

अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं
मनो वाक् त्वक्। चर्म माꣳसꣳ स्नावास्थिमज्जा। एतदधिविधाय
ऋषिरवोचत्। पाङ्क्तं वा इदꣳ सर्वम्। पाङ्क्तेनैव पाङ्क्तꣳ
स्पृणोतीति॥७॥

ओंकारोपासनम्

ओमिति ब्रह्म। ओमितीदꣳ सर्वम्। ओमित्येतदनुकृति ह स्म वा
अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति।
ओꣳशोमिति शस्त्राणि शꣳसन्ति। ओमित्यध्वर्युः प्रतिगरं
प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति।

ओमितिं ब्राह्मणः प्रंवक्ष्यन्नांह ब्रह्मोपांप्रवानीतिं।
ब्रह्मैवोपांप्नोति॥८॥

कर्मणां पुरुषार्थसाधनत्वम्

ऋतं च स्वाध्यायप्रवंचने च। सत्यं च स्वाध्यायप्रवंचने च।
तपश्च स्वाध्यायप्रवंचने च। दमश्च स्वाध्यायप्रवंचने च।
शमश्च स्वाध्यायप्रवंचने च। अग्नयश्च स्वाध्यायप्रवंचने च।
अग्निहोत्रं च स्वाध्यायप्रवंचने च। अतिथयश्च स्वाध्यायप्रवंचने च।
मानुषं च स्वाध्यायप्रवंचने च। प्रजा च स्वाध्यायप्रवंचने च।
प्रजनश्च स्वाध्यायप्रवंचने च। प्रजातिश्च स्वाध्यायप्रवंचने च।
सत्यमिति सत्यवचां राथीतरः। तप इति तपोनित्यः पौंरुशिष्टिः।
स्वाध्यायप्रवचने एवेति नाकों मौद्गल्यः। तद्धि तपंस्तद्धि
तपः॥९॥

त्रिशङ्कोरार्षदर्शनम्

अहं वृक्षस्य रेरिंवा। कीर्तिः पृष्ठं गिरेरिंव। ऊर्ध्वपंवित्रो वाजिनींव
स्वमृतंमस्मि। द्रविंणꣳ सवंर्चसम्। सुमेधा अंमृतोक्षितः। इति
त्रिशङ्कोर्वेदांनुवचनम्॥१०॥

विद्योत्पत्त्यर्थमनुष्ठेयकर्माणि

वेदमनूच्याऽचार्योऽन्तेवासिनमंनुशास्ति। सत्यं वद। धर्मं चर।
स्वाध्यायांन्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा
व्यंवच्छेत्सीः। सत्यान्न प्रमंदितव्यम्। धर्मान्न प्रमंदितव्यम्।
कुशलान्न प्रमंदितव्यम्। भूत्यै न प्रमंदितव्यम्। स्वाध्याय-
प्रवचनाभ्यां न प्रमंदितव्यम्॥ देवपितृकार्याभ्यां न प्रमंदितव्यम्।

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।
यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।
यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये
के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्।
श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्।
भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा
वृत्तविचिकित्सा वा स्यात्॥ ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता
आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्॥ तथा
तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः।
युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्।
तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा
वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु
चैतदुपास्यम्॥११॥

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो
बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो।
त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्।
ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद् वक्तारमावीत्।
आवीन्माम्। आवीद्वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः॥१२॥

ब्रह्मानन्दवल्ली

तै॰आ॰ ८

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः॥

उपनिषत्प्रारम्भः

ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति॥

तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरुषः। स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥१॥

अन्नमयात्मप्रकाशः श्लोकः

अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीꣳश्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्ततः। अन्नꣳ हि भूतानां ज्येष्ठम्। तस्मात् सर्वौषधमुच्यते। सर्वं वै तेऽन्नमाप्नुवन्ति। येऽन्नं ब्रह्मोपासते। अन्नꣳ हि भूतानां ज्येष्ठम्। तस्मात् सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति।

तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥२॥

प्राणमयात्मप्रकाशः श्लोकः

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात् सर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात् सर्वायुषमुच्यत इति।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मात् प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥३॥

मनोमयात्मप्रकाशः श्लोकः

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं

पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥४॥

विज्ञानमयात्मप्रकाशः श्लोकः

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान् कामान् समश्नुत इति।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥५॥

ब्रह्मास्ति

असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।

अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता३ उ।

सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदꣳ सर्वमसृजत। यदिदं किञ्च। तत् सृष्ट्वा।

तद॒देवानु॒प्राविशत्। तद॑नुप्र॒विश्य॑। सच्च॒ त्यच्चा॑भवत्। नि॒रुक्तं॒ चानि॑रुक्तं च। नि॒लय॑नं॒ चानि॑लयनं च। वि॒ज्ञानं॒ चावि॑ज्ञानं च। सत्यं चानृतं च स॑त्यम॒भवत्। यदि॑दं कि॒ञ्च। तत् सत्यमि॑त्या च॒क्षते। तदप्येष श्लो॑को भ॒वति॥६॥

अस्ति ब्रह्म

अस॒द्वा इ॒दमग्र॑ आसीत्। ततो॒ वै सद॑जायत। तदात्मानँ॒ स्वय॑मकु॒रुत। तस्मात्तत् सुकृतमुच्य॑त इ॒ति। यद्वै॑ तत् सु॒कृतम्। र॑सो वै॒ सः। रसँ॒ ह्येवायं लब्ध्वाऽऽन॑न्दी भ॒वति। को ह्येवान्या॑त् कः प्रा॒ण्यात्। यदेष आकाश आन॑न्दो न॒ स्यात्। एष ह्येवाऽऽन॑न्दया॒ति।

य॒दा ह्ये॑वैष॒ एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रति॑ष्ठां वि॒न्दते। अथ सोऽभयं ग॑तो भ॒वति। य॒दा ह्ये॑वैष॒ एतस्मिन्नुदरमन्त॑रं कु॒रुते। अथ तस्य भ॑यं भ॒वति। तत्त्वेव भयं विदुषोऽम॑न्वान॒स्य। तदप्येष श्लो॑को भ॒वति॥७॥

भयहेतुः

भी॒षाऽस्मा॒द्वात॑ः पवते। भी॒षोदे॑ति॒ सूर्य॑ः। भीषाऽस्मादग्नि॑श्चेन्द्र॒श्च। मृत्युर्धावति पञ्च॑म इ॒ति।

ब्रह्मानन्दमीमांसा

सैषाऽऽनन्दस्य मीमा॑ꣳसा भ॒वति। युवा स्यात् साधु यु॑वाऽध्या॒यकः। आशिष्ठो दृढिष्ठो॑ बलि॒ष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य॑ पूर्णा॒ स्यात्। स एको मानुष॑ आन॒न्दः।

ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः।
श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः।
स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये
शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां
चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं
पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां
देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां
देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा
देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां
देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य
चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक
इन्द्रस्याऽऽनन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये
शतमिन्द्रस्याऽऽनन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य
चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः
प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं
प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य
चाकामहतस्य॥

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवं वित्।
अस्माल्लोकात् प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतं
प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति।
एतं विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमयमात्मानमुप
संक्रामति। तदप्येष श्लोको भवति॥८॥

यतो॒ वाचो॒ निव॑र्तन्ते। अप्रा॑प्य॒ मन॑सा स॒ह। आनन्दं ब्रह्म॑णो वि॒द्वान्। न बिभेति कुत॑श्चने॒ति। एत॒ꣳ ह वाव॑ न त॒पति। किमह॒ꣳ साधु॑ नाक॒रवम्। किमहं पापमकर॑वमि॒ति। स य एवं विद्वानेते आत्मा॑नꣳ स्पृ॒णुते। उ॒भे ह्ये॑वैष॒ एते आत्मा॑नꣳ स्पृ॒णुते। य ए॒वं वेद॑। इत्यु॑प॒निष॑त्॥९॥

स॒ह ना॑ववतु। स॒ह नौ॑ भुनक्तु। स॒ह वी॒र्यं॑ करवावहै। ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

भृगुवल्ली

तै॰आ॰ ९

स॒ह ना॑ववतु। स॒ह नौ॑ भुनक्तु। स॒ह वी॒र्यं॑ करवावहै। ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

भृगोरुपसत्तिः

भृगु॒र्वै वा॑रु॒णिः। वरु॑णं॒ पित॑र॒मुप॑ससार। अधी॑हि भगवो॒ ब्रह्मेति॑।

पितुर्वरुणस्योत्तरम्

तस्मा॑ ए॒तत् प्रो॑वाच। अन्नं॑ प्रा॒णं चक्षु॒ः श्रोत्रं॒ मनो॒ वाच॒मिति॑। त॒ꣳ हो॑वाच। यतो॒ वा इ॒मानि॒ भूता॑नि॒ जाय॑न्ते। येन॒ जाता॑नि॒ जीव॑न्ति। यत् प्रय॑न्त्य॒भिसंवि॑शन्ति। तद्विजि॑ज्ञासस्व। तद्ब्रह्मेति॑। स तपो॑ऽतप्यत। स तप॑स्त॒प्त्वा॥१॥

भृगोर्ब्रह्मप्रतिपत्तिक्रमः

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभि संविशन्तीति।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥२॥

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभि संविशन्तीति।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥३॥

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयन्त्यभि संविशन्तीति।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥४॥

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभि संविशन्तीति।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥५॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।

सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥६॥

अन्ननिन्दानिषेधः

अन्नं न निन्द्यात्। तद् व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः।

तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥७॥

अन्नं न परिचक्षीत। तद् व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः।

तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥८॥

अन्नं बहु कुर्वीत। तद् व्रतम्। पृथिवी वा अन्नम्॥
आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता।

तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥९॥

न कञ्चन वसतौ प्रत्याचक्षीत। तद् व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते।

एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते॥ य एवं वेद।

ब्रह्मोपासनप्रकाराः

क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः।

अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजातिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे॥

तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति। तन्मह इत्युपासीत। महान् भवति। तन्मन इत्युपासीत। मानवान् भवति॥ तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः। तद् ब्रह्मेत्युपासीत। ब्रह्मवान्

भवति। तद् ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तः सपत्नाः। परि येँऽप्रियाँ भ्रातृव्याः॥

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः॥

आत्मज्ञस्य कृतकृत्यता

स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमयमात्मानमुपसंक्रम्य। एतं मनोमयमात्मानमुपसंक्रम्य। एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानन्दमयमात्मानमुपसं क्रम्य। इमाल्लोकान् कामान्नी कामरूप्यनुसंचरन्। एतत्साम गायन्नास्ते।

हा३वु हा३वु हा३वु॥ अहमन्नमहमन्नमहमन्नम्। अहमन्नादो३ हमन्नादो३हमन्नादः। अहꣳ श्लोककृदहꣳ श्लोककृदहꣳ श्लोककृत्। अहमस्मि प्रथमजा ऋता३स्य। पूर्वं देवेभ्यो अमृतस्य ना३भायि। यो मा ददाति स इ देव मा३ऽवाः। अहमन्नमन्नमदन्तमा३द्मि। अहं विश्वं भुवनमभ्यभवाम्। सुवर्न ज्योतीः। य एवं वेद। इत्युपनिषत्॥१०॥

मन्त्रप्रश्नः १

विवाहे वरप्रेषणादयः

प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिर्वराꣳ अभि षुप्रसीदत। अस्माकमिन्द्र उभयं जुजोषति यत्सौम्यस्याऽन्धसो बुबोधति॥१.१॥ अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम्। [35]समर्यमा सं भगो नो निनीयात् सं जाँस्पत्यꣳ सुयममस्तु देवाः॥२॥ अभ्रातृघ्नीं वरुणाऽपतिघ्नीं बृहस्पते। इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितः सुव॥३॥ अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यः सुमनाः सुवर्चाः। जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे॥४॥ इदमहं या त्वयि पतिघ्न्यलक्ष्मिस्तां निर्दिशामि॥५॥ जीवाꣳ रुदन्ति विमयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः। वामं पितृभ्यो य इदꣳ समेरिरे मयः पतिभ्यो जनयः परिष्वजे॥६॥ व्युक्षत्क्रूरमुदचन्त्वाप आऽस्यै ब्राह्मणाः स्नपनꣳ हरन्तु। अवीरघ्नीरुदचन्त्वापः॥७॥ अर्यम्णो अग्निं परि यन्तु क्षिप्रं प्रतीक्षन्ताꣳ श्वश्रो देवराँश्च॥८॥ खेऽनसः खे रथः खे युगस्य शचीपते। अपालामिन्द्र त्रिः पूत्व्यकरत् सूर्यवर्चसम्॥९॥ शं ते हिरण्यꣳ शमु सन्त्वापः शं ते मेधी भवतु शं युगस्य तृद्म। शं त आपः शतपवित्रा भवन्त्वथा पत्या तन्वꣳ सꣳ सृजस्व॥१.१०॥

[35] "सं भगो" इति वा

विवाहे स्नानादयः

हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒काः प्रच॑क्रमुर्हि॒त्वाऽव॒द्यमाप॑ः। श॒तं प॒वित्रा॒ वित॑ता॒ ह्यासु॒ ताभि॑ष्ट्वा दे॒वः स॑वि॒ता पु॑नातु॥२.१॥ हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्व॒ग्निः। या अ॒ग्निं गर्भं॑ दधि॒रे सु॒वर्णा॒स्तास्त॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥२॥ यासा॒ꣳ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्याऽनृते अ॑व॒पश्य॒ञ्जना॑नाम्। या अ॒ग्निं गर्भं॑ दधि॒रे सु॒वर्णा॒स्तास्त॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥३॥ यासां॑ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा निवि॑ष्टाः। या अ॒ग्निं गर्भं॑ दधि॒रे सु॒वर्णा॒स्तास्त॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥४॥ शि॒वेन॑ त्वा॒ चक्षु॑षा पश्यन्त्वापः शि॒वया॑ त॒न्वोप॑स्पृशन्तु॒ त्वच॑ं ते। घृ॒त॒श्चुत॒ः शुच॑यो॒ याः पा॑व॒कास्तास्त॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु॥५॥ परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वत॑ः। वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः॥६॥ {[36]आ॒शासा॑ना सौमन॒सं प्र॒जाꣳ सौभा॑ग्यं त॒नूम्। अ॒ग्नेरनु॑व्रता भू॒त्वा सं न॑ह्ये सूकृ॒ताय॒ कम्॥७॥} पू॒षा त्वे॒तो न॑यतु॒ हस्त॒गृह्या॒ऽश्विनौ॑ त्वा॒ प्रव॑हता॒ꣳ रथे॑न। गृ॒हान् ग॑च्छ गृ॒हप॑त्नी॒ यथाऽसो॑ व॒शिनी॒ त्वं वि॒दथ॒माव॑दासि॥२.८॥

विवाहे आज्यभागान्ते अभिमन्त्रणम्

सोम॑ः प्रथ॒मो वि॑विदे गन्ध॒र्वो वि॑विद॒ उत्त॑रः। तृ॒तीयो॑ अ॒ग्निष्टे॒ पति॑स्तु॒रीय॑स्ते मनुष्य॒जाः॥३.१॥ सोमो॑ऽददद् गन्ध॒र्वाय॑

[36] आ॒शासा॒नेत्ये॒षा।

गन्ध॒र्वोऽद॑दद॒ग्नये॑। र॒यिं च॑ पु॒त्राꣳश्चा॑दाद॒ग्निर्मह्य॒मथो॑ इ॒माम्॥३॥ गृ॒भ्णामि॑ ते सुप्रजा॒स्त्वाय॒ हस्तं॒ मया॒ पत्या॑ ज॒रद॑ष्टि॒र्यथाऽसः॑। भगो॑ अर्य॒मा स॑वि॒ता पुर॑न्धि॒र्मह्यं॑ त्वाऽदु॒र्गार्ह॑पत्याय दे॒वाः॥३॥ ते ह॒ पूर्वे॒ जना॑सो॒ यत्र॑ पूर्व॒वहो॑ हि॒ताः। मू॒र्ध॒न्वान् यत्र॑ सौभ्र॒वः पूर्वो॑ दे॒वेभ्य॒ आत॑पत्॥४॥ सर॑स्वति॒ प्रेदम॑व॒ सुभ॑गे॒ वाजि॑नीवति। तां त्वा॒ विश्व॑स्य भूतस्य॑ प्र॒गाया॑मप्यग्र॒तः॥५॥ य एति॑ प्र॒दिश॒ः सर्वा॒ दिशोऽनु॒ पव॑मानः। हिर॑ण्यहस्त ऐर॒मः स त्वा॒ मन्म॑नसं कृणोतु॥६॥ एक॑मि॒षे विष्णु॒स्त्वाऽन्वे॑तु द्वे ऊर्जे त्रीणि॑ व्र॒ताय॑ च॒त्वारि॒ मायो॑भवाय॒ पञ्च॑ प॒शुभ्य॒ः षड्ऋ॒तुभ्य॑ः स॒प्त स॒प्तभ्यो॒ होत्रा॑भ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु॥१३॥ सखा॑ स॒प्तप॑दा भव॒ सखा॑यौ स॒प्तप॑दा बभूव स॒ख्यं ते॑ गमेयꣳ स॒ख्यात्ते॒ मा यो॑षꣳ स॒ख्यान्मे॒ मा यौ॑ष्ठा॒ः सम॑याव॒ संक॑ल्पावहै॒ संप्रि॑यौ रोचि॒ष्णू सु॑मन॒स्यमा॑नौ। इष॒मूर्ज॑म॒भि सं॒वसा॑नौ॒ सं नौ॒ मना॑ꣳसि॒ सं व्र॒ता समु॑ चि॒त्तान्याक॑रम्। [37]सा त्वम॒स्यमू॒हमम॒मूहम॑स्मि॒ सा त्वं द्यौर॒हं पृ॑थि॒वी त्वꣳ रेत॑ो॒ऽहꣳ रेतो॒भृत्त्वं मनो॒ऽहम॑स्मि॒ वाक् त्वꣳ सामा॒हम॒स्म्यृक्त्व॒ꣳ सा मामनु॑व्रता भव पु॒ꣳसे पु॒त्राय॒ वेत्त॑वै श्रि॒यै पु॒त्राय॒ [38] वेत्त॑व॒ एहि॑ सूनृते॥३.१४॥

विवाहे प्रधानाहुतिमन्त्राः

सोमा॑य जनि॒विदे॒ स्वाहा॑ गन्ध॒र्वाय॑ जनि॒विदे॒ स्वाहा॒ऽग्नये॑ जनि॒विदे॒ स्वाहा॑। क॒न्य॒ला पि॒तृभ्यो॑ य॒ती प॑तिलो॒कमव॑

[37] "त्वम॒स्यमू॒हम॑मू॒हम॑स्मि॒" इति वा

[38] "वेत्त॑वा॒ एहि॑" इति वा

दी॒क्षाम॑दास्थ॒ स्वाहा᳚। प्रेतो मु॒ञ्चाति॒ नामुत॑ः सुब॒द्धाम॒मुत॑स्करत्। यथे॒यमि॑न्द्र मीढ्वः सुपु॒त्रा सु॒भगाऽस॑ति। इ॒मां त्वमि॑न्द्र मीढ्वः सुपु॒त्राꣳ सु॒भगां᳚ कुरु [39]। दशा᳚स्यां पु॒त्राना धे॑हि॒ पति॑मेकाद॒शं कृ॑धि। अ॒ग्निरै॑तु प्रथ॒मो दे॒वता॑नाꣳ सो᳚ऽस्यै प्र॒जां मु॑ञ्चतु मृत्युपा॒शात्। तद॒यꣳ राजा॒ वरु॒णोऽनु॑मन्यतां॒ यथे॒यꣳ स्त्री पौत्र॑म॒घं न रोऽदा᳚त्। इ॒माम॒ग्निस्त्रा॑यतां॒ गार्ह॑पत्यः प्र॒जाम॑स्यै नयतु दी॒र्घमायु॑ः। अशू᳚न्योपस्था॒ जीव॑तामस्तु मा॒ता पौत्र॑मान॒न्दम॒भि प्रबु॑ध्यतामि॒यम्। मा ते॑ गृहे नि॒शि घोष॒ उत्था॑द॒न्यत्र॒ त्वद्रु॑द॒त्य॑ः सं॑वि॑शन्तु। मा त्वं वि॑के॒श्युर॒ आवधि॑ष्ठा जी॒वप॑त्नी पतिलो॒के विरा॑ज॒ पश्य॑न्ती प्र॒जाꣳ सु॑मन॒स्यमा॑नाम्। द्यौस्ते॑ पृ॒ष्ठꣳ र॑क्षतु वा॒यु॒रू॒रू अ॒श्विनौ॑ च॒ स्तन॒ं धय॑न्तꣳ सवि॒ताऽभिर॑क्षतु। आवास॑सः परि॒धाना॒द् बृह॒स्पति॒र्विश्वे॑ दे॒वा अ॒भि र॑क्षन्तु प॒श्चात्। अ॒प्र॒ज॒स्तां पौ᳚त्रमृत्युं पा॒प्मान॑मु॒त वा॒ऽघम्। शी॒र्ष्णः स्रज॑मिवो॒न्मुच्य॑ द्वि॒षद्भ्य॒ः प्रति॑मुञ्चामि॒ पाश᳚म्। (इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने।) {इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युराच॑के॥ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा᳚स्ते॒ यज॑मानो ह॒विर्भि॑ः। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳ स॒ मा न॒ आयु॒ः प्रमो॑षीः॥ त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेडोऽव॑यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषा॑ꣳसि॒ प्रमु॑मुग्ध्य॒स्मत्॥ स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ। अव॑यक्ष्व नो॒ वरु॑ण॒ꣳ ररा॑णो वी॒हि मृ॑डी॒कꣳ सु॒हवो॑

---

[39] “कृणु” इति वा

न एधि॥} त्वम॑ग्ने अ॒याऽस्य॒या सन्मन॑सा हि॒तः। अ॒या सन्
ह॒व्यमू॑हिषे॒ऽया नो॑ धेहि भेष॒जम्॥४॥

विवाहे अश्मास्थापनादयः

आ ति॑ष्ठे॒मम॑श्मा॑न॒मश्मे॑व॒ त्वꣳ स्थि॒रा भ॑व। अ॒भि ति॑ष्ठ पृतन्य॒तः सह॑स्व पृतनाय॒तः। इ॒यं ना॒र्युप॑ ब्रूते॒ कल्पा॑ँन्यावपन्ति॒का। दी॒र्घा॒यु॒र॑स्तु मे॒ पति॒र्जीवा॑तु श॒रद॑ः श॒तम्। तुभ्य॒मग्रे॒ पर्य॑वहन् सू॒र्यां व॑ह॒तुना॑ स॒ह। पुन॒ः पति॑भ्यो जा॒यां दा अ॑ग्ने प्र॒जया॑ स॒ह। पुन॒ः पत्नी॑म॒ग्निर॑दा॒दायु॑षा स॒ह वर्च॑सा। दी॒र्घा॒युर॑स्या॒ यः पति॒ः स ए॑तु श॒रद॑ः श॒तम्। विश्वा॑ उ॒त त्वया॑ व॒यं धारा॑ उद॒न्या॑ इव। अति॑गाहेमहि॒ द्विष॑ः। आ ति॑ष्ठे॒मम॑श्मा॑नम्। अ॒र्य॒मण॒ं नु दे॒वं क॒न्या॑ अ॒ग्निम॑यक्षत। स इ॒मां दे॒वो अ॑ध्व॒रः प्रेतो मु॒ञ्चाति॒ नामुत॑ः सुब॒द्धाम॒मुत॑स्करत्। तुभ्य॒मग्रे॒ पर्य॑वह॒न्पुन॒ः पत्नी॑म॒ग्निर॑दा॒द्विश्वा॑ उ॒त त्वया॑ व॒यमा ति॑ष्ठे॒मम॑श्मा॑नम्। त्वम॑र्य॒मा भ॑वसि॒ यत्क॒नीना॒ं नाम॑ स्व॒धाव॒त्स्वर्य॑ं बि॒भर्षि॑। अ॒ञ्जन्ति॑ वृक्षꣳ सुधि॑त॒ं न गोभि॒र्यद्दम्प॑ती॒ सम॑नसा कृणोषि॑। तुभ्य॒मग्रे॒ पर्य॑वह॒न्पुन॒ः पत्नी॑म॒ग्निर॑दा॒द्विश्वा॑ उ॒त त्वया॑ व॒यम्। प्र त्वा॑ मुञ्चामि॒ वरु॑णस्य॒ पाशा॒द्येन॒ त्वाऽब॑ध्नात् सवि॒ता सु॒केत॑ः। धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒के स्यो॒नं ते॑ स॒ह पत्या॑ करोमि। इ॒मं विष्या॑मि॒ वरु॑णस्य॒ पाश॒ं यमब॑ध्नीत सवि॒ता सु॒शेव॑ः। धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒केऽरि॑ष्टां त्वा स॒ह पत्या॑ कृणोमि। अ॒याश्चा॒ग्नेऽस्य॑नभिश॒स्तीश्च॑ [40]स॒त्यमित्त्वम॒या अ॑सि।

40 “स॒त्यमि॑त्त्वम॒या” इति वा

अयंसा मनंसा [41]धृतोऽयसां हव्यमूंहिषेऽया नों धेहि भेषजम्॥५॥

विवाहे प्रयाणकाले रथस्योत्तम्भनी

सत्येनोत्तंभिता भूमिः सूर्येणोत्तंभिता द्यौः। ऋतेनांदित्यास्तिष्ठंन्ति दिवि सोमो अधिं श्रितः। (युञ्जन्तिं ब्रध्नं योगेंयोगे।) {युञ्जन्तिं ब्रध्नमंरुषं चरंन्तं परिंतस्थुषंः। रोचंन्ते रोचना दिवि॥ योगेंयोगे तवस्तंरं वाजेंवाजे हवामहे। सखांय इन्द्रंमूतयें॥} सुकिंशुकं शंल्मलिं विश्वरूंपं हिरंण्यवर्णं सुवृतं सुचक्रम्। आरोंह वध्वमृतंस्य लोकं स्योनं पत्यें वहतुं कृंणुष्व। उदुंत्तरमारोहंन्ती व्यस्यन्तीं पृतन्यतः। मूर्धानं पत्युरारोंह प्रजयां च विराड् भंव। संराज्ञी श्वशुंरे भव संराज्ञीं श्वश्रुवां भंव[42]। ननांन्दरि संराज्ञीं भव संराज्ञी अधिं देवृषुं। स्नुषाणां श्वशुंराणां प्रजायांश्च धनंस्य च। पतींनां च देवृणां चं सजातानां विराड् भंव। नीललोहिते भंवतः कृत्या सक्तिर्व्यंज्यते। एधंन्तेऽस्या ज्ञातयः पतिंर्बन्धेषुं बध्यते। ये वध्वश्चन्द्रं वंहतुं यक्ष्मा यन्ति जनां अनुं। पुनस्तान् यज्ञियां देवा नयंन्तु यत आगंताः। मा विंदन्परिपन्थिनो य आसीदंन्ति दम्पंती। सुगेभिंर्दुर्गमतीतामपंद्रान्त्वरांतयः। सुगं पन्थांनमारुंक्षमरिंष्टं स्वस्तिवाहंनम्। यस्मिंन्वीरो न रिष्यंत्यन्येषां विन्दते वसुं॥६॥

---

[41] "धृतोऽयसां" इति वा

[42] "श्वश्वां भंव" इति वा

विवाहे तीर्थादिव्यतिक्रमजपादयः

ता मंन्दसा॒ना मनु॑षो दुरो॒ण आध॒त्त॒ꣳ र॒यिं द॒शवी॑रं वच॒स्यवे॑। कृ॒तं ती॒र्थꣳ सु॑प्रपा॒णꣳ शु॑भस्पती स्था॒णुं प॑थे॒ष्ठामप॑ दु॒र्म॒तिꣳ ह॑तम्। अ॒यं नो॑ म॒ह्याः पा॒रꣳ स्व॒स्ति ने॑ष॒द्वन॒स्पति॑ः। सीरा॑ नः सु॒तरा॑ भव दीर्घायु॒त्वाय॒ वर्च॑से। अ॒स्य॒ पा॒रे नि॑र्ऋ॒तस्य॑ जी॒वा ज्योति॑रशीमहि। म॒ह्या इ॑न्द्रः स्व॒स्तये॑। यदृते चि॑दभि॒ श्रिषः॑ पु॒रा ज॒र्तृभ्य॑ आ॒तृद॑ः। संधा॑ता स॒न्धिं म॒घवा॑ पुरो॒वसु॒र्निष्क॑र्ता॒ [43]विह्रु॑तं॒ पुन॑ः। (इडा॑मग्न इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने॒ त्वमं॑ग्ने अ॒याऽसिं।) {इडा॑मग्ने पुरु॒दꣳसꣳ स॒निं गोः श॑श्वत्त॒मꣳ हव॑मनाय साध। स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाऽग्ने॒ सा ते॑ सुम॒तिर्भू॒त्व॒स्मे॥ इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युरा च॑के॥ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा॑स्ते॒ यज॑मानो ह॒विर्भि॑ः। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳ स॒ मा न॒ आयु॒ः प्रमो॑षीः॥ त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेडोऽव॑यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषाꣳ॑सि॒ प्रमु॑मुग्ध्य॒स्मत्॥ स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्युं॑ष्टौ। अव॑यक्ष्व नो॒ वरु॑ण॒ꣳ ररा॑णो वी॒हि मृ॑डी॒कꣳ सु॒हवो॑ न एधि॥ त्वम॑ग्ने अ॒याऽस्य॒या सन्मन॑सा हि॒तः। अ॒या सन् ह॒व्यमू॑हिषे॒ऽया नो॑ धेहि भेष॒जम्॥} ये ग॑न्ध॒र्वा अ॑प्स॒रस॑श्च दे॒वीरे॒षु वृ॒क्षेषु॑ वानस्प॒त्येष्वास॑ते। शि॒वास्ते अ॒स्यै व॒ध्वै॑ भवन्तु॒ मा हिꣳ॑सिषुर्वह॒तुमूह्यमा॑नाम्। या ओष॑धयो॒ या न॒द्यो॑ यानि॒ धन्वा॑नि॒ ये वना॑। ते त्वा॑ वधु प्र॒जाव॑तीं॒ प्र त्वे मु॑ञ्च॒न्त्वꣳह॑सः।

---

[43] “विह्रु॑तं॒ पुन॑ः” इति वा

संकांशयामि वहतुं ब्रह्मंणा गृहैरघोंरेण चक्षुंषा मैत्रेंण। पर्याणंद्धं विश्वरूंपं यदस्याः स्योनं पतिंभ्यः सविता कृंणोतु तत्। आ वांमगन्त्सुमतिर्वांजिनीवसू न्यंश्विना[44] हृत्सु कामां अयंसत। अभूंतं गोपा मिंथुना शुंभस्पती प्रिया अंर्यम्णो दुर्यां अशीमहि। अयं नों देवः संविता बृहस्पतिंरिन्द्राग्नी मित्रावरुंणा स्वस्तयें। त्वष्टा विष्णुंः प्रजयां सꣳरराणः काम आयांतं कामांय त्वा वि मुंञ्चतु॥७॥

विवाहे चर्मास्तरणादयः

शर्म वर्मेदमाहंरास्यै नार्यां उपस्तिरें। सिनींवालि प्रजांयतामियं भगंस्य सुमता अंसत्। गृहान् भद्रान् सुमनंसः प्रपद्येऽवीरघ्नी वीरवंतः सुवीरांन्। इरां वहंतो घृतमुक्षमांणास्तेष्वहꣳ सुमनाः सं विंशामि। आगंन्गोष्ठं महिंषी गोभिरश्वैरायुंष्मत्पत्नी प्रजयां स्वर्वित्। बह्वीं प्रजां जनयंन्ती सुरत्नेममग्निꣳ शतहिंमाः सपर्यात्। अयमग्निर्गृहपंतिः सुसꣳसत्पुंष्टिवर्धनः। यथा भगंस्याभ्यां ददंद्रयिं पुष्टिमथों प्रजाम्। प्रजयां आभ्यां प्रजापत इन्द्राग्नी शर्मं यच्छतम्। यथैनंयोर्न प्रंमीयातां उभयोर्जीवंतोः प्रजाः। तेनं भूतेनं हविषाऽयमाप्यांयतां पुनंः। जायां यामंस्मा आवांक्षुस्ताꣳ रसेंनाभिवंर्धताम्। अभिवंर्धतां पयंसाऽभि राष्ट्रेणं वर्धताम्। रय्या सहस्रंपोषसेमौ स्तामनंपेक्षितौ। इहैव स्तं मा [45]वियौंष्टं विश्वमायुर्व्यंश्नुतम्। मह्या इंन्द्रः स्वस्तयें। ध्रुवैधि पौंष्या मयि मह्यं

---

[44] "वसून्यश्विंना" इति वा

[45] "वियौंष्ठं" इति वा

त्वाऽदाद् बृहस्पतिः। मया पत्या प्रजावती सं जीव शरदः शतम्। त्वष्टा जायामजनयत्त्वष्टाऽस्यै त्वां पतिम्। त्वष्टा सहस्रमायूंषि दीर्घमायुः कृणोतु वाम्। (इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि)॥८॥

विवाहे चर्मोपवेशनादयः

इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो रायस्पोषो निषीदतु। सोमेनादित्या बलिनः सोमेन पृथिवी दृढा। अथो नक्षत्राणामेषामुपस्थे सोम आधितः। प्रस्वः स्थः प्रेयं प्रजया भुवने शोचेष्ट। इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं सं सृजस्वाथा जीव्री विदथमावदासि। सुमङ्गलीरियं वधूरिमां समेत पश्यत। सौभाग्यमस्यै दत्वायाथास्तं विपरेतन। ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवतः स्थितम्। त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः। सप्त ऋषयः प्रथमां कृत्तिकानामरुन्धतीं। यद्ध्रुवतां ह निन्युः षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टमी। सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्। उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम। पशूंश्च मह्यमावह जीवनं च दिशो दिश[46]। मानो हिंसीज्ञातवेदो गामश्वं पुरुषं जगत्। अबिभ्रदग्न आगहि श्रिया मा परि पातय॥९॥

[46] "दिशो दश" इति वा

विवाहे दण्डोत्थापनमन्त्रादयः

उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा। अन्यामिच्छ प्रफर्व्यꣳ सं जायां पत्या सृज। उदीर्ष्वातः [47]पतिंवति ह्येषा विश्वावसुं नमसा गीर्भिरीट्टे। अन्यामिच्छ पितृषदं व्यक्ताꣳ स ते भागो जनुषा तस्य विद्धि। अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यैतां कृणोमि स्वाहा। वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा।
प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चान्तरिक्षं च सिन्धुश्च समुद्रश्च सरस्वाꣳश्च विश्वव्यचाश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा। मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा। चित्तं च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च विज्ञातं च विज्ञानं च नाम च क्रतुश्च दर्शश्च पूर्णमासश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा। भूः स्वाहा भुवः स्वाहा सुवः स्वाहोꣳ स्वाहा॥१०॥

[47] “पतिंवती ह्येषा” इति वा

विवाहे वधवरयोरन्योन्यसमीक्षणादयः

अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑ताना॒ं तप॑सो जा॒तं तप॑सो॒ विभू॑तम्। इ॒ह प्र॒जामि॒ह र॒यिꣳ ररा॑णः॒ प्रजा॑यस्व प्र॒जया॑ पुत्रकाम। अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑ना॒ꣳ स्वाया॑ᳺ [48]त॒नूꣳ ऋ॒त्विये॒ नाथ॑मानाम्। उप॒ मामु॒च्चा यु॑व॒तिर्ब॑भूया॒ः प्रजा॑यस्व प्र॒जया॑ पुत्रकामे। सम॑ञ्जन्तु॒ विश्वे॑ दे॒वाः समापो॒ हृद॑यानि नौ। सं मा॑त॒रिश्वा॒ सं धा॒ता समु॒ देष्ट्री॑ दिदेष्टु नौ। प्रजा॑पते त॒न्व॑ं मे जुषस्व॒ त्वष्ट॑र्दे॒वेभि॑ः स॒हसा॒म इ॑न्द्र। विश्वै॑ᳺर्दे॒वै रा॒तिभि॑ः सꣳररा॒णः पु॒ꣳसां ब॑हू॒नां मा॒तर॑ः स्याम। आ न॑ः प्र॒जां ज॑नयतु प्र॒जाप॑तिराजर॒साय॒ सम॑नक्त्वर्य॒मा। अदु॑र्मङ्ग॒लीः पतिलो॒कमावि॑श॒ [49]शं नो॑ भव द्वि॒पदे॒ शं चतु॑ष्पदे। तां पू॑षञ्छि॒वत॑मा॒मेर॑यस्व॒ यस्यां॒ बीज॑ं मनु॒ष्या॑ वप॑न्ति। या न॑ ऊ॒रू उ॑श॒ती वि॒स्रया॑ते॒ [50]यस्या॑मु॒शन्त॑ः प्र॒हर॑म॒ शेफ॑ᳺम्॥११॥

गर्भाधाने समावेशनजपः

आरो॑हो॒रुमुप॑बर्हस्व बा॒हुं परि॑ष्वजस्व जा॒याꣳ सु॑मन॒स्यमा॑नः। तस्या॑ᳺ पुष्यतं मिथु॒नौ सयो॑नी ब॒ह्वीं प्र॒जां ज॒नय॑न्तौ॒ सरे॑तसा। आ॒र्द्रयाऽर॑ण्या॒ यत्राम॑न्थ॒त्पुरु॑षं॒ पुरु॑षेण श॒क्रः। तद॒तौ मि॑थु॒नौ सयो॑नी प्र॒जया॒ऽमृते॑न॒ह ग॑च्छतम्। अ॒हं गर्भ॒मद॑धा॒मोष॑धीष्व॒हं विश्वे॑षु॒ भुव॑नेष्व॒न्तः। अ॒हं प्र॒जा अ॑जनयं पितृ॒णाम॒हं जनि॑भ्यो

[48] "त॒नू ऋ॒त्विये॒", "त॒नूमृ॒त्विये॒" इति वा

[49] "शं न॑ एधि द्वि॒पदे॒" इति वा

[50] "यस्या॑मु॒शन्त॒ः प्रह॑रेम॒ शेफ॑ᳺम्" इति वा

[51]अव॒रीषु॑ पु॒त्रान्। पु॒त्रिणे॒मा कु॑मा॒रिणा॒ विश्व॒मायु॒र्व्य॑श्नुतम्। उ॒भा हिर॑ण्यपेशसा वी॒तिहो॑त्रा कृ॒तद्व॑सू। द॒श॒स्यं त्वा॒ऽमृता॑य॒ क॑ शमूधो॑ रोम॒श॑ हं॑थो दे॒वेषु॑ कृ॒णुतो॒ दुव॑ः॥१२॥

गर्भाधाने ऋतुसमावेशः

विष्णु॒र्योनि॑ं कल्पयतु॒ त्वष्टा॑ रू॒पाणि॑ पिꣳशतु। आसि॑ञ्चतु प्र॒जाप॑तिर्धा॒ता गर्भ॑ं दधातु ते। गर्भ॑ं धेहि सिनीवालि॒ गर्भ॑ं धेहि सरस्वति। गर्भ॑ं ते अ॒श्विनौ॑ दे॒वावाध॑त्तां॒ पुष्क॑रस्रजा। हि॒र॒ण्ययी॑ अ॒रणी॒ यं नि॒र्मन्थ॑तो अ॒श्विना॑। तं ते॒ गर्भ॑ꣳ हवामहे दश॒मे मा॒सि सूत॑वे। यथे॒यं पृ॑थि॒वी म॒ही तिष्ठ॑न्ती॒ गर्भ॑माद॒धे। [52]ए॒वं त्वं गर्भ॒माध॑त्स्व दश॒मे मा॒सि सूत॑वे। यथा॑ पृथि॒व्य॑ग्निगर्भा॒ द्यौर्यथेन्द्रे॑ण ग॒र्भिणी॑। वा॒युर्यथा॑ दि॒शां [53]गर्भ॑ ए॒वं गर्भ॑ं दधामि ते। विष्णो॒ श्रेष्ठे॑न रू॒पेणा॒स्यां नार्या॑ं गवी॒न्या॑म्। पुमा॑ꣳसं॒ गर्भ॒माधे॑हि दश॒मे मा॒सि सूत॑वे। नेज॑मेष॒ परा॑पत॒ [54]सपु॑त्रः॒ पुन॒राप॑त। अ॒स्यै मे पु॒त्रका॑माये॒ गर्भ॒माधे॑हि॒ यः पुमा॑न्। व्यस्य॒ योनि॒ं प्रति॒ रेतो॑ गृहाण॒ पुमा॑न्पु॒त्रो धी॑यतां॒ गर्भो॑ अ॒न्तः। तं मा॒ता द॑श॒मासो॑ बिभर्तु॒ स जा॑यतां वी॒रत॑म॒ः स्वाना॑म्। आ ते॒ गर्भो॒ योनि॑मेतु पुमा॒न्बाण॑ इवेषु॒धिम्। आ वी॒रो जा॑यतां पुत्रस्ते॑ दश॒मास्य॑ः॥१३॥

---

[51] "अप॒रीषु॑" इति वा

[52] "ए॒वं तं" इति वा

[53] "गर्भ॑ ए॒व" इति वा

[54] "सुपु॑त्र॒ः" इति वा

क॒रोमि॑ ते प्राजाप॒त्यमा गर्भो॒ योनि॑मेतु ते। अनू॑नः पू॒र्णो
जा॑यता॒मश्लो॒णोऽपि॑शाचधीतः। पुमाꣳ॑स्ते पु॒त्रो [55]ना॑रि॒ तं
पुमा॒ननु॑जायताम्। तानि॑ भ॒द्राणि॒ बीजा॑न्यृष॒भा ज॑नयन्तु नौ। यानि॑
भ॒द्राणि॒ बीजा॑न्यृष॒भा ज॑नय॒न्ति नः॑। तैस्त्वं॑ पु॒त्रान् वि॑न्दस्व॒ सा
प्र॒सूर्धे॑नु॒का भ॑व। काम॒प्रम॑ृध्यतां॒ मह्य॒मप॑राजितमे॒व मे॑। यं काम॑
का॒मये॑ देव॒ तं मे॑ वायो॒ सम॑र्धय॥

अर्थप्राध्वस्य परिक्षवपरिकासने जपः

अ॒नु॒ह॒वं प॑रिह॒वं प॑रीवा॒दं प॑रिक्ष॒पम्। दुः॒स्वप्नं॒ दुरु॑दितं॒ तद्द्वि॒षद्भ्यो॑
दिशाम्य॒हम्। अनु॑हूतं॒ परि॑हूतꣳ श॒कुने॒र्यदशा॑कु॒नम्[56]। मृ॒गस्य॑
सृ॒तम॑क्ष्णया॒ तद्द्वि॒षद्भ्यो॑ दिशाम्य॒हम्।

चित्रियस्य वनस्पतेरभिमन्त्रणम्

आ॒रात्ते॑ अ॒ग्निर॑स्त्वा॒रात्प॑र॒शुर॑स्तु ते। नि॒वा॒ते त्वा॒ऽभि व॑र्षतु स्व॒स्ति
ते॑ऽस्तु वनस्पते स्व॒स्ति मे॑ऽस्तु वनस्पते।

शकृद्गीतेरुपस्थानम्

नमः॑ शक॒त्सदे॑ रु॒द्राय॒ नमो॑ रु॒द्राय॑ शक॒त्सदे॑। गो॒ष्ठम॑सि॒ नम॑स्ते
अस्तु॒ मा मा॑ हिꣳसीः।

---

[55] "ना॑रि त॒ं" इति वा

[56] "श॒कुनै॒र्यदशा॑कु॒नम्" इति वा

सिग्वातस्याभिमन्त्रणम्

सिर्गसि नसि वज्रो नमस्ते अस्तु मा मा हिꣳसीः।

शकुनेरभिमन्त्रनम्

उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शꣳससि।
स्वस्ति नः शकुने अस्तु प्रति नः सुमना भव॥१४॥

भाग्यसूक्तम्

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम। प्रातर्जितं
भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद्यं
मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह। भग प्रणेतर्भग
सत्यराधो भगेमां धियमुदवददन्नः। भग प्रणो जनय गोभिरश्वैर्भग
प्रनृभिर्नृवन्तः स्याम। उतेदानीं भगवन्तः स्यामोत प्रपित्व उत
मध्ये अह्नाम्। उतोदिता मघवन् सूर्यस्य वयं देवानाꣳ सुमतौ
स्याम। भग एव भगवाꣳ अस्तु देवास्तेन वयं भगवन्तः स्याम।
तं त्वा भग सर्व इज्जोहवीमि स नो भग पुर एता भवेह।
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं
वसुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु।
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः। घृतं
दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिः सदा नः॥१५॥

पत्युर्वशीकरणं कर्म

इ॒मां ख॑ना॒म्योष॑धीं वी॒रुधं॒ बल॑वत्तमाम्। यया॑ स॒पत्नीं॒ बाध॑ते॒ यया॑ सं॑वि॒न्दते॒ पति॒॑म्। उ॒त्ता॒नप॑र्णे॒ सुभ॑गे॒ सह॑माने॒ सह॑स्वति। स॒पत्नीं॑ मे॒ परा॑धम॒ पतिं॑ मे॒ केव॑लं कृधि। उत्त॑रा॒ऽहमुत्त॑र॒ उत्त॒रेदुत्त॑राभ्यः[57]। अथा॑ स॒पत्नी॒ या ममाध॑रा॒ साऽध॑राभ्यः। न ह्य॑स्यै॒ नाम॑ गृभ्णामि॒ नो अ॒स्मिन्र॑मते॒ जनै॒॑। परा॑मे॒व प॑रा॒वतं॑ स॒पत्नीं॑ नाशयामसि। अ॒हम॑स्मि॒ सह॑मा॒नाऽथ॒ त्वम॑सि सास॒हिः। उ॒भे सह॑स्वती भू॒त्वा स॒पत्नीं॑ मे सहावहै। उप॑ तेऽधा॒ं सह॑मानाम॒भि त्वा॑ऽधा॒ं सही॑यसा। मामनु॒ प्र ते॒ मनो॑ व॒त्सं गौरि॑व धावतु प॒था वारि॑व धावतु॥१६॥

सपत्नीबाधनं कर्म

उद॒सौ सूर्यो॑ अगा॒दु॒दयं मा॑म॒को भगः॑। अ॒हं तद्वि॑द्व॒ला प॑तिम॒भ्य॑साक्षि विषास॒हिः। अ॒हं के॒तुर॒हं मू॒र्धाऽहमु॒ग्रा वि॒वाच॑नी[58]। [59]ममेदनु॒ क्रतुं॒ पतिः॑ सेहा॒नाया॑ उ॒वाच॑रेत्। मम॑ पु॒त्राः श॑त्रु॒हणोऽथो॑ मे दुहि॒ता वि॒राट्। उ॒ताहम॑स्मि॒ संज॑या॒ पत्यु॑र्मे॒ श्लोक॑ उत्त॒मः। येनेन्द्रो॑ ह॒विषा॑ कृ॒त्य॑भवद् दि॒व्यु॑त्त॒मः। [60]अ॒हं तद॑क्रि देवा असप॒त्ना किला॑भवम्। अ॒स॒प॒त्ना स॑पत्नि॒घ्नी

---

[57] "उत्त॑रे॒दुत्त॑राभ्यः" इति वा

[58] "मू॒र्धाऽहमु॒ग्रो वि॒वाच॑नम्" इति वा

[59] "मम॒ेदनु॒" इति वा

[60] "अ॒हं तद॑क्रिरेवा सप॒त्ना" इति वा

जयं॑न्त्यभि॒भूव॑रीः[61]। आवि॑त्सि॒ सर्वा॑सा॒ꣳ राधो॒ वर्चो॒
अस्थे॑यसामिव। सम॑जैषमि॒मा अ॒हꣳ स॒पत्नी॑रभि॒भूव॑रीः।
यथा॒ऽहम॑स्य वी॒रस्य॑ वि॒राजा॑मि॒ धन॑स्य च॥१७॥

वध्वाः यक्ष्मादिहरं कर्म

अ॒क्षीभ्यां॑ ते॒ नासि॑काभ्यां॒ कर्णा॑भ्यां॒ चुबु॑का॒दधि॑। यक्ष्म॑ꣳ शीर्ष॒ण्य॑ं
म॒स्तिष्का॑ज्जि॒ह्वाया॒ विवृ॑हामि ते। ग्री॒वाभ्य॑स्त उ॒ष्णिहा॑भ्य॒ः
कीक॑साभ्योऽनू॒क्या॑त्। यक्ष्मं॑ दोष॒ण्य॑मꣳसा॑भ्यां बा॒हुभ्या॒ं विवृ॑हामि
ते। आ॒न्त्रेभ्य॑स्ते॒ गुदा॑भ्यो वनि॒ष्ठोर्हृद॑या॒दधि॑। यक्ष्म॒ं मत॑स्नाभ्यां
य॒क्नः प्ला॒शिभ्यो॒ विवृ॑हामि ते। ऊ॒रुभ्यां॑ तेऽष्ठी॒वद्भ्यां॒ जङ्घा॑भ्या॒ं
प्रप॑दाभ्याम्। यक्ष्म॒ꣳ श्रोणी॑भ्यां [62]भा॒सदा॑द् ध्व॒ꣳसस॒ो विवृ॑हामि
ते। मेह॑नाद् वल॒ङ्कर॑णा॒ल्लोम॑भ्यस्ते न॒खेभ्य॑ः। यक्ष्म॒ꣳ
सर्व॑स्मादा॒त्मन॒स्तमि॒मं विवृ॑हामि ते। अङ्गा॑दङ्गा॒ल्लोम्नो॑लोम्नो जा॒तं
पर्व॑णि पर्वणि। यक्ष्म॒ꣳ सर्व॑स्मादा॒त्मन॒स्तमि॒मं विवृ॑हामि ते।
परा॑देहि शाब॒ल्य॑ं ब्र॒ह्मभ्यो॒ विभ॑जा॒ वसु॑। कृ॒त्यैषा प॒द्वती॑ भू॒त्वा
जा॒याऽऽवि॑शते॒ पति॑म्। आ॒श्ली॒ला [63]त॒नूर्भ॑वति॒ रुश॑ती
पा॒पया॑ऽमु॒या। पति॒र्यद्व॒ध्वै॑ वास॑सा॒ [64]स्वमङ्ग॑मभि॒ धित्स॑ति।
क्रू॒रमे॒तत्कटु॑कमे॒तद॑पा॒ष्ठव॑द्वि॒षव॒न्नैतदत्त॑वे। सू॒र्यां यः प्र॒त्यक्ष॑ं

[61] "जयं॑न्त्यभि॒भूव॑री" इति वा

[62] "भा॒सस॑ाद्" इति वा

[63] "त॒नूर्भ॑व" इति वा

[64] "स्व॒मङ्ग॑मभि॒" इति वा

वि॒द्यात्स ए॒तत्प्रति॑गृह्णीयात्। आ॒शस॑नं वि॒शस॑न॒मथो॑ अधि वि॒चर्त॑नम्। सू॒र्यायाः॑ पश्य रू॒पाणि॒ तानि॑ ब्र॒ह्मोत शं॑ʼसति॥१८॥

मन्त्रप्रश्नः २

उपनयने क्षुरकर्म

उ॒ष्णेन॑ वायवु॒दकेनेह्यदि॑ति॒ः केशा॑न् वपतु। आप॑ उन्दन्तु जी॒वसे॑ दीर्घायु॒त्वाय॒ वर्च॑से। ज्योक् च॒ सूर्यं॑ दृ॒शे। येनाव॑पत् सवि॒ता क्षु॒रेण॒ सोम॑स्य॒ राज्ञो॒ वरु॑णस्य वि॒द्वान्। तेन॑ ब्रह्माणो वपते॒दम॒स्यायु॑ष्मा॒ञ्जर॑दष्टि॒र्यथाऽस॑द॒यम॒सौ। येन॑ पू॒षा वृह॒स्पते॑र॒ग्नेरिन्द्र॑स्य॒ चायु॒षेऽव॑पत्। तेना॒स्यायु॑षे वप॒ सौश्लौ॑क्याय स्व॒स्तयेँ॑। येन॒ भूय॒श्चरा॑त्य॒यं ज्योक् च॒ पश्या॑ति॒ सूर्य॑म्। तेना॒स्यायु॑षे वप॒ सौश्लौ॑क्याय स्व॒स्तयेँ॑। येन॑ पू॒षा बृह॒स्पते॑रग्नेरिन्द्र॑स्य॒ चायु॒षेऽव॑पत्। तेन॑ ते वपाम्यसा॒वायु॑षा॒ वर्च॑सा॒ यथा॒ ज्योक् सु॒मना॒ असाँ॑ः। यत्क्षु॒रेण॑ म॒र्चय॑ता सु॒पे॒शसा॒ वप्त्रा॒ वप॑सि॒ केशा॑न्। शु॒न्धि॒ शिरो॒ माऽस्यायु॒ः प्रमो॑षीः। उ॒प्त्वाय॒ केशा॒न् वरु॑णस्य॒ राज्ञो॒ बृह॒स्पति॑ः सवि॒ता सोमो॑ अ॒ग्निः। तेभ्यो॑ नि॒धानं॑ बहु॒धाऽन्व॑विन्दन्नन्त॒रा द्यावा॑पृथि॒वी अ॒पः सुव॑ः॥१॥

उपनयने समिदाधानाश्मास्थापने

आ॒यु॒र्दा दे॑व ज॒रसं॑ गृणा॒नो घृ॒तप्र॑तीको घृ॒तपृ॑ष्ठो अग्ने। घृ॒तं पिब॑न्न॒मृतं॒ चारु॒ गव्यं॑ पि॒तेव॑ पु॒त्रं ज॒रसे॑ नये॒मम्। आति॑ष्ठे॒मम॒श्मा॑न॒मश्मे॑व॒ त्वङ्ँ स्थि॒रो भ॑व। अ॒भिति॑ष्ठ पृतन्य॒तः सह॑स्व पृतनाय॒तः।

उपनयने वासःपरिधानम्

रे॒वती॒स्त्वा॒ व्य॑क्ष्ण॒न्कृत्ति॑का॒श्चाकृ॑न्तꣳस्त्वा। धियो॑ऽवय॒न्नव॒ ग्ना
अ॑वृञ्जन् स॒ह॒स्रमन्ता॑ꣳ अ॒भितो॑ अयच्छन्। दे॒वीर्दे॒वाय॑ परि॒धी
स॑वि॒त्रे म॒हत् तदा॑सामभवन्महि॒त्व॒नम्। या अकृ॑न्त॒न्नव॑य॒न् या
अत॑न्वत॒ याश्च॑ दे॒वीरन्ता॑न॒भितो॑ऽददन्त। तास्त्वा॑ दे॒वीर्ज॒रसे॒
सं॑व्य॑य॒न्त्वायु॑ष्मानि॒दं परि॑धत्स्व॒ वास॑ः। परि॑धत्त धत्त॒ वास॑सैनꣳ
श॒तायु॑षं कृणुत दी॒र्घमायु॑ः। बृह॒स्पति॒ः प्राय॑च्छ॒द्वास॑ ए॒तत्सोमा॑य॒
राज्ञे॒ परि॑धात॒वा उ॑। ज॒रां ग॑च्छासि॒ परि॑धत्स्व॒ वासो॒ भवा॑
कृष्टी॒नाम॑भिशस्ति॒पावाँ॑। श॒तं च॑ जीव श॒रद॑ः सु॒वर्चा॑ रा॒यश्च॒
पोष॒मुप॒ संव्य॑यस्व। परी॒दं वासो॒ अधि॑धाः
स्व॒स्तयेऽभू॑रापी॒नाम॑भिशस्ति॒पावाँ॑। श॒तं च॑ जीव श॒रद॑ः
पु॒रूचीर्वसू॑नि चा॒र्यो वि॑भजासि॒ जीव॑न्।

उपनयने मौञ्ज्यजिनमन्त्राः

इ॒यं दु॑रु॒क्तात्परि॒बाध॑माना॒ शर्म॒ वरू॑थं पु॒नती न॒ आगाँ॑त्।
प्रा॒णा॒पा॒नाभ्यां॒ बल॑मा॒भर॑न्ती प्रि॒या दे॒वाना॑ꣳ सु॒भगा॒ मेख॑ले॒यम्।
ऋ॒तस्य॑ गो॒प्त्री तप॑सः पर॒स्पी घ्न॒ती रक्ष॒ः सह॑माना॒ अरा॑तीः। सा
न॑ः सम॒न्तमनु॑ परी॑हि भ॒द्रया॑ भ॒र्तार॑स्ते॒ मेख॑ले॒ मा रि॑षाम।
मि॒त्रस्य॒ चक्षु॒र्धरु॑णं॒ बली॑य॒स्तेजो॑ यश॒स्वि स्थ॒विर॑ꣳ समि॑द्धम्।
अ॒ना॒ह॒न॒स्यं वस॑नं जरि॒ष्णु परी॒दं वा॒ज्यजि॑नं दधे॒ऽहम्॥२॥

उपनयनम्

आ॒ग॒न्त्रा सम॑गन्महि॒ प्रसु॑ मृ॒त्युं यु॑योतन। अरि॑ष्टाः॒ संच॑रेमहि स्व॒स्ति च॑रतादि॒ह स्व॒स्त्या गृ॒हेभ्य॑ः। स॒मु॒द्रादू॒र्मिर्मधु॑मा॒ꣳ उदा॑रदुपा॒ꣳशुना॒ सम॑मृत॒त्वम॑श्याम्। इ॒मे नु ते र॒श्मय॒ः सूर्य॑स्य॒ येभि॑ः सपि॒त्वं पि॒तरो॑ न॒ आय॑न्।

अ॒ग्निष्टे॒ हस्त॑मग्रभी॒त्सोम॑स्ते॒ हस्त॑मग्रभीत्सवि॒ता ते॒ हस्त॑मग्रभी॒त्सर॑स्वती ते॒ हस्त॑मग्रभीत्पू॒षा ते॒ हस्त॑मग्रभीदर्य॒मा ते॒ हस्त॑मग्रभी॒दꣳशु॑स्ते॒ हस्त॑मग्रभी॒द्भग॑स्ते॒ हस्त॑मग्रभीन्मि॒त्रस्ते॒ हस्त॑मग्रभीन्मि॒त्रस्त्वम॑सि॒ धर्म॑णा॒ऽग्निरा॑चा॒र्यस्तव॑।

अ॒ग्नये॑ त्वा॒ परि॑ ददाम्यसा॒ै सोमा॑य त्वा॒ परि॑ ददाम्यसौ सवि॒त्रे त्वा॒ परि॑ ददाम्यसा॒ै सर॑स्वत्यै त्वा॒ परि॑ ददाम्यसौ मृ॒त्यवे॑ त्वा॒ परि॑ ददाम्यसौ य॒माय॑ त्वा॒ परि॑ ददाम्यसौ ग॒दाय॑ त्वा॒ परि॑ ददाम्यसा॒वन्त॑काय त्वा॒ परि॑ ददाम्यसाव॒द्भ्यस्त्वा॒ परि॑ ददाम्यसा॒वोष॑धीभ्यस्त्वा॒ परि॑ ददाम्यसौ पृथि॒व्यै त्वा॒ सवै॒श्वान॒राये॒ परि॑ ददाम्यसौ।

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व उप॑नये॒ऽसौ। सु॒प्र॒जाः प्र॒जया॑ भूयाः सु॒वीरो॑ वी॒रैः सु॒वर्चा॒ वर्च॑सा सु॒पोष॒ः पोषै॑ः।

ब्र॒ह्म॒चर्य॒मागा॒मुप॒ मा न॑यस्व दे॒वेन॑ सवि॒त्रा प्रसू॑तः। कोनामा॑स्य॒सौ नामा॑ऽस्मि॒ कस्य॑ ब्रह्मचा॒र्य॑स्यसौ प्रा॒णस्य॑ ब्रह्मचा॒र्य॑स्म्य॒सावे॒ष ते॑ देव सूर्य ब्रह्मचा॒री तं गो॑पाय स॒ मा मृ॑तै॒ष ते॑ सूर्य पु॒त्रः सुदी॑र्घा॒युः स॒ मा मृ॑त। याꣳ स्व॒स्तिम॒ग्निर्वा॒यः सूर्य॑श्च॒न्द्रमा॒

आपोऽनु सं चरन्ति ताङ् स्वस्तिमनु सं चरासावध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीय॥३॥

उपनयने होममन्त्राः

(योगेयोगे तवस्तरमिमममग्न आयुषे वर्चसे कृधीति द्वे।)
{योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतयेँ॥
इममग्न आयुषे वर्चसे कृधि प्रियः रेतो वरुण सोम राजन्।
मातेवाँस्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथाऽसत्॥}
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाँम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोंः। आग्निष्ट आयुः प्रतरां दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु। इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैस्ते वसुभिरा दधातु। मेधां मह्यमङ्गिरसो मेधाः सप्तर्षयो ददुः। मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे। अप्सरासु च या मेधा गन्धर्वेषु च यद्यशः। दैवी या मानुषी मेधा सा मामाविशतादिह। (इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि।)

उपनयने सावित्री

राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषम्। (तत्सवितुर्वरेँण्यमित्येषा।)
अवृधमसौ सौँम्य प्राण स्वं मे गोपाय। ब्रह्मण आणी स्थः॥४॥

उपनयने दण्डदानादयः

सु॒श्रव॑ः सु॒श्रव॑सं मा कुरु॒ यथा॒ त्वꣳ सु॒श्रव॑ः सु॒श्रवा॑ अस्ये॒वम॒हꣳ सु॒श्रव॑ः सु॒श्रवा॑ भूया॒सं यथा॒ त्वꣳ सु॒श्रवो॑ दे॒वाना᳚ं निधिगो॒पो᳚ऽस्ये॒वम॒हं ब्रा᳚ह्म॒णाना॒ं ब्रह्म॑णो निधिगो॒पो भू॑यासम्।

स्मृ॒तं च॒ मेऽस्मृ॑तं च मे॒ तन्म॑ उ॒भय॑ं व्र॒तं नि॒न्दा च॒ मेऽनि॑न्दा च मे॒ तन्म॑ उ॒भय॑ं व्र॒तꣳ श्र॒द्धा च॒ मेऽश्र॑द्धा च मे॒ तन्म॑ उ॒भय॑ं व्र॒तं वि॒द्या च॒ मेऽवि॑द्या च मे॒ तन्म॑ उ॒भय॑ं व्र॒तꣳ श्रु॒तं च॒ मेऽश्रु॑तं च मे॒ तन्म॑ उ॒भय॑ं व्र॒तꣳ स॒त्यं च॒ मेऽनृ॑तं च मे॒ तन्म॑ उ॒भय॑ं व्र॒तं तप॑श्च॒ मेऽत॑पश्च मे॒ तन्म॑ उ॒भय॑ं व्र॒तं व्र॒तं च॒ मेऽव्र॑तं च मे॒ तन्म॑ उ॒भय॑ं व्र॒तं यद्ब्रा᳚ह्म॒णाना॒ं ब्रह्म॑णि व्र॒तं यद॒ग्नेः सेन्द्र॑स्य॒ सप्र॑जापतिकस्य॒ सदे॑वस्य॒ सदे॑वराजस्य॒ सम॑नुष्यस्य॒ सम॑नुष्यराजस्य॒ सपि॑तृकस्य॒ सपि॑तृराजस्य॒ सग॑न्धर्वाप्सर॒स्कस्य॒ यन्म॑ आ॒त्मन॑ आ॒त्मनि॑ व्र॒तं तेना॒हꣳ सर्व॑व्रतो भूयासम्।

उदायु॑षा स्वा॒युषोदोष॑धीना॒ꣳ रसे॒नोत्प॒र्जन्य॑स्य॒ शुष्मे॒नोद॑स्थाम॒मृता॒ꣳ अनु॑।

तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता᳚च्छु॒क्रमु॒च्चर॑त्। पश्ये॑म श॒रद॑ः श॒तं जावे॑म श॒रद॑ः श॒तं नन्दा॑म श॒रद॑ः श॒तं मोदा॑म श॒रद॑ः श॒तं भवा॑म श॒रद॑ः श॒तꣳ शृ॒णवा॑म श॒रद॑ः श॒तं प्रब्र॑वाम श॒रद॑ः श॒तमजी॑ताः स्याम श॒रद॑ः श॒तं ज्योक् च॒ सुर्य॑ं दृ॒शे।

यस्मिंन्भूतं च भव्यं च सर्वे लोकाः समाहिंताः। तेनं गृह्णामि त्वामहं मह्यं गृह्णामि त्वामहं प्रजापंतिना त्वा मह्यं गृह्णाम्यसौ॥५॥

उपनयने समिदाधानम्

परिं त्वाऽग्ने परिं मृजाम्यायुंषा च धनेंन च। सुप्रजाः प्रजयां भूयास॒ꣳ सुवीरों विरैः सुवर्चा वर्चसा सुपोषः पोषैंः सुगृहो गृहैः सुपतिः पत्यां सुमेधा मेधयां सुब्रह्मा ब्रह्मचारिभिः। अग्नयें समिधमाहांर्षं बृहते जातवेंदसे। यथा त्वमंग्ने समिधां समिध्यसं एवं मामायुंषा वर्चसा सन्या मेधयां प्रजयां पशुभिंर्ब्रह्मवर्चसेनान्नाद्येंन समेंधय स्वाहां। एधोंऽस्येधिषीमहि स्वाहां। समिदंसि समेधिषीमहि स्वाहां। तेजोंऽसि तेजो मयिं धेहि स्वाहां। अपो अद्यान्वंचारिष॒ꣳ रसेंन समंसृक्ष्महि। पयंस्वा॒ꣳ अग्न आगंमं तं मा स॒ꣳसृंज वर्चसा स्वाहां। सं माऽग्ने वर्चसा सृज प्रजयां च धनेंन च स्वाहां। विद्युन्में अस्य देवा इन्द्रों विद्यात्सहर्षिंभिः स्वाहां। अग्नयें बृहते नाकांय स्वाहां। द्यावांपृथिवीभ्या॒ꣳ स्वाहां। एषा तें अग्ने समित्तया वर्धस्व चाप्यांयस्व च तयाऽहं वर्धमानो भूयासमाप्यायंमानश्च स्वाहां। यो माऽग्ने भागिन॒ꣳ सन्तमथांभागं चिकींर्षति। अभागमंग्ने तं कुंरु मामंग्ने भागिनं कुरु स्वाहां। समिधंमाधायांग्ने सर्वव्रतो भूयास॒ꣳ स्वाहां।

उपनयने संशासनादि

ब्र॒ह्म॒चा॒र्य॑स्यपो॑ऽशान॒ कर्म॑ कुरु॒ मा सु॒षु॑प्थाः। भि॒क्षा॒च॒र्यं॑ चराचार्याधी॒नो भ॑व। यस्य॑ ते प्रथमवा॒स्य॑ꣳ हरा॑म॒स्तं त्वा॒ विश्वे॑ अवन्तु दे॒वाः। तं त्वा॒ भ्रात॑रः सु॒वृधो॒ वर्ध॑मान॒मनु॑ जायन्तां ब॒ह॒वः॒ सुजा॑तम्॥६॥

समावर्तनमन्त्राः

इ॒मꣳ स्तोम॒मर्ह॑ते जा॒तवे॑दसे॒ रथ॑मिव॒ सं म॑हेमा मनी॒षया॑। भ॒द्रा हि न॒ः प्रम॑तिरस्य स॒ꣳसद्यग्ने॑ स॒ख्ये॑ मा रि॑षामा व॒यं तव॑। त्र्या॒यु॒षं ज॒मद॑ग्नेः क॒श्यप॑स्य त्र्यायु॒षम्। यद्दे॒वानां॑ त्र्यायु॒षं तन्मे॑ अस्तु त्र्यायु॒षम्। शि॒वो नामा॑सि॒ स्वधि॑तिस्ते पि॒ता नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः। (उ॒ष्णेन॑ वायवु॒दकेनेत्ये॒षः।) इ॒दम॒हम॒मुष्या॑मुष्याय॒णस्य॑ पा॒प्मान॒मुप॑गूहा॒म्युत्त॑रो॒ऽसौ द्वि॒षद्भ्यः॑। (आपो॒ हिष्ठा म॑यो॒भुव॒ इति॑ ति॒स्रो हिर॑ण्यवर्णा॒ः सुच॑यः पाव॒का इति॑ ति॒स्रः।) अ॒न्नाद्या॑य॒ व्यू॑हध्वं दीर्घा॒यु॒र॒हम॑न्ना॒दो भू॑यासम्। सोमो॒ राजा॒ यमाग॑म॒त्स मे॒ मुख॒ं प्रवे॑क्ष्यति॒ भगे॑न स॒ह वर्च॑सा। सोम॑स्य त॒नूर॑सि त॒नुवं॑ मे पाहि॒ स्वा मा॑ त॒नूरावि॑श। नमो॑ ग्र॒हाय॑ चाभिग्र॒हाय॑ च॒ नम॑ः शाकजञ्ज॒भाभ्यां॒ नम॒स्ताभ्यो॑ दे॒वता॑भ्यो॒ या अ॑भिग्रा॒हिणी॑ः। अ॒प्स॒रस्सु॒ यो ग॒न्धो ग॑न्धर्वेषु॑ च॒ यद्यश॑ः। दैवो॒ यो मा॑नु॒षो ग॒न्धः स मा॑ ग॒न्धः सु॑र॒भिर्जु॑षताम्। इ॒यमोष॑धे॒ त्राय॑माणा॒ सह॑माना॒ सह॑स्वती। सा मा॒ हिर॑ण्यवर्चसं ब्रह्मवर्च॒सिनं॑ मा करोतु। अपा॑शो॒ऽस्युरो॑ मे॒ मा सꣳ शा॑रीः शि॒वो मोप॑ तिष्ठस्व

दीर्घायु॒त्वाय॑ श॒तशा॑रदाय। श॒तꣳ श॒रद्भ्य॒ आयु॑षे॒ वर्च॑से जी॒वात्वै
पुण्या॑य। (रे॒वतीँ॑स्त्वा॒ व्य॑क्ष्ण॒न्नित्ये॒ताः)॥७॥

आ॒यु॒ष्यं॑ वर्च॒स्यꣳ॑ सु॒वीर्यꣳ॑ रा॒यस्पोष॒मौद्भि॑द्यम्। इ॒दꣳ हिर॑ण्यं॒
जैत्र्या॒यावि॑शतां॒ माम्। उ॒च्चै॒र्वा॒दि पृ॑तना॒जि स॑त्रासा॒हं ध॑नञ्ज॒यम्।
सर्वा॒ः सम॑ृद्धी॒र्ऋद्ध॑यो॒ हिर॑ण्ये॒ऽस्मिन् स॒माहि॑ताः। शु॒नम॒हꣳ
हिर॑ण्यस्य पि॒तुरि॑व॒ नामाँ॑ग्रभैषम्। तं मा॒ हिर॑ण्यवर्चसं पू॒रुषं॑ प्रि॒यं
कु॑रु। प्रि॒यं मा॑ दे॒वेषु॑ कुरु प्रि॒यं मा॒ ब्रह्म॑णे कुरु। प्रि॒यं वि॒श्ये॑षु
शू॒द्रेषु॑ प्रि॒यꣳ राज॑सु मा कुरु। या ति॒रश्ची॑ नि॒पद्य॑से॒ऽहं वि॒धर॑णी॒
इति॑। तां त्वा॑ घृ॒तस्य॒ धार॑या॒ यजे॑ स॒ꣳराध॑नीम॒हम्। स॒ꣳराध॑न्यै
दे॒व्यै स्वाहा॑ प्र॒साध॑न्यै दे॒व्यै स्वाहा॑। स॒म्राजं॑ च वि॒राजं॑
चाभि॒श्रीर्या च॑ नो गृ॒हे। ल॒क्ष्मी रा॒ष्ट्रस्य॒ या मुखे॒ तया॑ मा॒ सꣳ
सृ॑जामसि। शु॒भिं॑के॒ शिर॒ आ रो॑ह शो॒भय॑न्ती॒ मुखं॒ मम॑। मुखꣳ॑
हि॒ मम॑ शोभय॒ भूया॑ꣳसं च॒ भगं॑ कुरु। यामा॒हर॑ज्ज॒मद॑ग्निः श्र॒द्धायै॑
कामा॒यान्यै॑। इ॒मां ताम॑पि॒ नह्ये॒ऽहं भगे॑न स॒ह वर्च॑सा। यदाञ्ज॑नं
त्रैक॑कु॒दं जा॒तꣳ हि॒मव॑त उ॒परि॑। तेन॑ वामाञ्जे॒ तेज॑से॒ वर्च॑से॒ भगा॑य
च॥८॥

मयि॑ पर्वतपू॒रुषं मयि॑ पर्वतवर्च॒सं मयि॑ पर्वतभेष॒जं मयि॑
पर्वतायु॒षम्। यन्मे॒ वर्च॑ः परा॒ग॑तमा॒त्मान॑मुप॒तिष्ठ॑ति। इ॒दं
तत्पुन॒राद॑दे दीर्घायु॒त्वाय॒ वर्च॑से। प्र॒ति॒ष्ठे स्थो॑ दे॒वता॑नां॒ मा मा॒
संता॑प्तम्। प्र॒जाप॑ते॒ः शर॑णमसि॒ ब्रह्म॑णश्छ॒दिर्वि॒श्वज॒नस्य॑ छा॒याऽसि॑
स॒र्वतो॑ मा पाहि। दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वेँ॑ऽश्विनो॑र्बा॒हुभ्यां᳚ पू॒ष्णो
हस्ता॑भ्या॒माद॑दे द्वि॒षतो॒ व॒धायेन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्न॒ः शर्म॑ मे भव॒

यत्पापं तन्निवारय। (देवीः षडुर्वीरित्येषा।) {देवीः षडुर्वीरुरुणः कृणोत विश्वेदेवास इह वीरयध्वम्। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्॥}

मधुपर्कमन्त्राः

राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योष२ राष्ट्रभृदसि सम्राडासन्दी मा त्वद्योष२ राष्ट्रभृदस्यधिपत्न्यासन्दी मा त्वद्योषम्। आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे। अस्मिन् कुले ब्रह्मवर्चस्यसानि। मयि महो मयि यशो मयीन्द्रियं वीर्यम्। आ मा गन् यशसा वर्चसा स२सृज पयसा तेजसा च। तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम्। विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विराज। समुद्रं वः प्र हिणोमि स्वां योनिमपिगच्छत। अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः॥१॥

त्रय्यै विद्यायै यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि। तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम्। (आ मा गन्नित्येषा।) अमृतोपस्तरणमस्य मृतापिधानमसि। यन्मधुनो मधव्यं परममन्नाद्यं वीर्यम्। तेनाहं मधुनो मधव्येन परमेणान्नाद्येन वीर्येण परमोऽन्नादो मधव्योऽसानि। गौरस्यपहतपाप्माऽप पाप्मानं जहि मम चामुष्य च। अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः। अरिष्टमस्माकं कृण्वन् ब्राह्मणो ब्राह्मणेभ्यः। यज्ञो वर्धतां यज्ञस्य वृद्धिमनु वर्धाऽपचितिरस्यपचितं मा कुर्वपचितोऽहं मनुष्येषु भूयासम्। गौर्धेनुभव्या माता रुद्राणां दुहिता वसूना२ स्वसाऽऽदित्यानाममृतस्य नाभिः । प्रणु वोचं चिकितुषे जनाय

मा गामनांगामदिंतिं वधिष्ट। पिबंतूदकं तृणाँन्यत्तु। ओमुत्सृजत। भूतम्। सा विराट् तन्मा क्षांयि तस्य तेऽशींय तन्म ऊर्जं धाः। ओं कल्पयत॥१०॥

सीमन्तोन्नयनम्

[65] {धाता दंदातु नो रयिमीशांनो जगंतस्पतिंः। स नंः पूर्णेनं वावनत्॥११.१॥ {धात्र इदम्।} धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवंनं जजान। धाता पुत्रं यजंमानाय दाता तस्मां उ हव्यं घृतवंद्विधेम॥२॥ {धात्र इदम्।} धाता दंदातु नो रयिं प्राचीं जीवातुमक्षिंताम्। वयं देवस्यं धीमहि सुमतिं॰ सत्यरांधसः॥३॥ {धात्र इदम्।} धाता दंदातु दाशुषे वसूंनि प्रजाकांमाय मीढुषें दुरोणे। तस्मैं देवा अमृताः संव्यंयन्तां विश्वें देवासो अदिंतिः सजोषाँः॥४॥ {धात्र इदम्।}

यस्त्वां हृदा कीरिणा मन्यंमानोऽमंर्त्यं मर्त्यो जोहंवीमि। जातंवेदो यशों अस्मासुं धेहि प्रजाभिंरग्ने अमृतत्वमंश्याम्॥५॥ {अग्नये पुत्रवत इदम्} यस्मै त्वं॰ सुकृतें जातवेद उ लोकमंग्ने कृणवंः स्योनम्। अश्विनं॰ स पुत्रिणं वीरवंन्तं गोमंन्तं॰ रयिं नंशते स्वस्ति॥६॥ {अग्नये पुत्रवत इदम्} त्वे सु पुंत्र शवसोऽवृंत्रन् कामंकातयः। न त्वामिन्द्रातिंरिच्यते॥७॥ {इन्द्राय पुत्रिण इदम्} उक्थउंक्थे सोम इन्द्रं ममाद नीथेनींथे मघवांनं॰

[65] धाता दंदातु नो रयिमिति चतंस्रो यस्त्वां हृदा कीरिणेति चतंस्रः।

सु॒तासः॑। यदी॓ꣳ स॒बाधः॑ पि॒तरं॒ न पु॒त्राः स॑मा॒नद॑क्षा॒ अव॑से॒ हव॑न्ते॥८॥ {इन्द्राय पुत्रिण इदम्}

[66] भूर्भुव॒ः सुव॑ः॥९॥ {रा॒कामह॒ꣳ सु॒हवा॓ꣳ सुष्टु॒ती हु॑वे शृ॒णोतु॑ नः सु॒भगा॒ बोध॑तु॒ त्मना᳚। सीव्य॒त्वप॑ः सू॒च्याऽच्छि॑द्यमानया॒ ददा॑तु वी॒रꣳ श॒तदा॑यमु॒क्थ्य᳚म्॥१०॥ यास्ते॑ राके सु॒मतय॑ः सु॒पेश॑सो॒ याभि॒र्ददा॑सि दा॒शुषे॒ वसू॑नि। ताभि॑र्नो अ॒द्य सु॒मना॑ उ॒पाग॑हि सहस्रपो॒षꣳ सु॑भगे॒ ररा॑णा॥११॥}

यौग॑न्धरिरे॒व नो॒ राजेति॒ साल्वी॑रवादिषुः। विवृ॑त्तचक्रा॒ आसेनस्तारे॑ण यमु॒ने तव॑॥१२॥ सोम॑ ए॒व नो॒ राजेत्या॑हुर्ब्राह्म॒णीः प्र॒जाः। विवृ॑त्तचक्रा॒ आसी॑ना॒स्तीरे॑णासौ॒ तव॑॥११.१३॥

पुंसुवनम्

पु॒ꣳसु॒वन॑मसि॥११.१४॥

क्षिप्रसुवनम्

आ॒भिष्ट्वा॒ऽहं द॒शभि॑र॒भिमृ॑शामि॒ दश॒मास्या॑य॒ सूत॑वे॥११.१५॥ यथै॒व सोम॒ः पव॑ते॒ यथा॑ समु॒द्र एज॑ति। ए॒वं ते गर्भ॒ एज॑तु स॒ह ज॒राยु॑णा नि॒ष्क्रम्य॒ प्रति॑तिष्ठ॒त्वायु॑षि ब्रह्मवर्च॒सि यश॑सि वी॒र्ये᳚ऽन्नाद्ये᳚॥१६॥ दश॒मासा॒॑ञ्च श॑यानो धा॒त्रा हि तथा॑ कृतम्। ऐतु॒ गर्भो॒ अक्ष॑तो जी॒वो जीव॑न्त्याः॥१७॥ आ॒यम॑नीर्यमयत॒ गर्भ॒मापो॑ देवी॒ः सर॑स्वतीः। ऐतु॒ गर्भो॒ अक्ष॑तो जी॒वो जीव॑न्त्याः॥११.१८॥

---

[66] भूर्भुव॒ः सुवो॑ रा॒कामह॒ं यास्ते॑ राके।

जरायुणाऽवाक्पतने अवोक्षणम्

तिलदेऽवं पद्यस्व न मांसमसि नोदलम्। स्थविंत्र्यवंपद्यस्व न मांसेषु न स्नावंसु न बद्धमसि मज्जसु॥११.१९॥ निरैतु पृश्नि शेवलं शुने जराय्वत्तवे॥११.२०॥

जातकर्म

[67]{दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥११.२१॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा। विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ॥२२॥ समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन्। तृतीये त्वा रजसि तस्थिवांसमृतस्य योनौ महिषा अहिन्वन्॥२३॥ अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥२४॥ उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो निधायि। इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत्॥२५॥ विश्वस्य केतुर्भुवनस्य गर्भ आरोदसी अपृणाज्जायमानः। वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च॥२६॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः। वसोः सूनुः सहसो अप्सु राजा वि भात्यग्रं उषसामिधानः॥२७॥ यस्ते अद्य कृणवद्भद्र शोचेऽपूपं देव घृतवन्तमग्ने। प्र तं नय प्रतरां वस्यो

[67] दिवस्परीत्येषोऽनुवाकः।

अच्छा॒भि द्यु॒म्नं दे॒वभ॑क्तं यविष्ठ॥२८॥ आ तं भ॑ज सौश्रव॒सेष्व॑ग्न उ॒क्थउ॑क्थ॒ आ भ॑ज श॒स्यमा॑ने। प्रि॒यः सूर्ये॑ प्रि॒यो अ॒ग्ना भ॑वा॒त्युज्जा॒तेन॑ भि॒नद॒दुज्जनि॑त्वैः॥२९॥ त्वाम॑ग्ने यज॑माना॒ अनु॒ द्यून् विश्वा॒ वसू॑नि दधिरे॒ वार्या॑णि। त्वया॑ स॒ह द्रवि॑णमि॒च्छमा॑ना व्र॒जं गोम॑न्तमु॒शिजो॒ विव॑व्रुः॥३०॥ दृ॒शा॒नो रु॒क्म उ॒र्व्या व्य॑द्यौद्दु॒र्मर्ष॒मायुः॑ श्रि॒ये रु॑चा॒नः। अ॒ग्निर॒मृतो॑ अभव॒द्वयो॑भि॒र्यदे॑नं॒ द्यौरज॑नयत् सु॒रेताः॑॥३१॥}

अ॒स्मिन्न॒हꣳ स॒हस्रं॑ पुष्या॒म्येध॑मान॒ः स्वे वशेः॑॥३२॥ अङ्गा॑दङ्गा॒त्सं भ॑वसि॒ हृद॑या॒दधि॑ जायसे। आ॒त्मा वै पु॑त्र॒नामा॑ऽसि॒ स जी॑व श॒रद॑ः श॒तम्॥११.३३॥

अश्मा॑ भव पर॒शुर्भ॑व॒ हिर॑ण्य॒मस्तृ॑तं भव। प॒शू॒नां त्वा॑ हिंका॒रेणा॒भिजि॑घ्राम्यसौ॥१२.१॥

मे॒धां ते॑ दे॒वः स॑वि॒ता मे॒धां दे॒वी सर॑स्वती। मे॒धां ते॑ अ॒श्विनौ॑ दे॒वावाध॑त्तां॒ पुष्क॑रस्रजा॥२॥ त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्वय्य॒ग्निस्तेजो॑ दधातु॒ त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्वयीन्द्र॑ इन्द्रि॒यं द॑धातु॒ त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्वयि॒ सुर्यो॒ भ्राजो॑ दधातु॥५॥

क्षे॒त्रि॒यै त्वा॒ निर्ऋ॑त्यै त्वा द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त्। अ॒ना॒ग॒सं॒ ब्रह्म॑णे त्वा करोमि शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे॥६॥ शं ते॑ अ॒ग्निः स॒हाद्भिर॑स्तु॒ शं द्यावा॑पृथि॒वी स॒हौष॑धीभिः। शम॒न्तरि॑क्षꣳ स॒ह वाते॑न ते॒ शं ते॒ चत॑स्रः प्र॒दिशो॑ भवन्तु॥७॥ या दैवी॒श्चत॑स्रः प्र॒दिशो॒ वात॑पत्नीर॒भि सुर्यो॑ विच॒ष्टे। तासा॑ं त्वाऽज॒रस॒

आ दंधामि प्र यक्ष्मं एतु निर्ऋतिं पराचैः॥८॥ अमोंचि यक्ष्मंद् दुरितादवंर्त्यै द्रुहः पाशान्निर्ऋत्यै चोदंमोचि। अहा अवंर्तिमविंदत्स्योनमप्यंभूद्भद्रे सुंकृतस्यं लोके॥९॥ सूर्यमृतं तमंसो ग्राह्या यद्देवा अमुंश्चन्नसृंजन् न्व्येंनसः। एवमहमिमं क्षैत्रियाञ्जांमिशꣳसाद् द्रुहो मुंश्चामि वरुंणस्य पाशात्॥१०॥ भूः स्वाहा भुवः स्वाहा सुवः स्वाहोꣳ स्वाहा॥१२.११॥

मा तें कुमारꣳ रक्षों वधीन्मा धेनुरंत्यासारिणीं। प्रिया धनंस्य भूया एधंमाना स्वे गृहे॥१३.१॥ अयं कुंमारो जरां धंयतु दीर्घमायुंः। यस्मै त्वꣳ स्तन प्रप्यायायुर्वर्चो यशो बलंम्॥२॥ यद्भूमेर्हृदंयं दिवि चन्द्रमंसि श्रितम्। तदुंर्वि पश्यं माऽहं पौत्रमघंꣳ रुदम्॥३॥ यत्तें सुसीमे हृदंयं वेदाहं तत्प्रजापंतौ। वेदांम तस्यं ते वयं माऽहं पौत्रमघंꣳ रुदम्॥४॥ नामंयति न रुंदति यत्रं वयं वंदामसि यत्रं चाभिमृंशामसि॥५॥ आपंः सुतेषुं जाग्रत रक्षांꣳसि निरितो नुंदध्वम्॥६॥

अयं कलिं पतयंन्तꣳ श्वानमिवोद्वृद्धम्। अजां वाशिंतामिव मरुतः पर्याध्वꣳ स्वाहा॥७॥ {मरुद्भ्य इदम्।} शण्डेरथः शण्डिंकेर उलूखलः। च्यवंनो नश्यंतादितः स्वाहा॥८॥ {अग्नय इदम्।} अयः शण्डो मर्क उपवीरं उलूखलः। च्यवंनो नश्यंतादितः स्वाहा॥९॥ {अग्नय इदम्।} केशिनीश्श्वलोमिनीः खजांपोऽजोपंकाशिनीः। अपेंत नश्यंतादितः स्वाहा॥१०॥ {अग्नय इदम्।} मिश्रवांससः कौबेरका रंक्षोराजेन प्रेषिंताः। ग्रामꣳ सजांनयो गच्छन्तीच्छन्तोंऽपरिदाकृतान् स्वाहा॥११॥

{अग्नय इदम्।} एतान् घ्नतैतान् गृह्णीतेत्ययं ब्रह्मणस्पुत्रः। तानग्निः पर्यसरत्तानिन्द्रस्तान्बृहस्पतिः। तानहं वेद ब्राह्मणः प्रमृशतः कूटदन्तान् विकेशान् लम्बनस्तनान् स्वाहा॥१३.१२॥ {अग्नीन्द्राबृहस्पतिभ्य इदम्।}

नक्तंचारिण उरस्पेशाञ्छूलहस्तान्कपालपान्। पूर्व एषां पितेत्युच्चैः श्राव्यकर्णकः। माता जघन्या सर्पति ग्रामे विधुरमिच्छन्ती स्वाहा॥१४.१॥ {अग्नय इदम्।} निशीथचारिणी स्वसा सन्धिना प्रेक्षते कुलम्। या स्वपन्तं बोधयति यस्यै विजातायां मनः। तासां त्वं कृष्णवर्त्मने क्लोमानꣳ हृदयं यकृत्। अग्ने अक्षीणि निर्दह स्वाहा॥१४.२॥ {अग्नय इदम्।}

जातकर्मणि प्रसवादेत्य कार्यम्

अङ्गादङ्गात्संभवसि हृदयादधि जायसे। वेदो वै पुत्रनामाऽसि स जीव शरदः शतम्॥१४.३॥ [68]{अश्मा भव परशुर्भव हिरण्यमस्तृतं भव। पशूनां त्वा हिंकारेणाभिजिघ्राम्यसौ॥४॥}

[69]{अग्निरायुष्मान् स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि॥५॥ सोम आयुष्मान् स ओषधीभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि॥६॥ यज्ञ आयुष्मान् स दक्षिणाभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि॥७॥ ब्रह्माऽऽयुष्मत्तद् ब्राह्मणैरायुष्मत् तेन

---

68 अश्मा भवेत्येषा।

69 अग्निरायुष्मानिति पञ्च।

त्वाऽऽयुषाऽऽयुंष्मन्तं करोमि॥८॥ दे॒वा आयुंष्मन्त॒स्तेऽमृते॒नाऽऽयुंष्मन्त॒स्तेन॒ त्वाऽऽयु॒षाऽऽयुंष्मन्तं करोमि॥९॥}

सर्वस्मादा॒त्मन॒ः संभूंताऽसि॒ सा जीव श॒रदः श॒तम्॥१४.१०॥

अन्नप्राशनम्

भू॒रपां त्वौषंधीना॒ꣳ रस॒ं प्राशंयामि शि॒वास्त॒ आप॒ ओषंधयः सन्त्वनमी॒वास्त॒ आप॒ ओषंधयः सन्त्वसौ॥१४.११॥ भुवो॒ऽपाꣳ सुवं॒रपां भूर्भुव॒ः सुवं॒रपां त्वौषंधीना॒ꣳ रस॒ं प्राशंयामि शि॒वास्त॒ आप॒ ओषंधयः सन्त्वनमी॒वास्त॒ आप॒ ओषंधयः सन्त्वसौ॥१४.१४॥

चौलम्

(उ॒ष्णेनं वायवुद॒केनेत्ये॒षः)॥१४.१५॥

गृहनिर्माणप्रवेशौ

यद्भूमैः क्रू॒रं तदि॒तो हंरामि॒ परांचीं॒ निर्ऋंतिं॒ निर्वाहयामि। इ॒दꣳ श्रेयोंऽव॒सान॒मागंन्म देवा॒ गोम॒दश्वांवदि॒दमंस्तु॒ प्र भूमं। स्यो॒ना पृंथिवि॒ भवांनृक्ष॒रा नि॒वेशंनी। यच्छां न॒ः शर्म स॒प्रथाः। इ॒हैव तिंष्ठ॒ निमिंता॒ तिल्वंला स्या॒दिरांवती। मध्ये॒ ताल्प्यंस्य॒ तिष्ठा॒न्मा त्वा॒ प्रापंन्नघा॒यवंः। आ त्वां कुमा॒रस्त॒रुण॒ आ व॒त्सो जगंता स॒ह। आ त्वां परि॒स्रुतंः कुम्भा आ द॒ध्नः कलंशीरयन्। ऋ॒तेन॒ स्थूणा॒वधिंरोह व॒ꣳशोग्रो विरा॒ज॒न्नपंसेध॒ शत्रून्। ब्रह्मं च ते क्ष॒त्रं च॒ पूर्वे॒ स्थूणें अ॒भि रंक्षतु। य॒ज्ञश्च॒ दक्षिंणाश्च॒ दक्षिंणे। इ॒षश्चो॒र्जश्चापंरे

मि॒त्रश्च॒ वरु॑ण॒श्चोत्त॑रे ध॒र्मस्ते॒ स्थूणा॑राज॒ः श्रीस्ते॒ स्तूप॑ः। उ॒द्धि्रयमा॑ण॒ उद्ध॑र पा॒प्मनो॑ मा॒ यदवि॑द्वान् यच्च॑ वि॒द्वाꣳश्च॒कार॑। अह्ना॒ यदेन॑ः कृ॒तम॑स्ति पा॒पꣳ रात्र्या॒ यदेन॑ः कृ॒तम॑स्ति पा॒पꣳसर्व॑स्मा॒न्मोद्धृ॒तो मु॑ञ्च॒ तस्मा॑ँत्। इन्द्र॑स्य गृ॒हा वसु॑मन्तो वरू॒थिन॒स्तान॒हꣳ सु॒मन॑स॒ः प्रप॑द्ये। अ॒मृ॒ता॒हु॒तिम॒मृता॑यां जुहोम्य॒ग्निं पृ॑थि॒व्याम॒मृत॑स्य॒ जित्यै॒ तया॑ऽन॒न्तं काम॑म॒हं ज॑यानि प्र॒जाप॑ति॒र्यं प्र॑थ॒मो जि॒गाया॒ग्निम॑ग्नौ॒ स्वाहा॑ँ। (अन्न॑पत॒ इत्ये॒षा)। {अन्न॑प॒तेऽन्न॑स्य नो देह्यनमी॒वस्य॑ शु॒ष्मिण॑ः। प्र प्र॑दा॒तार॑ं तारिष॒ ऊर्ज॑ं नो धेहि द्विपदे॒ चतु॑ष्पदे॥} अरि॑ष्टा अ॒स्माक॑ं वी॒राः स॑न्तु मा परा॑सेचि मे॒ धन॑ँम्। भूमि॒र्भूमि॑मगान्मा॒ता मा॒त॒रमप्य॑गात्। भू॒यास्म॑ पु॒त्रैः प॒शुभि॒र्यो नो॒ द्वेष्टि॒ स भि॑द्यताम्।

वास्तुसूक्तम्

(वास्तो॑ँष्पत॒ इति॒ द्वे।) वास्तो॑ँष्पते॒ प्रति॑ जानीह्य॒स्मान् स्वा॑वे॒शो अ॑नमी॒वो भ॑वा नः। यत्त्वेम॑हे॒ प्रति॒ तं नो॑ जुषस्व॒ शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे॥ वास्तो॑ँष्पते श॒ग्मया॑ स॒ꣳ सदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गातु॒मत्या॑ँ। आव॒ः क्षेम॑ उ॒त योगे॒ वर॑ं नो यू॒यं पा॑तः स्व॒स्तिभि॒ः सदा॑ नः॥} वास्तो॑ँष्पते प्र॒तर॑णो न एधि॒ गोभि॒रश्वे॑भिरिन्दो। अ॒जरा॑सस्ते स॒ख्ये स्या॑म पि॒तेव॑ पु॒त्रान् प्रति॑ नो जुषस्व। अ॒मी॒व॒हा वास्तो॑ँष्पते॒ विश्वा॑ रू॒पाण्या॑वि॒शन्। सखा॑सु॒ शेव॑ एधि नः। शि॒वꣳ शि॒वम्॥१५॥

श्वग्रहगृहीतस्याभिमन्त्रणादयः

कू॒र्कु॒रः सुकू᳚र्कु॒रः कूकु॒रो वा॑लब॒न्धन॑ः। उ॒परि॑ष्टा॒द्यदेजा॑य
तृ॒तीय॑स्या इ॒तो दि॒वः। औल॑ब॒ इत्तमुपा᳚ह्वयथा॒र्जीञ्छ्या॒मः श॒बल॑ः।
अ॒धोरा॑म उलु॒म्ब॒लः सा॑र॒मेयो॑ ह॒ धाव॑ति स॒मु॒द्रम॑व॒चाक॑शत्।
बि॒भ्रन्नि॒ष्कं॑ च रु॒क्मं च॒ शुना॒मग्र॑ꣳ सुबीरि॒णः। सुबी॑रिण॒ सृज॒सृज॒
शुन॑क॒ सृजैक॑व्रात्य॒ सृज॒च्छत्। तत्स॒त्यं यत्त्वेन्द्रो᳚ऽब्रवी॒द् गाः
स्पा॑शय॒स्वेति॒ तास्त्वꣳ॑ स्पा॑शयि॒त्वाऽऽग॑च्छ॒स्तं त्वा᳚ऽब्रवी॒दवि॑द॒ हा३॒
इत्यवि॑द॒ꣳहीति॒ वरं॑ वृणी॒ष्वेति॑ कुमा॒रमे॒वाहं॑ वरं॑ वृण॒
इत्य॑ब्रवीर्वि॒गृह्य॑ बा॒हू प्ल॒वसे॒ द्याम॑व॒चाक॑शत्। बि॒भ्रन्नि॒ष्कं॑ च रु॒क्मं
च॒ शुना॒मग्र॑ꣳ सुबीरि॒णः। सुबी॑रिण॒ सृज॒सृज॒ शुन॑क॒ सृजैक॑व्रात्य॒
सृज॒च्छत्। तत्स॒त्यं यत्ते॑ सर॒मा मा॒ता लोहि॑तः पि॒ता। अ॒मी एके॑
सरस्य॒का अ॑व॒धाव॑ति तृ॒तीय॑स्या इ॒तो दि॒वः। तेक॑श्च
ससरमत॒ण्डश्च॒ तूल॑श्च॒ वितू॑ल॒श्चार्जु॑नश्च॒ लोहि॑तश्च। दुला॑ ह॒ नाम॑ वो
मा॒ता मन्था॑क॒को ह॑ वः पि॒ता। सं॒ तक्षा॑ हन्ति च॒क्री वो॒ न
सीसं॑रीदत। छु॒द॒पेहिं॑ सीसरम सारमेय॒ नमं॑स्ते अस्तु सीसर।
समश्वा॒ वृषं॑णः प॒दो न सीसं॑रीदत। छु॒द॒पेहिं॑ सीसरम सारमेय॒
नमं॑स्ते अस्तु सीसर। श्वान॒मिच्छ्वाऽद॒न्न पुं॑रुषं॒ छत्। ए॒ते ते॒
प्रति॑दृश्येते समा॒नवं॑सने उ॒भे। ते अ॒हꣳ सा॒रये॑ण॒
मुसं॑ले॒नाव॑हन्म्यु॒लूख॑ले। ह॒तः श॒ङ्खो ह॒तः शं॑ङ्खपि॒ता ह॒तः
शं॑ङ्खकुतुर्व॒कः। अप्ये॑षाꣳ स्थ॒पति॑र्ह॒तः। ऋषि॑र्बो॒धः प्रबो॑ध॒ः स्वप्नो॑
मात॒रिश्वा᳚। ते तैँ प्रा॒णान् स्प॑रि॒ष्यन्ति॒ मा भैषी॒र्न म॑रि॒ष्यसि॑।
ज॒ग्धो मश॑को ज॒ग्धा वितृ॑ष्टिर्ज॒ग्धो व्य॑ध्व॒रः स्वाहा॑ ज॒ग्धो

व्यंध्व॒रो ज॒ग्धो मशं॑को ज॒ग्धा वितृं॑ष्टि॒ः स्वाहाँ॑ ज॒ग्धा
वितृं॑ष्टिर्ज॒ग्धो व्यंध्व॒रो ज॒ग्धो मशं॑क॒ः स्वाहाँ॥१६॥

इन्द्रं॑ जहि दन्द॒शूकं॑ प॒क्षिणं॒ यः सरी॑सृपः। दंक्षन्तं॑ च द॒शन्तं॑ च॒
सर्वा॒ꣳस्तानिं॑न्द्र जम्भय॒ स्वाहाँ। अ॒प्सु जा॑त॒ सरे॑ वृद्ध दे॒वाना॒मपिं॑
हस्त्य। त्वमं॑ग्न इन्द्रप्रेषिं॑त॒ः स नो॒ मा हिं॑ꣳसी॒ः स्वाहाँ। त्राणं॑मसि
परि॒त्राणं॑मसि परि॒धिरं॑सि। अन्नें॑न मनु॒ष्यां॒ꣳ स्त्रायं॑से॒ तृणैं॑ः
प॒शून्ग॒र्तेनं॑ स॒र्पान् य॒ज्ञेनं॑ दे॒वान् स्व॒धयां॑ पि॒तॄन् स्वाहाँ। तत्स॒त्यं
यत्तें॑ऽमावा॒स्यां॑यां च पौर्णमा॒स्यां चं॑ विषब॒लिꣳ हरं॑न्ति॒ सर्वं॑
उदरस॒र्पिणं॑ः। तत्ते॒ प्रेरं॑ते॒ त्वयि॒ संविं॑शन्ति॒ त्वयिं॑ नः स॒तस्त्वयिं॑
स॒द्भ्यो व॒र्षाभ्यो॑ न॒ः परिं॑देहि। (नमो॑ अस्तु स॒र्पेभ्य॒ इति॑ ति॒स्रः।)
{नमो॑ अस्तु स॒र्पेभ्यो॒ ये के चं॑ पृथि॒वीमनुं॑। ये अ॒न्तरिं॑क्षे॒ ये दि॒वि
तेभ्यं॑ः स॒र्पेभ्यो॒ नमं॑ः॥ ये॑ऽदो रों॑च॒ने दि॒वो ये वा॒ सूर्य॑स्य र॒श्मिषुं॑।
येषां॑म॒प्सु सदं॑ः कृ॒तं तेभ्यं॑ः स॒र्पेभ्यो॒ नमं॑ः॥ या इषं॑वो यातु॒धानां॑नां॒
ये वा॒ वन॒स्पती॒ꣳ रनुं॑। ये वां॑ऽव॒टेषु॒ शेरं॑ते॒ तेभ्यं॑ः स॒र्पेभ्यो॒ नमं॑ः॥}
नमो॑ अस्तु स॒र्पेभ्यो॒ ये पार्थि॑वा॒ य आँ॑न्तरि॒क्ष्यां॑ ये दि॒व्या ये
दि॒श्याँ॑ः। तेभ्यं॑ इ॒मं ब॒लिꣳ हं॑रिष्यामि॒ तेभ्यं॑ इ॒मं ब॒लिमहा॑र्षम्।
तक्षं॑क॒ वैशां॑लेय धृतराँ॑ष्ट्रैरावत॒स्ते जीं॑वा॒स्त्वयिं॑ नः स॒तस्त्वयिं॑
स॒द्भ्यो व॒र्षाभ्यो॑ न॒ः परिं॑देहि। धृतराँ॑ष्ट्रैराव॒त तक्षं॑क॒ वैशां॑लेय॒स्ते
जीं॑वा॒स्त्वयिं॑ नः स॒तस्त्वयिं॑ स॒द्भ्यो व॒र्षाभ्यो॑ न॒ः परिं॑देहि।
अ॒हि॒ꣳसा॒ऽति॒ब॒लस्ते जिं॑वा॒स्त्वयिं॑ नः स॒तस्त्वयिं॑ स॒द्भ्यो व॒र्षाभ्यो॑
न॒ः परिं॑देहि। अ॒ति॒ब॒ला॒ऽहि॒ꣳसस्ते जिं॑वा॒स्त्वयिं॑ नः स॒तस्त्वयिं॑
स॒द्भ्यो व॒र्षाभ्यो॑ न॒ः परिं॑देहि। ये दं॑न्द॒शूका॒ः पार्थि॑वा॒स्ताꣳस्त्वमि॒तः
प॒रोगव्यूं॑ति॒ निवें॑शय। सन्ति॒ वै नं॑ः श॒फिन॒ः सन्तिं॑ द॒ण्डिन॒स्ते वो॒

नेद्धिनसान्येद्यूयमस्मान् हिनसात। (समीची नामासि प्राची दिग्घेतयो नाम स्थेति द्वादश पर्यायाः।) अपश्वेत पदा जहि पूर्वेण चाऽपरेण च। सप्त च मानुषीरिमास्तिस्त्रश्च राजबन्धवीः। न वै श्वेतस्याँध्याचारेऽहिर्जघान कञ्चन। श्वेताय वैदर्वाय नमो नमः श्वेताय वैदर्वाय॥१७॥

आग्रयणादयः

परमेष्ठ्यसि परमां माङ् श्रियं गमय प्रत्यवरूढो नो हेमन्तः। प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रति प्रजायां प्रति तिष्ठामि भव्यैँ। इह धृतिरिह विधृतिरिह रन्तिरिह रमतिः। (स्योना पृथिवि बडित्था पर्वतानामिति द्वे।) {बडित्था पर्वतानां स्विद्रं बिभर्षि पृथिवि। प्र या भूमि प्रवत्वति मह्ना निनोषि महिनि॥} आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतिमद्भिः। वाताजिरैरायाहि मम हव्याय शर्वोपस्पृशतु मीढ्वान्मीढुषे स्वाहोपस्पृशतु मीढुषी मीढुष्यै स्वाहा जयन्तोपस्पृश जयन्ताय स्वाहा भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वाहा महते देवाय स्वाहा भवस्य देवस्य पत्न्यै स्वाहा शर्वस्य देवस्य पत्न्यै स्वाहेशानस्य देवस्य पत्न्यै स्वाहा पशुपतेँर्देवस्य पत्न्यै स्वाहा रुद्रस्य देवस्य पत्न्यै स्वाहोग्रस्य देवस्य पत्न्यै स्वाहा भीमस्य देवस्य पत्न्यै स्वाहा महतो देवस्य पत्न्यै स्वाहा जयन्ताय स्वाहाऽग्नयेँ स्विष्टकृते सुहुतहुदाहुतीनां कामानाꣳ समर्धयित्रे स्वाहा। स्वस्ति नः

पूर्णमुखः परिक्रामतु गृहपोपस्पृश गृहपाय स्वाहा गृह्प्युपस्पृश गृह्प्यै स्वाहा घोषिण उपस्पृशत घोषिभ्यः स्वाहा श्वासिन उपस्पृशत श्वासिभ्यः स्वाहा विचिन्वन्त उपस्पृशत विचिन्वद्भ्यः स्वाहा प्रपुन्वन्त उपस्पृशत प्रपुन्वद्भ्यः स्वाहा समश्नन्त उपस्पृशत समश्नद्भ्यः स्वाहा देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा या आख्याता याश्चानाख्याता देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा द्वारापोपस्पृश द्वारापाय स्वाहा द्वाराप्युपस्पृश द्वाराप्यै स्वाहाऽ अन्वासारिण उपस्पृशतान्वासारिभ्यः स्वाहा निषङ्गिन्नुपस्पृश निषङ्गिणे स्वाहा नमो निषङ्गिणं इषुधिमते (क्षेत्रस्य पतिना वयमिति द्वे)॥ {क्षेत्रस्य पतिना वयꣳ हितेनेव जयमसि। गामश्वं पोषयित्वा स नो मृडातीदृशे॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु॥} ॥१८॥

ईशानबलिः

यन्मे माता प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः पिता वृङ्क्तां माऽऽभुरन्योऽवपद्यताममुष्मै स्वाहा। यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः परितस्थुषीः। अद्भिर्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधेऽमुष्मै स्वाहा। यन्मे पितामही प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः पितामहो वृङ्क्तां माऽऽभुरन्योऽवपद्यताममुष्मै स्वाहा। अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या। आभिर्दिग्भिरनन्ताभिरन्तरन्यं पितामहाद्दधेऽमुष्मै स्वाहा। यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः प्रपितामहो वृङ्क्तां

माऽभुरन्योऽवपद्यताममुष्मै स्वाहा। अन्तर्दध ऋतुभिरहोरात्रैः स
सन्धिभिः। अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधेऽमुष्मै
स्वाहा। ये चेह पितरो ये च नेह याꣳश्च विद्म याꣳ उ च न
प्रविद्म। अग्ने तान् वेत्थ यदि ते जातवेदस्तया प्रत्तꣳ स्वधया
मदन्तु स्वाहा। स्वाहा पित्रे। पित्रे स्वाहा। स्वाहा पित्रे। पित्रे
स्वाहा। स्वधा स्वाहा। अग्नये कव्यवाहनाय स्वधा स्वाहा। एष ते
तत मधुमाꣳ ऊर्मिः सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य
मात्रा तावतीं त एतां मात्रां ददामि यथाऽग्निरक्षितोऽनुपदस्त एवं
मह्यं पित्रेऽक्षितोऽनुपदस्तः स्वधा भव तां त्वꣳ स्वधां तैः
सहोपजीवर्चस्ते महिमैष ते पितामह मधुमाꣳ ऊर्मिः सरस्वान्
यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावतीं त एतां मात्रां
ददामि यथा वायुरक्षितोऽनुपदस्त एवं मह्यं
पितामहायाक्षितोऽनुपदस्तः स्वधा भव तां त्वꣳ स्वधां तैः
सहोपजीव सामानि ते महिमैष ते प्रपितामह मधुमाꣳ ऊर्मिः
सरस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां
मात्रां ददामि यथाऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं
प्रपितामहायाक्षितोऽनुपदस्तः स्वधा भव तां त्वꣳ स्वधां तैः
सहोपजीव यजूꣳषि ते महिमा॥१९॥

मासिश्राद्धम्

पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां
त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्राऽमुष्मिन्
लोके। मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा

मा॒र्जय॑न्तां॒ मम॑ प्रपितामहा मा॒र्जय॑न्तां॒ मम॑ मा॒तरो॑ मा॒र्जय॑न्तां॒
मम॑ पिताम॒ह्यो मा॒र्जय॑न्तां॒ मम॑ प्रपिताम॒ह्यः। ए॒तत्ते॑ ततासौ॒ ये च॒
त्वामन्वे॒ तत्ते॑ पितामहासौ॒ ये च॒ त्वामन्वे॒ तत्ते᳚ प्रपितामहासौ॒ ये च॒
त्वामनु॑। ए॒तत्ते॑ मातरसौ॒ याश्च॒ त्वामन्वे॒ तत्ते॑ पितामह्यसौ॒ याश्च॒
त्वामन्वे॒ तत्ते᳚ प्रपितामह्यसौ॒ याश्च॒ त्वामनु॑। (मा॒र्जय॑न्तां॒ मम॑ पि॒तर॒
इत्ये॒ते।) ये च॒ वोऽत्र॒ ये चा॒स्मास्वाश॑ꣳ सन्ते॒ याश्च॒ वोऽत्र॒
याश्चा॒स्मास्वा श॑ꣳ सन्ते॒ ते च॑ वहन्तां॒ ताश्च॑ वहन्तां॒ तृप्य॑न्तु
भवन्त॒ स्तृप्य॑न्तु भवत्य॒ स्तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त। पु॒त्रान्पौत्रा॑न॒भि
त॒र्पय॑न्ती॒रापो॒ मधु॑मतीरि॒माः। स्व॒धां पि॒तृभ्यो॑ अ॒मृतं॒ दुहा॑ना॒ आपो॑
दे॒वीरु॒भया॑ꣳस्तर्पयन्तु। तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त। प्रा॒णे निवि॑ष्टो॒ऽमृतं॑
जुहोमि॒ ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑। यां जना᳚ः प्रति॒नन्द॑न्ति॒
रात्रिं॑ धे॒नुमि॑वाय॒तीम्। सं॒व॒त्स॒रस्य॒ या पत्नी॒ स नो॑ अस्तु
सुमङ्ग॒ली स्वाहा᳚। वह॑ व॒पां जा॑तवेदः पि॒तृभ्यो॒ यत्रै॑ना॒न् वेत्थ॒
निहि॑तान्परा॒के। मेद॑सः कू॒ल्या॒ उप॒ तान् क्ष॑रन्तु स॒त्या ए॒ता
आ॒शिष॑ः सन्तु॒ कामै॑ः स्वाहा᳚। (यां जना᳚ः प्रति॒नन्द॒न्तीत्ये॒षा।)
(इ॒यमे॒व सा या प्र॑थ॒मा व्यौच्छ॒दिति॑ ति॒स्रः।) ए॒का॒ष्ट॒कां प॑श्यत॒
दोह॑मानामन्नं॑ मा॒ꣳसव॑द्घृ॒तव॑त् स्व॒धाव॑त्।
तद्ब्रा᳚ह्म॒णैर॑तिपूतम॑न॒न्तम॑क्ष॒य्यम॒मुष्मि॑न् लो॒के स्फीति॑ं गच्छतु मे
पि॒तृभ्य॒ः स्वाहा᳚। औ॒लू॒ख॒ला ग्रावा॑णो॒ घोष॑मक्र॒त ह॒विः कृ॒ण्वन्त॑ः
परिवत्स॒रीण᳚म्। ए॒का॒ष्ट॒के सु॑प्र॒जा वी॒रव॑न्तो व॒यꣳ स्या॑म॒ पत॑यो
रयी॒णाम्। ए॒का॒ष्ट॒का तप॑सा॒ तप्य॑माना संव॑त्स॒रस्य॒ पत्नी॑ दुदु॒हे॒
प्रपी॑ना। तं दोह॒मुप॑जीवाथ पि॒तर॑ः स॒हस्र॑धारम॒मुष्मि॑न् लो॒के
स्वाहा᳚॥२०॥

अष्टकादयः

उ॒क्थ्य॑श्चाऽस्य॑तिरा॒त्रश्च॒ सा॒द्यस्क्री॒श्छन्द॑सा स॒ह। अ॒पू॒प॒घृ॒ताहु॑ते॒ नम॑स्ते अस्तु मा॒ सपि॒प्पले॒ स्वाहा॑। भूः पृ॑थि॒व्य॑ग्नि॒नर्चाऽमुं मयि॒ काम॒ं निर्यु॑नज्मि॒ स्वाहा॑। भुवो॑ वा॒युना॒ऽन्तरि॑क्षेण॒ साम्ना॒ऽमुं मयि॒ काम॒ं निर्यु॑नज्मि॒ स्वाहा॑। स्व॑र्दिवाऽऽदि॒त्येन॒ यजु॑षा॒ऽमुं मयि॒ काम॒ं निर्यु॑नज्मि॒ स्वाहा॑। ज॒नद॑द्भिरथर्वाङ्गिरोभि॒रमुं मयि॒ काम॒ं निर्यु॑नज्मि॒ स्वाहा॑। रो॒चनाया॑जि॒रायाग्नये॑ दे॒वजा॑तवे॒ स्वाहा॑। के॒तवे॒ मन॑वे॒ ब्रह्म॑णे दे॒वजा॑तवे॒ स्वाहा॑। स्व॒धा स्वाहा॒ऽग्नये॑ कव्य॒वाह॑नाय स्व॒धा स्वाहा॑। अन्न॑मिव ते दृ॒शे भू॑यास॒ं वस्त्र॑मिव ते दृ॒शे भू॑यास॒ं वित्त॑मिव ते दृ॒शे भू॑यासमा॒शेव॑ ते दृ॒शे भू॑यासꣳ श्र॒द्धेव॑ ते दृ॒शे भू॑यास॒ꣳ सꣳ स्र॑वन्तु॒ दिशो॑ म॒हीः स॒माधा॑वन्तु सू॒नृताः॑। सर्वे॒ कामा॑ अ॒भिय॑न्तु मा प्रि॒या अ॒भिर॑क्षन्तु मा प्रि॒याः। यशो॑ऽसि॒ यशो॒ऽहं त्वयि॑ भूयासमसौ। (अ॒ङ्क्तौ न्य॒ङ्क्ताव॒भित॒ इत्ये॒षा।) {अ॒ङ्क्तौ न्य॒ङ्क्ताव॒भितो॒ रथ॒ं यौ ध्वा॒न्तं वा॑ता॒ग्रमनु॑ सं॒चर॑न्तौ दू॒रेहे॑तिरिन्द्रि॒यावा॑न्पत॒त्री ते नो॒ऽग्नयः॒ पप्र॑यः पारयन्तु॥}

अध्व॑नामध्वपते स्व॒स्ति मा॒ संपा॑रय। अ॒यं वा॑म॒श्विनौ॒ रथो॒ मा दु॒ःखे मा सु॒खे रि॑षत्। अरि॑ष्टः स्व॒स्ति ग॑च्छतु विवि॒घ्नन्पृत॑नाय॒तः। अश्वो॑सि॒ हयो॒स्यत्यो॑सि॒ नरो॒स्यर्वा॑ऽसि॒ सप्ति॑रसि वा॒ज्य॑सि॒ वृषा॑ऽसि नृ॒मणा॑ असि॒ ययु॒र्नामा॑स्याऽऽदि॒त्याना॒ं पत्वाऽन्वि॑हि। ह॒स्ति॒य॒श॒सम॑सि हस्तियश॒सी भू॑यास॒ं वह॑ काल॒वह॒ श्रिय॑ं मा॒ऽभिव॑ह। इन्द्र॑स्य त्वा॒ वज्रे॑णा॒भि निद॑धाम्यसौ। अव॑ जिह्वक निजिह्व॒काव॑ त्वा ह॒विषा॑ यजे। तत्स॒त्यं यद॒हं ब्रवी॒म्यध॑रो॒ मद॒सौ व॑दा॒त्स्वाहा॑। आ ते॒ वाच॑मा॒स्या॑ दद॒ आ म॑न॒स्या॒ꣳ

हृदं॑याद॒धि। यत्रं॑यत्र ते॒ वाङ्निहि॑ता॒ तां त॒ आदं॑दे। तत्स॒त्यं यद॒हं ब्रवी॒म्यधं॑रो॒ मत्प॑द्यस्वासौ॥२१॥

विविधकर्माणि

या तं॑ ए॒षा र॑रा॒ट्या॑ त॒नूर्म॒न्योर्मृ॒ध्रस्य॒ नाशि॑नी। तां दे॒वा ब्रं॑ह्मचा॒रिणो॒ विनं॑यन्तु सुमे॒धसं॑ः। यत्तं॑ ए॒तन्मुखे॑ऽम॒तꣳ र॒रा॒ट॒मुदि॑व॒ विध्यं॑ति। वि ते॒ क्रोधं॑ नयामसि॒ गर्भ॑मश्वत॒र्या इं॑व। अव॒ ज्यामि॑व॒ धन्वं॑नो हृ॒दो म॒न्युं तं॑नोमि ते। इन्द्रापाँस्य पलि॒गम॒न्येभ्य॒ः पुरु॑षेभ्यो॒ऽन्यत्र॒ मत्। यद॒हं धने॑न॒ प्रप॒णꣳश्चं॑रामि॒ धने॑न देवा॒ धनं॑मि॒च्छमा॑नः। तस्मि॒न् सोमो॒ रुच॒मादं॑धात्व॒ग्निरिन्द्रो॒ बृह॒स्पति॑श्च॒ स्वाहाँ॑। परिं॑ त्वा॒ गिरे॑रमिह॒ं परि॒ भ्रातु॒ः परि॒ष्वसु॑ः। परि॒ सर्वे॑भ्यो॒ ज्ञाति॑भ्य॒ः परि॑षीत॒ः क्वैँ॑ष्यसि॑। शश्व॒त्परि॑कुपितेन॒ सं॒क्रामे॒णाऽवि॑च्छिदा। उ॒लेन॒ परि॑षीतोसि॒ परि॑षीतोस्यु॒लेनं॑। (आवं॑र्तन व॒र्त॒येत्ये॒षा।) {आवं॑र्तन वर्तय॒ नि निं॑वर्तन वर्त॒येन्द्र॑ नर्दबुद। भूम्या॒श्चतं॑स्रः प्र॒दिश॒स्ताभि॒रा वं॑र्तया॒ पुनं॑ः॥} आ॒वं॑र्तने नि॒वर्तन आ॒वर्तननिवर्त॒नाय॒ स्वाहाँ॑। अनु॑ पोऽह्वदनु॒ह्वयो॒ निवं॑र्तो पो॒ न्यं॑वीवृतत्। ऐ॒न्द्रः परि॑क्रोशो व॒ः परि॑क्रोशतु स॒र्वत॑ः। यदि॒ मामति॒ मन्याँ॑ध्वा॒ अदे॑वा दे॒ववं॑त्तरम्। इन्द्र॒ः पाशे॑न सि॒क्त्वा वो॒ म॒ह्यमि॒द्व॒शमानं॑या॒त्स्वाहाँ॑। यदि॑ वृ॒क्षाद्य॒द्यन्तरि॑क्षा॒त्फलं॑म॒भ्यं॑पत॒त्तदु॑ वा॒यु॒रे॒व। यत्रास्पृं॑क्ष॒त्त॒नुवं॒ यत्र॒ वास॒ आपो॑ बाधन्तां॒ निर्ऋ॑तिं परा॒चैः। ये प॒क्षिणं॑ः प॒तयं॑न्ति बि॒भ्यतो॒ निर्ऋ॑तैः स॒ह। ते मां॑ शि॒वेनं॑ श॒ग्मेन॒ तेजं॑सो॒न्दन्तु॒ वर्च॑सा। दि॒वो नु मां॑ बृ॒ह॒तो अ॒न्तरि॑क्षाद॒पाꣳ स्तो॒को अ॒भ्यं॑पतच्छि॒वेनं॑। सम॒हमिं॑न्द्रि॒येण॒

मन॑सा॒ऽसमागा॒ं ब्रह्म॑णा संपृचा॒नः सु॒कृता॑ कृ॒तेन॑। (इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने॒ त्वमं॑ग्ने अ॒याऽसि॒ प्रजा॑पते।) (सं॒राजं॑ च॒ व्याहृ॑ती॒र्विहृ॑ताः।) इ॒मं जी॒वेभ्यः॑ परि॒धिं द॑धामि॒ मैषां नु॑ गा॒दप॑रो॒ अर्ध॑मे॒तम्। श॒तं जी॑वन्तु श॒रदः॑ पु॒रूचीस्ति॒रो मृ॒त्युं द॑धता॒ं पर्व॑तेन॥२२॥

अभिश्रवणमन्त्राः

रक्षोहणो वलगहनः

तै॰सं॰ १.३.२

र॒क्षो॒हणो॑ वलग॒हनो॑ वैष्ण॒वान् ख॑नामी॒दम॒हं तं व॑ल॒गमुद् व॑पामि॒ यं नः॑ समा॒नो यमस॑मानो निच॒खाने॒दमे॑न॒मध॑रं करोमि॒ यो नः॑ समा॒नो योऽस॑मानोऽराती॒यति॑ गाय॒त्रेण॒ छन्द॒साऽव॑बाढो वल॒गः किमत्र॑ भ॒द्रं तन्नौ॑ स॒ह वि॒राड॑सि सपत्न॒हा स॒म्राड॑सि भ्रातृव्य॒हा स्व॒राड॑स्यभिमाति॒हा वि॑श्वा॒राड॑सि॒ विश्वा॑सां ना॒ष्ट्राणा॑ꣳ ह॒न्ता र॒क्षो॒हणो॑ वलग॒हनः॒ प्रोक्षा॑मि वैष्ण॒वान् र॑क्षो॒हणो॑ वलग॒हनोऽव॑ नयामि वैष्ण॒वान् यवो॑ऽसि य॒वया॒स्मद् द्वेषो॑ य॒वयारा॑ती रक्षो॒हणो॑ वलग॒हनोऽव॑ स्तृणामि वैष्ण॒वान् र॑क्षो॒हणो॑ वलग॒हनो॒ऽभि जु॑होमि वैष्ण॒वान् र॑क्षो॒हणौ॑ वलग॒हना॒वुप॑ दधामि वैष्ण॒वी र॑क्षो॒हणौ॑ वलग॒हनौ॒ पर्यू॑हामि वैष्ण॒वी र॑क्षो॒हणौ॑ वलग॒हनौ॒ परि॑ स्तृणामि वैष्ण॒वी र॑क्षो॒हणौ॑ वलग॒हनौ॑ वैष्ण॒वी बृ॒हन्न॑सि बृ॒हद्ग्रा॑वा बृ॒हतीमिन्द्रा॑य॒ वाचं॑ वद॥

सोमाय पितृमते

तै॰सं॰ १.८.५

सोमा॑य पितृ॒मते॑ पुरो॒डाश॒ꣳ षट्क॑पालं॒ निर्व॑पति पि॒तृभ्यो॑ बर्हि॒षद्भ्यो॑ धा॒नाः पि॒तृभ्यो॑ऽग्निष्वा॒त्तेभ्यो॑ऽभिवा॒न्या॑यै दु॒ग्धे म॒न्थमे॒तत्ते॑ तत॒ ये च॒ त्वामन्वे॒तत्ते॑ पितामह प्रपितामह॒ ये च॒ त्वामन्वत्र॑ पितरो यथाभा॒गं म॑न्दध्वꣳ सुसं॒दृशं॑ त्वा व॒यं मघ॑वन् मन्दिषी॒महि॑। प्र

नूनं पूर्णवंन्धुरः स्तुतो यांसि वशाँ॒ अनुं। योजा॒ न्विंन्द्र ते॒ हर्यक्ष॒न्नमींमदन्त॒ ह्यवं प्रि॒या अंधूषत।

अस्तोंषत॒ स्वभांनवो॒ विप्रा॒ नविंष्ठया म॒ती। योजा॒ न्विंन्द्र ते॒ हरीँ॥ अक्षंन् पि॒तरोऽमींमदन्त पि॒तरोऽतींतृपन्त पि॒तरोऽमींमृजन्त पि॒तरंः। परेंत पितरः सोम्या गम्भी॒रैः प॒थिभिंः पू॒र्व्यैः। अथां पि॒तृन् सुंवि॒दत्रा॒ँ अपींत य॒मेन॒ ये संध॒माद॒ं मदंन्ति॥ मनो॒ न्वा हुंवामहे नाराश॒ँसेन॒ स्तोमेंन पितृ॒णां च॒ मन्मंभिः।

आ नं एतु॒ मन॒ः पुन॒ः क्रत्वे॒ दक्षांय जी॒वसेँ। ज्योक् च॒ सूर्यं॑ दृ॒शे॥ पुनंर्नः पि॒तरो॒ मनो॒ ददांतु॒ दैव्यो॒ जनंः। जी॒वं व्रातँ॒ सचेमहि॥ यद॒न्तरिंक्षं पृथि॒वीमु॒त द्यां यन्मा॒तरं॑ पि॒तरं॑ वा जिहिँसि॒म। अ॒ग्निर्मा॒ तस्मा॒देनंसो॒ गार्हंपत्य॒ः प्र मुंञ्चतु दुरि॒ता यानिं चकृ॒म क॒रोतु॒ मामंने॒नसँम्॥

उशन्तस्त्वा हवामह उशन्तः

तै॰सं॰ २.६.१२

उ॒शन्तंस्त्वा हवामह उ॒शन्त॒ः समिंधीमहि। उ॒शन्नुंश॒त आ वंह पि॒तृन् ह॒विषे॒ अत्तंवे॥ त्वँ सोंम॒ प्रचिंकितो मनी॒षा त्वँ रजिं॒ष्ठमनुं नेषि॒ पन्थाँम्। तव॒ प्रणींती पि॒तरों न इन्दो दे॒वेषु॒ रत्नंमभजन्त॒ धीराँः॥ त्वया॒ हि नंः पि॒तरंः सोम॒ पूर्वे॒ कर्मांणि च॒क्रुः पंवमान॒ धीराँः। व॒न्वन्नवांतः परि॒धीँरपोंर्णु वी॒रेभि॒रश्वैँर्म॒घवां भव नः॥

त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ। तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम्॥ अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः। अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन॥ बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्। त आ गतावसा शन्तमेनाथास्मभ्यꣳ शं योररपो दधात॥

आऽहं पितृन् सुविदत्राꣳ अवित्सि नपातं च विक्रमणं च विष्णोः। बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु। त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान्॥ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।

असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥ इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः। ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥ अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः। शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन्॥

यदग्ने कव्यवाहन पितृन् यक्ष्यृतावृधः। प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥ त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा। प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि॥ मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः। याꣳश्च देवा वावृधुर्ये च देवान् स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति॥

इ॒मं य॑म प्रस्त॒रमा हि सीदाङ्गि॑रोभिः पि॒तृभि॑ः संविदा॒नः। आ त्वा॒ मन्त्रा॑ः कविश॒स्ता व॑हन्त्वे॒ना रा॑जन् ह॒विषा॑ मादयस्व॥ अङ्गि॑रोभि॒रा ग॑हि य॒ज्ञिये॑भि॒र्यम॑ वैरू॒पैरि॒ह मा॑दयस्व। विव॑स्वन्तꣳ हुवे॒ यः पि॒ता ते॒ऽस्मिन् य॒ज्ञे ब॒र्हिष्या नि॒षद्य॑॥ अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यास॑ः। तेषा॑ व॒यꣳ सु॒मतौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म॥

भक्षेहि मा विश

तै०सं० ३.२.५

भक्षेहि॒ माऽऽवि॑श दीर्घायु॒त्वाय॑ शन्तनु॒त्वाय॑ रा॒यस्पोषा॑य॒ वर्च॑से सुप्रजा॒स्त्वायेहि॑ वसो पुरोवसो प्रि॒यो मे॑ हृ॒दौऽस्य॒श्विनो॑स्त्वा बा॒हुभ्या॑ꣳ सघ्यासं नृचक्ष॑सं त्वा देव सोम सु॒चक्षा॒ अव॑ ख्येषं म॒न्द्राऽभिभू॑तिः के॒तुर्य॒ज्ञानां॒ वाग्जु॑षा॒णा सोम॑स्य तृप्यतु म॒न्द्रा स्व॑र्वा॒च्यदि॑ति॒रना॑हतशीर्ष्णी॒ वाग् जु॑षा॒णा सोम॑स्य तृप्य॒त्वेहि॑ विश्वचर्षणे॥

श॒म्भूर्म॑यो॒भूः स्व॒स्ति मा॑ हरिवर्ण॒ प्र च॑र॒ क्रत्वे॒ दक्षा॑य रा॒यस्पोषा॑य सुवी॒रता॑यै॒ मा मा॑ राज॒न् वि बी॑भिषो॒ मा मे॒ हार्दि॑ त्वि॒षा व॑धीः। वृष॑णे॒ शुष्मा॒याऽऽयु॑षे॒ वर्च॑से॥ वसु॑मद्गणस्य सोम देव ते मति॒विद॑ः प्रातःसव॒नस्य॑ गाय॒त्रच्छ॑न्दस॒ इन्द्र॑पीतस्य॒ नरा॒शꣳस॑पीतस्य पि॒तृपी॑तस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो भक्षयामि रु॒द्रव॑द्गणस्य सोम देव ते मति॒विदो॒ माध्य॑न्दिनस्य॒ सव॑नस्य त्रि॒ष्टुप्छ॑न्दस॒ इन्द्र॑पीतस्य॒ नरा॒शꣳस॑पीतस्य

पि॒तृपी॑तस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो भक्षयाम्यादि॒त्यव॑द्गणस्य
सोम देव ते मति॒विदं॑स्तृतीय॑स्य॒ सव॑नस्य॒ जग॑तीछन्दस॒
इन्द्र॑पीतस्य॒ नरा॒शꣳस॑पीतस्य पि॒तृपी॑तस्य॒ मधु॑मत॒
उप॑हूत॒स्योप॑हूतो भक्षयामि॥ आ प्या॑यस्व॒ समे॑तु ते वि॒श्वतः॑ सोम॒
वृष्णि॑यम्। भवा॒ वाज॑स्य संग॒थे॥ हिन्वं॑ मे॒ गात्रा॑ हरिवो ग॒णान् मे॒
मा वि ती॑तृषः। शि॒वो मे॑ सप्त॒र्षीनुप॑ तिष्ठस्व॒ मा मेऽवा॒ङ्
नाभि॒मति॑ गाः॥

अपा॑म॒ सोम॑म॒मृता॑ अभूमाद॑र्श्म॒ ज्योति॒रवि॑दाम दे॒वान्। किम॒स्मान्
कृ॑णव॒दरा॑ति॒ः किमु॑ धू॒र्तिर॑मृत॒ मर्त्य॑स्य॒॥ यन्म॑ आ॒त्मनो॑
मि॒न्दाऽभू॑द॒ग्निस्तत् पु॒नराहा॑ऽर्जा॒तवे॑दा॒ विच॑र्षणिः।
पुन॑र॒ग्निश्चक्षु॑रदा॒त् पु॒नरिन्द्रो॒ बृह॒स्पतिः॑। पुन॑र्मे अश्विना यु॒वं चक्षु॒रा
ध॑त्तम॒क्ष्योः॥ इ॒ष्टय॑जुषस्ते देव सोम स्तु॒तस्तो॑मस्य॥

श॒स्तोक्थ॑स्य॒ हरि॑व॒त इन्द्र॑पीतस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो
भक्षयामि॥ आ॒पूर्या॒ः स्था मा॑ पूरयत प्र॒जया॑ च॒ धने॑न च ॥
ए॒तत्ते॑ तत॒ ये च॒ त्वामन्वे॒तत्ते॑ पितामह प्रपितामह॒ ये च॒ त्वामन्वत्र॑
पितरो यथाभा॒गं म॑न्दध्व॒ं नमो॑ वः पितरो॒ रसा॑य॒ नमो॑ वः पितर॒ः
शुष्मा॑य॒ नमो॑ वः पितरो जी॒वाय॒ नमो॑ वः पितरः

स्व॒धायै॒ नमो॑ वः पितरो म॒न्यवे॒ नमो॑ वः पितरो घो॒राय॒ पित॑रो॒
नमो॑ वो॒ य ए॒तस्मि॑न् लो॒के स्थ यु॒ष्माꣳस्तेऽनु॒ यें॑ऽस्मिन् लो॒के
मां तेऽनु॒ य ए॒तस्मि॑न् लो॒के स्थ यू॒यं तेषा॒ं वसि॑ष्ठा भूयास्त॒
यें॑ऽस्मिन् लो॒के॑ऽहं तेषां॑ वसि॑ष्ठो भूयास॒ं प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो
विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव॥

यत्कामास्ते जुहुमस्तन्नो अस्तु वयङ् स्याम पतयो रयीणाम्॥
देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि
पितृकृतस्यैनसोऽवयजनमस्यप्सु धौतस्य सोम देव ते नृभिः
सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्यो
गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामि॥

ध्रुवाऽसि धरुणाऽस्तृता

तै॰सं॰ ४.२.९

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृता। मा त्वा समुद्र उद्
वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह॥ प्रजापतिस्त्वा सादयतु
पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि
भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं
यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय
व्यानायोदानाय प्रतिष्ठायै

चरित्रायाग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया
देवतयाऽङ्गिरस्वद्ध्रुवा सीद। काण्डात्काण्डात् प्ररोहन्ती
परुषःपरुषः परि। एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥ या
शतेन प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम
हविषा वयम्॥ अषाढाऽसि सहमाना सहस्वारातीः
सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः।

सहस्रवीर्याऽसि सा मा जिन्व॥ मधु वाता ऋतायते मधु क्षरन्ति
सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ मधु नक्तमुतोषसि मधुमत्
पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता॥ मधुमान्नो

वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥

तद् विष्णोः परमं पदँ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः। स्यूता देवेभिरमृतेनाऽगाः ॥ यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय नस्कृधि॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते॥

विराट् ज्योतिरधारयत् सम्राड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयत्। अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्त्याशवः॥ युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव। नि होता पूर्व्यः सदः॥ द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः। तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः॥

अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च। अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान्॥ ऋचे त्वा रुचे त्वा समित् स्रवन्ति सरितो न धेनाः। अन्तर्हृदा मनसा पूयमानाः। घृतस्य धारा अभि चाकशीमि। हिरण्ययो वेतसो मध्य आसाम्। तस्मिन् सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः। तस्याऽऽसते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम्॥

यास्ते अग्ने समिधः

तै॰सं॰ ५.७.८

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः।
ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्॥
उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न
यद्वा अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने
समिधो यानि []

धामेत्याहैषा वा अग्नेः स्वयंचितिरग्निरेव तदग्निं चिनोति
नाध्वर्युरात्मनोऽन्तरेति चतस्र आशाः प्र चरन्त्वग्नय इमं नो यज्ञं
नयतु प्रजानन्। घृतं पिन्वन्नजरꣳ सुवीरं ब्रह्म समिद्
भवत्याहुतीनाम्॥ सुवर्गाय वा एष लोकायोप धीयते यत्
कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह॥

दिश एवैतेन प्र जानातीमं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य
लोकस्याभिनीत्यै ब्रह्म समिद् भवत्याहुतीनामित्याह ब्रह्मणा वै
देवाः सुवर्गं लोकमायन् यद् ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्
यजमानः सुवर्गं लोकमेति प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः
पशवश्छन्दाꣳसि रूपꣳ सर्वान् वर्णानिष्टकानां कुर्याद् रूपेणैव
प्रजां पशूञ्छन्दाꣳस्यव रुन्धेऽथो प्रजाभ्य एवैनं
पशुभ्यश्छन्दोभ्योऽवरुध्य चिनुते॥

आशुः शिशानो

अनुवाकोऽयं गतम् (316)

उदेनमुत्तरां नयेति

तै॰सं॰ ५.४.६

उदे॑नमुत्त॒रां न॒येति॑ स॒मिध॒ आ द॑धाति॒ यथा॒ जनं॑ य॒तेऽव॒सं क॒रोति॑ ता॒दृगे॒व तत् ति॒स्र आ द॑धाति त्रि॒वृद्वा अ॒ग्निर्यावा॑ने॒वाग्निस्तस्मै॑ भाग॒धेयं॑ करो॒त्यौदु॑म्बरीर्भ॒व॒न्त्यूर्ग्वा उ॑दु॒म्बर॒ ऊर्ज॑मे॒वास्मा॒ अपि॑ दधा॒त्युदु॑ त्वा॒ विश्वे॑ दे॒वा इत्या॑ह प्रा॒णा वै विश्वे॑ दे॒वाः प्रा॒णै[]रे॒वैन॒मुद्य॑च्छ॒तेऽग्ने॒

भर॑न्तु॒ चित्ति॑भि॒रित्या॑ह॒ यस्मा॑ ए॒वैनं॑ चि॒त्तायो॒द्यच्छ॑ते॒ तेनै॒वैन॒ꣳ सम॑र्धयति॒ पञ्च॒ दिशो॒ दैवी॑र्य॒ज्ञम॑वन्तु दे॒वीरित्या॑ह॒ दिशो॒ ह्ये॑षोऽनु॑ प्र॒च्यव॒तेऽपाम॑तिं दु॒र्मतिं॑ बाध॑माना॒ इता॑ह॒ रक्ष॑सा॒मप॑हत्यै रा॒यस्पोषे॑ य॒ज्ञप॑तिमा॒भजन्ती॒रित्या॑ह प॒शवो॒ वै रा॒यस्पोषः॑ []

प॒शूने॒वाव॑ रुन्धे ष॒ड्भिर्ह॑रति॒ षड् वा ऋ॒तव॑ ऋ॒तुभि॑रे॒वैन॑ꣳ हरति॒ द्वे प॑रि॒गृह्य॑वती भवतो॒ रक्ष॑सा॒मप॑हत्यै॒ सूर्य॑रश्मि॒र्हरि॑केशः पु॒रस्ता॒दित्या॑ह॒ प्रसू॑त्यै॒ ततः॑ पाव॒का आ॒शिषो॑ नो जु॒षन्ता॒मित्या॒हान्नं॒ वै पा॑व॒कोऽन्न॑मे॒वाव॑ रुन्धे देवासु॒राः संय॑त्ता आस॒न् ते दे॒वा ए॒तदप्र॑तिरथमपश्य॒न् तेन॒ वै तेऽप्र॒त्य[]सु॑रान्

अजय॒न् तदप्र॑तिरथस्याप्रतिरथ॒त्वं यदप्र॑तिरथं द्वि॒तीयो॒ होता॒ऽन्वाहाप्र॒त्ये॑व तेन॒ यज॑मानो॒ भ्रातृ॑व्यान् जय॒त्यथो॒ अन॑भिजितमे॒वाभि ज॑यति दश॒र्चं भ॑वति॒ दशा॑क्षरा वि॒राड्

विराजेमौ लोकौ विधृंतावनयौँर्लोकयोर्विधृंत्या अथो दशाँक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यसंदिव वा अन्तरिंक्षमन्तरिंक्षमिवाग्नींध्रमाग्नींध्रे[]ऽश्मानं

नि दंधाति सत्त्वाय द्वाभ्यां प्रतिंष्ठित्यै विमानं एष दिवो मध्यं आस्त इत्यांह व्यैंवैतयां मिमीते मध्यें दिवो निहिंतः पृश्निरश्मेत्याहान्नं वै पृश्र्यन्नंमेवावं रुन्धे चतसृभिरा पुच्छांदेति चत्वारि छन्दांꣳसि छन्दोंभिरेवेन्द्रं विश्वां अवीवृधन्नित्यांह वृद्धिंमेवोपावंर्तते वाजांनाꣳ सत्पंतिं पतिमि[]त्याहान्नं

वै वाजोऽन्नंमेवावं रुन्धे सुम्नहूर्यज्ञो देवाꣳ आ चं वक्षदित्यांह प्रजा वै पशवंः सुम्नं प्रजामेव पशूनात्मन् धंत्ते यक्षंदग्निर्देवो देवाꣳ आ चं वक्षदित्यांह स्वगाकृंत्यै वाजंस्य मा प्रसवेनौंद् ग्राभेणोदंग्रभीदित्यांहासौ वा आंदित्य उद्यन्नुंद् ग्राभ एष निम्रोचं निग्राभो ब्रह्मंणैवात्मानंमुद्गृह्णाति ब्रह्मंणा भ्रातृंव्यं नि गृंह्णाति॥

अग्न उदधे या त इषुः

तै॰सं॰ ५.५.९

अग्नं उदधे या त इषुंर्युवा नाम तयां नो मृड तस्याँस्ते नमस्तस्याँस्त उप जीवंन्तो भूयास्माग्नें दुध्र गह्य किꣳशिल वन्य या त इषुंर्युवा नाम तयां नो मृड तस्याँस्ते नमस्तस्याँस्त उप जीवंन्तो भूयास्म पञ्च वा एतेँऽग्नयो यच्चितंय उदधिरेव नामं प्रथमो दुध्रो []

द्वितीयो गह्यस्तृतीयः किंशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च प्र दहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो वाङ् म आसन् नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनू[]स्तनुवा

मे सह नमस्ते अस्तु मा मा हिंसीरप वा एतस्मात् प्राणाः क्रामन्ति योऽग्निं चिन्वन्नधिक्रामति वाङ् म आसन् नसोः प्राण इत्याह प्राणानेवाऽऽत्मन् धत्ते यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागा []

अन्ये शतरुद्रीयं हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद् भागधेयेनैवैनं शमयति तस्य त्वै शतरुद्रीयं हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात् पान्तु पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः पश्चात् पान्तु द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु []

देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यत् संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः॥

शिरो वा एतद्यज्ञस्य

तै॰सं॰ ६.२.११

शिरो॒ वा ए॒तद्य॒ज्ञस्य॒ यद्ध॑वि॒र्धान॑ं प्रा॒णा उ॑पर॒वा ह॑वि॒र्धाने॑ खायन्ते॒ तस्मा᳚च्छी॒र्षन् प्रा॒णा अ॒धस्ता᳚त् खायन्ते॒ तस्मा᳚द॒धस्ता᳚च्छी॒र्ष्णः प्रा॒णा र॑क्षो॒हणो॑ वलग॒हनो॑ वैष्ण॒वान् ख॑ना॒मीत्या॑ह वैष्ण॒वा हि दे॒वत॑योपर॒वा असु॑रा॒ वै नि॒र्यन्तो॑ दे॒वाना᳚ं प्रा॒णेषु॑ वल॒गान् न्य॑खनन्॒ तान् बा॑हुमा॒त्रेऽन्व॑विन्द॒न् तस्मा᳚द् बाहुमा॒त्राः खा॑यन्त इ॒दम॒हं तं व॑ल॒गमुद् व॑पामि॒ []

यं नः॑ समा॒नो यमस॑मानो निच॒खानेत्या॑ह॒ द्वौ वाव पुरु॑षौ॒ यश्चै॒व स॑मा॒नो यश्चास॑माना॒ यमे॒वास्मै॒ तौ व॑ल॒गं नि॒खन॑त॒स्तमे॒वोद् व॑पति॒ सं तृ॑णत्ति॒ तस्मा॒त् संतृ॑ण्णा अन्तर॒तः प्रा॒णा न सं भि॑नत्ति॒ तस्मा॒दसं॑भिन्नाः प्रा॒णा अ॒पोऽव॑ नयति॒ तस्मा॑दा॒र्द्रा अ॑न्तर॒तः प्रा॒णा यव॑मती॒रव॑ नयत्यू॒[]र्ग्वै

यवः॑ प्रा॒णा उ॑पर॒वाः प्रा॒णेष्वे॒वोर्ज॑ं दधाति ब॒र्हिरव॑ स्तृणाति॒ तस्मा᳚ल्लोम॒शा अ॑न्तर॒तः प्रा॒णा आज्ये॑न॒ व्याघा॑रयति॒ तेजो॒ वा आज्य॑ं प्रा॒णा उ॑पर॒वाः प्रा॒णेष्वे॒व तेजो॑ दधाति॒ हनू॒ वा ए॒ते य॒ज्ञस्य॒ यद॑धि॒षव॑णे॒ न सं तृ॑णत्त्यसं॑तृण्णे॒ हि हनू॒ अथो॒ खलु॑ दीर्घसो॒मे स॒ंतृद्ये॒ धृत्यै॒ शिरो॒ वा ए॒तद्य॒ज्ञस्य॒ यद्ध॑वि॒र्धान॑ं []

प्रा॒णा उ॑पर॒वा हनू॑ अधि॒षव॑णे जि॒ह्वा चर्म॒ ग्रावा॑णो॒ दन्ता॒ मुख॑माहव॒नीयो॒ नासि॑कोत्तरवे॒दिरु॒दर॒ꣳ सदो॑ य॒दा खलु॒ वै जि॒ह्वया॑ द॒त्स्वधि॒ खाद॒त्यथ॒ मुख॑ं गच्छति य॒दा मुख॒ं गच्छ॒त्यथो॒दर॑ं गच्छति॒ तस्मा᳚द्धवि॒र्धाने॒ चर्म॒न्नधि॒ ग्राव॑भिरभि॒षुत्या॑ऽहव॒नीये॑ हु॒त्वा

प्र॒त्यञ्चः॑ प॒रेत्य॒ सद॑सि भक्षयन्ति॒ यो वै वि॒राजो॑ यज्ञमु॒खे दोहं॒ वेद॑ दु॒ह ए॒वै[]ना॑मि॒यं

वै वि॒राट् त॒स्यै त्वक् चर्मोधो॑ऽधि॒षव॑णे॒ स्तना॑ उपर॒वा ग्रावा॑णो व॒त्सा ऋ॒त्विजो॑ दुहन्ति॒ सोम॒ः पयो॒ य ए॒वं वेद॑ दु॒ह ए॒वैना॑म्॥

असावादितोऽस्मिन् लोके

तै॰सं॰ ७.३.१०

अ॒सावा॑दि॒त्यो॑ऽस्मिन् लो॒क आ॑सी॒त्तं दे॒वाः पृ॒ष्ठैः प॑रि॒गृह्य॑ सुव॒र्गं लो॒कम॑गमय॒न् परै॑र॒वस्ता॒त् पर्य॑गृह्णन् दिवाकी॒र्त्ये॑न सुव॒र्गे लो॒के प्रत्य॑स्थापय॒न् परैः॑ प॒रस्ता॒त् पर्य॑गृह्णन् पृ॒ष्ठैरु॒पावा॑रोह॒न् स वा अ॒सावा॑दि॒त्यो॑ऽमुष्मि॑न् लो॒के परै॑रुभ॒यत॒ः परि॑गृहीतो॒ यत् पृ॒ष्ठानि॒ भव॑न्ति सुव॒र्गमे॒व तैर्लो॒कं यज॑माना यन्ति॒ परै॑र॒वस्ता॒त् परि॑ गृह्णन्ति दिवाकी॒र्त्ये॑न []

सुव॒र्गे लो॒के प्रति॑ तिष्ठन्ति॒ परैः॑ प॒रस्ता॒त् परि॑ गृह्णन्ति पृ॒ष्ठैरु॒पाव॑रोहन्ति॒ यत् परे॑ प॒रस्ता॒न्न स्युः परा॑ञ्चः सुव॒र्गाल्लो॒कान्निष्प॑द्येर॒न् यद॒वस्ता॒न्न स्युः प्र॒जा निर्द॑हेयु॒रभितो॑ दिवाकी॒र्त्यं॑ पर॑ःसामानो भवन्ति सु॒व॒र्ग ए॒वैना॑न् लो॒क उ॑भ॒यत॒ः परि॑ गृह्णन्ति॒ यज॑माना॒ वै दि॑वाकी॒र्त्यं॑ संवत्स॒रः पर॑ःसामानो॒ऽभितो॑ दिवाकी॒र्त्यं॑ पर॑ःसामानो भवन्ति संवत्स॒र ए॒वोभ॒यत॒ः []

प्रति॑ तिष्ठन्ति पृ॒ष्ठं वै दि॑वाकी॒र्त्यं॑ पा॒र्श्वे पर॑ःसामानो॒ऽभितो॑ दिवाकी॒र्त्यं॑ पर॑ःसामानो भवन्ति॒ तस्मा॑द॒भित॑ः पृ॒ष्ठं पा॒र्श्वे भूयि॑ष्ठा॒

ग्रहा॑ गृह्यन्ते॒ भूयि॑ष्ठ॒ꣳ शस्यते य॒ज्ञस्यै॒व तन्म॑ध्य॒तो ग्र॒न्थिं
ग्र॑थ्न॒न्त्यवि॑स्र॒ꣳसाय स॒प्त गृ॑ह्यन्ते स॒प्त वै शी॒र्॒ष॒ण्या॑ः प्रा॒णाः प्रा॒णाने॒व
यज॑मानेषु दधति॒ यत् प॑रा॒चीना॑नि पृ॒ष्ठानि॒ भव॑न्त्य॒मु॒मे॒व
तैर्लो॒कम॒भ्यारो॑हन्ति॒ यदि॒मं लो॒कं न []

प्र॑त्यव॒रोहे॑युरुद् वा॒ माद्ये॑यु॒र्यज॑माना॒ः प्र वा॑ मीये॒रन् यत्
प्र॑ती॒चीना॑नि पृ॒ष्ठानि॒ भव॑न्ती॒म॒मे॒व तैर्लो॒कं प्र॒त्यव॑रोह॒न्त्यथो॑
अ॒स्मिन्ने॒व लो॒के प्रति॑ तिष्ठ॒न्त्यनु॑न्मादा॒येन्द्रो॒ वा अप्र॑तिष्ठित
आसी॒त् स प्र॒जाप॑ति॒मुपा॑धाव॒त् तस्मा॑ ए॒तमे॑कविꣳशतिरा॒त्रं
प्राय॑च्छ॒त् तमाह॑र॒त् तेना॑यजत॒ ततो॒ वै स प्रत्य॑तिष्ठ॒द्ये
ब॑हुया॒जिनोऽप्र॑तिष्ठिता॒ः []

स्युस्त ए॑कविꣳशतिरा॒त्रमा॑सीर॒न् द्वाद॑श॒ मासा॒ः पञ्च॒र्तव॒स्त्रय॑ इ॒मे
लो॒का अ॒साव॑दि॒त्य ए॑कवि॒ꣳश ए॒ताव॑न्तो॒ वै दे॑वलो॒कास्तेष्वे॒व
य॑थापू॒र्वं प्रति॑ तिष्ठन्त्य॒साव॑दि॒त्यो न व्य॑रोचत॒ स
प्र॒जाप॑ति॒मुपा॑धाव॒त् तस्मा॑ ए॒तमे॑कविꣳशति रा॒त्रं प्राय॑च्छ॒त्
तमाऽह॑र॒त् तेना॑यजत॒ ततो॒ वै सो॑ऽरोचत॒ य ए॒वं वि॒द्वाꣳस॑
एकविꣳशतिरा॒त्रमास॑ते॒ []

रोच॑न्त ए॒वैक॑विꣳशतिरा॒त्रो भ॑वति॒ रुग्वा ए॑कवि॒ꣳशो रुच॑मे॒व
ग॑च्छ॒न्त्यथो॑ प्रति॒ष्ठामे॒व प्र॑ति॒ष्ठा ह्ये॑कवि॒ꣳशोऽतिरा॒त्राव॒भितो॑ भवतो
ब्रह्मवर्च॒सस्य॒ परि॑गृहीत्यै॥

सन्ततिर्वा एते ग्रहाः

तै॰ब्रा॰ १.२.३

संत॑ति॒र्वा ए॒ते ग्रहाः᳚। यत्पर॑ः सामा॑नः। वि॒षू॒वान्दि॑वाकी॒र्त्य᳚म्। यथा॒ शाला॑यै॒ पक्ष॑सी। ए॒वꣳ सं॑वत्स॒रस्य॒ पक्ष॑सी। यदे॒तेन गृ॒ह्येर॑न्। विषू॑ची संवत्स॒रस्य॒ पक्ष॑सी॒ व्यव॑स्रꣳसेयाताम्। आर्ति॒मार्छे॑युः। यदे॒ते गृ॒ह्यन्ते᳚। यथा॒ शाला॑यै॒ पक्ष॑सी मध्य॒मं व॒ꣳशम॒भि सं॑मा॒यच्छ॑ति॥

ए॒वꣳ सं॑वत्स॒रस्य॒ पक्ष॑सी दिवाकी॒र्त्य॑म॒भि संत॑न्वन्ति। नार्ति॒मार्छ॑न्ति। ए॒क॒वि॒ꣳशमह॑र्भवति। शु॒क्राग्रा॒ ग्रहा॑ गृह्यन्ते। प्रत्यु॑त्तब्ध्यै सय॒त्वाय॑। सौ॒र्य॑ ए॒तदहः॑ प॒शुराल॑भ्यते। सौ॒र्यो॑ऽतिग्रा॒ह्यो॑ गृह्यते। अह॑रे॒व रू॒पेण॒ सम॑र्धयन्ति। अथो॒ अह्न॑ ए॒वैष ब॒लिर्ह्रि॑यते। स॒प्तैतदह॑रतिग्रा॒ह्या॑ गृह्यन्ते॥

स॒प्त वै शी॑र्ष॒ण्याः᳚ प्रा॒णाः। अ॒सावा॑दि॒त्यः शिरः॑ प्र॒जाना᳚म्। शी॒र्ष॒न्ने॒व प्र॒जाना᳚ं प्रा॒णान्द॑धाति। तस्मा᳚त्स॒प्त शी॒र्षन्प्रा॒णाः। इन्द्रो॑ वृ॒त्रꣳ ह॒त्वा। असु॑रान्परा॒भाव्य॑। स इ॒माल्लो॒काना॒भ्य॑जयत्। तस्या॒सौ लो॒कोऽन॑भिजित आसीत्। तं वि॒श्वक॑र्मा भू॒त्वाऽभ्य॑जयत्। यद्वै᳚श्वकर्म॒णो गृ॒ह्यते᳚॥

सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै। प्र वा ए॒ते᳚ऽस्माल्लो॒काच्च्य॑वन्ते। ये वै᳚श्वकर्म॒णं गृ॒ह्णते᳚। आ॒दि॒त्यः श्वो गृ॑ह्यते। इ॒यं वा अदि॑तिः। अ॒स्यामे॒व प्रति॑ तिष्ठन्ति। अ॒न्यो᳚न्यो गृह्येते। विश्वा᳚न्ये॒वान्येन॒ कर्मा॑णि कु॒र्वा॒णा य॑न्ति। अ॒स्याम॒न्येन॒ प्रति॑ तिष्ठन्ति। तावा॒ऽप॑रा॒र्धात् सं॑वत्स॒रस्या॒न्यो᳚न्यो गृह्येते। तावु॒भौ स॒ह म॑हाव्र॒ते

गृं॒ह्येते। य॒ज्ञस्यै॒वान्तं॑ ग॒त्वा। उ॒भयौँल्लो॒कयो॒ः प्रति॑ तिष्ठन्ति।
अ॒र्क्य॑मु॒क्थं भ॑वति। अ॒न्ना॒द्य॒स्याव॑रुध्यै॥

एकविंश एष भवति

तै॰ब्रा॰ १.२.४

ए॒क॒वि॒ꣳश ए॒ष भ॑वति। ए॒तेन॒ वै दे॒वा ए॑कवि॒ꣳशेन॑। आ॒दि॒त्यमि॒त उ॑त्त॒मꣳ सु॑व॒र्गं लो॒कमारो॑हयन्। स वा ए॒ष इ॒त ए॑कवि॒ꣳशः। तस्य॒ दशा॒वस्ता॒दहा॑नि। दश॑ प॒रस्ता॑त्। स वा ए॒ष वि॒राज्यु॑भ॒यत॒ः प्रति॑ष्ठितः। वि॒राजि॒ हि वा ए॒ष उ॑भ॒यत॒ः प्रति॑ष्ठितः। तस्मा॑दन्त॒रेमौ लो॒कौ यन्। सर्वे॑षु सुव॒र्गेषु॑ लो॒केष्व॑भि॒तप॑न्नेति॥

दे॒वा वा आ॑दि॒त्यस्य॑ सुव॒र्गस्य॑ लो॒कस्य॑। परा॑चोऽतिपा॒दाद॑बिभयुः। तं छन्दो॑भिरदृꣳह॒न्धृत्यैँ। दे॒वा वा आ॑दि॒त्यस्य॑ सुव॒र्गस्य॑ लो॒कस्य॑। अवा॑चोऽवपा॒दाद॑बिभयुः। तं प॒ञ्चभी॑ र॒श्मिभि॒रुद॑वयन्। तस्मा॑देकवि॒ꣳशेऽह॒न् पञ्च॑ दिवाकी॒र्त्या॑नि क्रियन्ते। र॒श्मयो॒ वै दि॑वाकी॒र्त्या॑नि। ये गा॑य॒त्रे। ते गा॑य॒त्रीषूत्त॑रयो॒ः पव॑मानयोः॥

म॒हादि॑वाकीर्त्य॒ꣳ होतु॑ः पृष्ठम्। वि॒क॒र्णं ब्र॑ह्मसा॒मम्। भा॒सौँऽग्निष्टो॒मः। अथै॒तानि॒ परा॑णि। परै॒र्वै दे॒वा आ॑दि॒त्यꣳ सु॑व॒र्गं लो॒कम॑पारयन्। यदपा॑रयन्। तत्परा॑णां पर॒त्वम्। पा॒रय॑न्त्येन॒ं परा॑णि। य ए॒वं वेद॑। अथै॒तानि॒ स्परा॑णि। स्परै॒र्वै दे॒वा आ॑दि॒त्यꣳ सु॑व॒र्गं लो॒कम॑स्पारयन्। यदस्पा॑रयन्। तत्स्परा॑णाꣳ स्पर॒त्वम्। स्पा॒रय॑न्त्येन॒ꣳ स्परा॑णि। य ए॒वं वेद॑॥

अप्रतिष्ठां वा एते गच्छन्ति

तै॰ब्रा॰ १.२.५

अप्रतिष्ठां वा एते गच्छन्ति। येषां संवत्सरेऽनाप्तेऽथ। एकादशिन्याप्यते। वैष्णवं वामनमालभन्ते। यज्ञो वै विष्णुः। यज्ञमेवालभन्ते प्रतिष्ठित्यै। ऐन्द्राग्नमालभन्ते। इन्द्राग्नी वै देवानामयातयामानौ। ये एव देवते अयातयाम्नी। ते एवालभन्ते॥

वैश्वदेवमालभन्ते। देवता एवावरुन्धते। द्यावापृथिव्यां धेनुमालभन्ते। द्यावापृथिव्योरेव प्रति तिष्ठन्ति। वायव्यं वत्समालभन्ते। वायुरेवैभ्यो यथाऽऽयतनाद्देवता अवरुन्धे। आदित्यामविं वशामालभन्ते। इयं वा अदितिः। अस्यामेव प्रति तिष्ठन्ति। मैत्रावरुणीमालभन्ते॥

मित्रेणैव यज्ञस्य स्विष्टं शमयन्ति। वरुणेन दुरिष्टम्। प्राजापत्यं तूपरं महाव्रत आलभन्ते। प्राजापत्योऽतिग्राह्यो गृह्यते। अहरेव रूपेण समर्धयन्ति। अथो अह्न एवैष बलिर्ह्रियते। आग्नेयमालभन्ते प्रति प्रज्ञात्यै। अजपेत्वान् वा एते पूर्वैर्मासैरवरुन्धते। यदेते गव्याः पशव आलभ्यन्ते। उभयेषां पशूनामवरुध्यै॥

यदतिरिक्तामेकादशिनीमालभेरन्। अप्रियं भ्रातृव्यमभ्यतिरिच्येत। यद् द्वौद्वौ पशू समस्येयुः। कनीय आयुः कुर्वीरन्। यदेते ब्राह्मणवन्तः पशव आलभ्यन्ते। नाप्रियं भ्रातृव्यमभ्यतिरिच्यते। न कनीय आयुः कुर्वते॥

प्रजापतिः प्रजाः सृष्ट्वा

तै॰ब्रा॰ १.२.६

प्र॒जाप॑तिः प्र॒जाः सृ॒ष्ट्वा वृ॒त्तो॑ऽशयत्। तं दे॒वा भू॒ताना॒ꣳ रसं॒ तेज॑ः सं॒भृत्य॑। तेनै॑नमभिषज्यन्। म॒हान॑वव॒र्तीति॑। तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्। म॒हद् व्र॒तमिति॑। तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्। म॒ह॒तो व्र॒तमिति॑। तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्। प॒ञ्च॒वि॒ꣳशः स्तोमो॑ भवति॥

चतु॑र्वि॒ꣳशत्यर्धमासः संवत्स॒रः। यद्वा ए॒तस्मि॑न् संवत्स॒रेऽधि॒ प्राजा॑यत। तदन्नं॑ पञ्चवि॒ꣳशम॑भवत्। म॒ध्य॒तः क्रि॑यते। म॒ध्य॒तो ह्यन्न॑मशि॒तं धि॒नोति॑। अथो॑ मध्य॒त ए॒व प्र॒जाना॒मूर्ग्धी॑यते। अथ॒ यद्वा इ॒दम॑न्त॒तः क्रि॒यते॑। तस्मा॑दु॒द॒न्ते प्र॒जाः समे॑धन्ते। अ॒न्त॒तः क्रि॑यते प्र॒जन॑नायै॒व। त्रि॒वृच्छि॒रो॑ भवति॥

त्रे॒धा॒ वि॒हि॒तꣳ हि शिर॑ः। लोम॑ छ॒वीरस्थि॑। परा॑चा स्तुवन्ति। तस्मा॒त्तत्स॒दृग॒ेव। न मेद्य॒तोऽनु॑मेद्यति। न कृश्य॒तोऽनु॑ कृश्यति। प॒ञ्च॒द॒शोऽ॑न्यः प॒क्षो भ॑वति। स॒प्त॒द॒शोऽ॑न्यः। तस्मा॒द् वया॑ꣳस्यन्यत॒रम॒र्धम॒भि प॒र्याव॑र्तन्ते। अ॒न्य॒त॒रतो॒ हि तद्वरी॑यः क्रि॒यते॑॥

प॒ञ्च॒वि॒ꣳश आ॒त्मा भ॑वति। तस्मा॑न्मध्य॒तः प॒शवो॒ वरि॑ष्ठाः। ए॒क॒वि॒ꣳशं पुच्छ॑म्। द्विपदा॑सु स्तुवन्ति॒ प्रति॑ष्ठित्यै। सर्वे॑ण स॒ह स्तु॑वन्ति। सर्वे॑ण॒ ह्या॑त्मना॑ऽऽत्म॒न्वी। स॒होत्पत॑न्ति। एकै॑का॒मुच्छि॑ꣳषन्ति। आ॒त्मन् ह्यङ्गा॑नि ब॒द्धानि॑। न वा ए॒ते॒न सर्व॒ः पुरु॑षः॥

यदित इतो लोमानि दतो नखान्। परिमादः क्रियन्ते। तान्येव तेन प्रत्युप्यन्ते। औदुम्बरस्तल्पो भवति। ऊर्ग्वा अन्नमुदुम्बरः। ऊर्ज एवान्नाद्यस्यावरुध्यै। यस्य तल्पसद्यमनभिजितꣳ स्यात्। स देवानाꣳ साम्यक्षे। तल्पसद्यमभिजयानीति तल्पमारुह्योद्गायेत्। तल्पसद्यमेवाभिजयति॥

यस्य तल्पसद्यमभिजितꣳ स्यात्। स देवानाꣳ साम्यक्षे। तल्पसद्यं मा पराजेषीति तल्पमारुह्योद्गायेत्। न तल्पसद्यं पराजयते। प्लेङ्खे शꣳसति। महो वै प्लेङ्खः। मह स एवान्नाद्यस्यावरुद्ध्यै। देवासुराः संयत्ता आसन्। त आदित्ये व्यायच्छन्त। तं देवाः समजयन्॥

ब्राह्मणश्च शूद्रश्च चर्मकर्ते व्यायच्छेते। दैव्यो वै वर्णो ब्राह्मणः। असुर्यः शूद्रः। इमेऽरात्सुरिमे सुभूतमक्रन्नित्यन्यतरो ब्रूयात्। इम उद्वासीकारिण इमे दुर्भूतमक्रन्नित्यन्यतरः। यदेवैषाꣳ सुकृतं या राद्धिः। तदन्यतरोऽभिश्रीणाति। यदेवैषां दुष्कृतं याऽराद्धिः। तदन्यतरोऽपहन्ति। ब्राह्मणः सं जयति। अमुमेवादित्यं भ्रातृव्यस्य सं विन्दन्ते॥

इन्द्रो वृत्रं हत्वा (परि०)

तै०ब्रा० १.३.१०

इन्द्रो वृत्रꣳ हत्वा। असुरान् पराभाव्य। सोऽमावास्यां प्रत्यागच्छत्। ते पितरः पूर्वेद्युरागच्छन्। पितॄन् यज्ञोऽगच्छत्। तं देवाः पुनरयाचन्त। तमेभ्यो न पुनरददुः। तेँऽब्रुवन् वरं वृणामहै। अथ वः पुनर्दास्यामः। अस्मभ्यमेव पूर्वेद्युः क्रियाता इति॥

तमेँभ्यः पुनंरददुः। तस्मांत्पितृभ्यंः पूर्वेद्युः क्रियते। यत्पितृभ्यंः पूर्वेद्युः करोतिं। पितृभ्यं एव तद्यज्ञं निष्क्रीय यजंमानः प्रतंनुते। सोमांय पितृपींताय स्वधा नम इत्यांह। पितुरेवाधिं सोमपीथमवं रुन्धे। न हि पिता प्रमीयंमाण आहैष सोंमपीथ इतिं। इन्द्रियं वै सोंमपीथः। इन्द्रियमेव सोंमपीथमवं रुन्धे। तेनैन्द्रियेणं द्वितीयां जायामभ्यंश्नुते॥

एतद्वै ब्राह्मणं पुरा वांजश्रवसा विदामंक्रन्। तस्मात्ते द्वे द्वे जाये अभ्यांक्षत। य एवं वेदं। अभि द्वितीयां जायामंश्नुते। अग्नये कव्यवाहंनाय स्वधा नम इत्यांह। य एव पिंतृणामग्निः। तं प्रींणाति। तिस्र आहुंतीर्जुहोति। त्रिर्निदंधाति। षट् संपंद्यन्ते॥

षङ्वा ऋतवंः। ऋतूनेव प्रींणाति। तूष्णीं मेक्षंणमादंधाति। अस्तिं वा हि षष्ठ ऋतुर्न वां। देवान् वै पितॄन् प्रीतान्। मनुष्यांः पितरोऽनु प्रपिंपते। तिस्र आहुंतीर्जुहोति। त्रिर्निदंधाति। षट् संपंद्यन्ते। षङ्वा ऋतवंः॥

ऋतवः खलु वै देवाः पितरंः। ऋतूनेव देवान् पितॄन् प्रींणाति। तान् प्रीतान्। मनुष्यांः पितरोऽनु प्रपिंपते। सकृदाच्छिन्नं बर्हिर्भवति। सकृदिंव हि पितरंः। त्रिर्निदंधाति। तृतीये वा इतो लोके पितरंः। तानेव प्रींणाति। पराङावर्तते॥

ह्लीका हि पितरंः। ओष्मणों व्यावृत उपांस्ते। ऊष्मभांगा हि पितरंः। ब्रह्मवादिनो वदन्ति। प्राश्यां३ न प्राश्या३मितिं।

यत्प्राँश्नीयात्। जन्यमन्नंमद्यात्। प्रमायुंकः स्यात्। यन्न प्राँश्नीयात्। अहंविः स्यात्॥

पितृभ्य आवृंश्च्येत। अवघ्रेयंमेव। तन्नेव प्राशिंतं नेवाप्रांशितम्। वीरं वा वै पितरंः प्रयन्तो हरंन्ति। वीरं वा ददति। दशां चिंनत्ति। हरंणभागा हि पितरंः। पितृनेव निरवंदयते। उत्तंर आयुंषि लोमं छिन्दीत। पितृणाः ह्येतर्हि नेदींयः॥

नमंस्करोति। नमस्कारो हि पिंतृणाम्। नमों वः पितरो रसांय। नमों वः पितरः शुष्मांय। नमों वः पितरो जीवायं। नमों वः पितरः स्वधायैं। नमों वः पितरो मन्यवें। नमों वः पितरो घोरायं। पितंरो नमों वः। य एतस्मिंन् लोके स्थ॥

युष्माङ्स्ते नुं। यैँऽस्मिन् लोके। मां ते नुं। य एतस्मिंन् लोके स्थ। यूयं तेषां वसिंष्ठा भूयास्त। यैँऽस्मिन् लोके। अहं तेषां वसिंष्ठो भूयासमित्यांह। वसिंष्ठः समानानां भवति। य एवं विद्वान् पितृभ्यंः करोतिं। एष वै मंनुष्यांणां यज्ञः॥

देवानां वा इतंरे यज्ञाः। तेन वा एतत्पिंतृलोके चंरति। यत्पितृभ्यंः करोतिं। स ईश्वरः प्रमेंतोः। प्राजापत्ययर्चा पुनरैतिं। यज्ञो वै प्रजापंतिः। यज्ञेनैव सह पुनरैतिं। न प्रमायुंको भवति। पितृलोके वा एतद्यजंमानश्चरति। यत्पितृभ्यंः करोति। स ईश्वर आर्तिमार्तोः। प्रजापंतिस्त्वावैनं तत उन्नेंतुमर्हतीत्यांहुः। यत्प्रांजापत्ययर्चा पुनरैतिं। प्रजापंतिरेवैनं तत उन्नंयति। नार्तिमार्च्छंति यजंमानः॥

वैश्वेदेवेन वै प्रजापतिः

तै॰ब्रा॰ १.६.८

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत। ता वरुणप्रघासैर्वरुणपाशादमुञ्चत्। साकमेधैः प्रत्यस्थापयत्। त्र्यम्बकै रुद्रं निरवादयत। पितृयज्ञेन सुवर्गं लोकमगमयत्। यद्वैश्वदेवेन यजते। प्रजा एव तद्यजमानः सृजते। ता वरुणप्रघासैर्वरुणपाशान्मुञ्चति। साकमेधैः प्रतिष्ठापयति। त्र्यम्बकै रुद्रं निरवदयते॥

पितृयज्ञेन सुवर्गं लोकं गमयति। दक्षिणतः प्राचीनावीती निर्वपति। दक्षिणावृद्धि पितृणाम्। अनादृत्य तत्। उत्तरत एवोपवीय निर्वपेत्। उभये हि देवाश्च पितरश्चेज्यन्तेँ। अथो यदेव दक्षिणार्धेऽधि श्रयति। तेन दक्षिणावृत्। सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति। संवत्सरो वै सोमः पितृमान्॥

संवत्सरमेव प्रीणाति। पितृभ्यो बर्हिषद्भ्यो धानाः। मासा वै पितरो बर्हिषदः। मासानेव प्रीणाति। यस्मिन्वा ऋतौ पुरुषः प्रमीयते। सोँऽस्यामुष्मिन् ꣳलोके भवति। बहुरूपा धाना भवन्ति। अहोरात्राणामभिजित्यै। पितृभ्योँऽग्निष्वात् तेभ्यो मन्थम्। अर्धमासा वै पितरोँऽग्निष्वात्ताः॥

अर्धमासानेव प्रीणाति। अभिवान्यायै दुग्धे भवति। सा हि पितृदेवत्यं दुहे। यत्पूर्णम्। तन्मनुष्याणाम्। उपर्यर्धो देवानाँम्। अर्धः पितृणाम्। अर्ध उपमन्थति। अर्धो हि पितृणाम्। एकयोपमन्थति॥

एका हि पितृणाम्। दक्षिणोपमन्थति। दक्षिणावृद्धि पितृणाम्। अनारभ्योपमन्थति। तद्धि पितॄन् गच्छति। इमां दिशं वेदिमुद्धन्ति। उभये हि देवाश्च पितरश्चेज्यन्तैँ। चतुः स्रक्तिर्भवति। सर्वा ह्यनु दिशः पितरः। अखाता भवति॥

खाता हि देवानाँम्। मध्यतौऽग्निराधीयते। अन्ततो हि देवानामाधीयतैँ। वर्षीयानिध्म इध्माद्भवति व्यावृत्त्यै। परि श्रयति। अन्तर्हितो हि पितृलोको मनुष्यलोकात्। यत्परुषि दिनम्। तद्देवानाम्। यदन्तरा। तन्मनुष्याणाम्॥

यत्समूलम्। तत्पितृणाम्। समूलं बर्हिर्भवति व्यावृत्त्यै। दक्षिणा स्तृणाति। दक्षिणावृद्धि पितृणाम्। त्रिः पर्येति। तृतीये वा इतो लोके पितरः। तानेव प्रीणाति। त्रिः पुनः पर्येति। षट् सं पद्यन्ते॥

षड्वा ऋतवः। ऋतूनेव प्रीणाति। यत्प्रस्तरं यजुषा गृह्णीयात्। प्रमायुको यजमानः स्यात्। यन्न गृह्णीयात्। अनायतनः स्याँत्। तूष्णीमेव न्यस्येत्। न प्रमायुको भवति। नानायतनः। यत् त्रीन् परिधीन् परिदध्यात्॥

मृत्युना यजमानं परि गृह्णीयात्। यन्न परि दध्यात्। रक्षांꣳसि यज्ञꣳ हन्युः। द्वौ परिधी परिदधाति। रक्षसामपहत्यै। अथो मृत्योरेव यजमानमुत्सृजति। यत् त्रीणि त्रीणि हवीꣳष्युदाहरेयुः। त्रयस्त्रय एषाꣳ साकं प्रमीयेरन्। एकैकमनूचीनाँन्युदाहरन्ति। एकैक एवैषाँमन्वञ्चः प्रमीयते। कशिपु कशिपव्याय।

उपबर्हणमुपबर्हण्याय। आञ्जनमाञ्जन्याय। अभ्यञ्जनमभ्यञ्जन्याय। यथाभागमेवैनान् प्रीणाति॥

अग्नये देवेभ्यः

तै॰ब्रा॰ १.६.९

अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहीत्याह। उभये हि देवाश्च पितरश्चेज्यन्ते। एकामन्वाह। एका हि पितृणाम्। त्रिरन्वाह। त्रिर्हि देवानाम्। आघारावाघारयति। यज्ञपरुषोरनन्तरित्यै। नार्षेयं वृणीते। न होतारम्॥

यदार्षेयं वृणीत। यद्धोतारम्। प्रमायुको यजमानः स्यात्। प्रमायुको होता। तस्मान्न वृणीते। यजमानस्य होतुर्गोपीथाय। अप बर्हिषः प्रयाजान् यजति। प्रजा वै बर्हिः। प्रजा एव मृत्योरुत्सृजति। आज्यभागौ यजति॥

यज्ञस्यैव चक्षुषी नान्तरेति। प्राचीनावीती सोमं यजति। पितृदेवत्या हि। एषाऽहुतीः। पञ्चकृत्वोऽव द्यति। पञ्च ह्येता देवताः। द्वे पुरोऽनुवाक्ये। याज्या देवता वषट्कारः। ता एव प्रीणाति। सन्ततमव द्यति॥

ऋतूना॰ संतत्यै। प्रैवेभ्यः पूर्वया पुरोऽनुवाक्ययाऽऽह। प्रणयति द्वितीयया। गमयति याज्यया। तृतीये वा इतो लोके पितरः। अह्न एवैनां पूर्वया पुरोऽनुवाक्ययाऽत्यानयति। रात्रियै द्वितीयया। ऐवैनान् याज्यया गमयति। दक्षिणतोऽवदाय। उदङ्ङति क्रामति व्यावृत्त्यै॥

आ स्व॒धेत्याश्रा॑वयति। अस्तु॑ स्व॒धेति॑ प्र॒त्याश्रा॑वयति। स्व॒धा नम॒ इति॒ वष॑ट्करोति। स्व॒धा॒का॒रो हि पि॑तृ॒णाम्। सोम॒मग्रे॑ यजति। सोम॑प्रयाजा॒ हि पि॒तर॑ः। सोम॑॑ पितृ॒मन्त॑ं यजति। सं॒व॒त्स॒रो वै सोम॑ः पितृ॒मान्। सं॒व॒त्स॒र॒मे॒व तद्य॑जति। पि॒तॄन् ब॑र्हि॒षदो॑ यजति॥

ये वै यज्वा॑नः। ते पि॒तरो॑ बर्हि॒षद॑ः। ताने॒व तद्य॑जति। पि॒तॄन॑ग्निष्वा॒त्तान् य॑जति। ये वा अय॑ज्वानो गृहमे॒धिन॑ः। ते पि॒तरो॑ऽग्निष्वा॒त्ताः। ताने॒व तद्य॑जति। अ॒ग्निं क॑व्य॒वाह॑नं यजति। य ए॒व पि॑तृ॒णाम॒ग्निः। तमे॒व तद्य॑जति॥

अथो॒ यथा॒ऽग्निꣳ स्वि॑ष्ट॒कृत॒ं यज॑ति। ता॒दृगे॒व तत्। ए॒तत्ते॑ तत॒ ये च॒ त्वामन्विति॑ ति॒सृषु॑ स्र॒क्तीषु॒ निद॑धाति। तस्मा॒दा तृ॒तीया॒त् पुरु॑षा॒न्नाम॒ न गृ॑ह्णन्ति। ए॒ताव॑न्तो॒ हीज्यन्ते॑। अत्र॑ पितरो यथाभा॒गं म॑न्दध्व॒मित्या॑ह। ह्रीका॒ हि पि॒तर॑ः। उद॑ञ्चो॒ निष्क्रा॑मन्ति। ए॒षा वै म॑नु॒ष्या॑णा॒ं दिक्। स्वामे॒व तद्दि॒शम॒नु॒ निष्क्रा॑मन्ति॥

आ॒ह॒व॒नीय॒मुप॑तिष्ठन्ते। न्ये॑वास्मै॒ तद्ध्नु॑वते। यत्स॒त्या॑हव॒नीये॑। अथा॒न्यत्र॒ चर॑न्ति। आत॑मि॑तो॒रुप॑तिष्ठन्ते। अ॒ग्निमे॒वोप॑द्र॒ष्टार॑ं कृ॒त्वा। पि॒तॄन्नि॒रव॑दयन्ते। अन्त॒ं वा ए॒ते प्रा॒णाना॑ं गच्छन्ति। य आत॑मि॑तोरुप॒तिष्ठ॑न्ते। सु॒सं॒दृश॑ं त्वा व॒यमित्या॑ह॥

प्रा॒णो वै सु॑सं॒दृक्। प्रा॒णमे॒वात्मन्द॑धते। योजा॒न्विं॑न्द्र ते॒ हरी॒ इत्या॑ह। प्रा॒णमे॒व पुन॑रयुक्त। अक्ष॒न्नमी॑मदन्त॒ हीति॒ गार्ह॑पत्य॒मुप॑ तिष्ठन्ते। अक्ष॒न्नमी॑मद॒न्ताथ॒ त्वोप॑तिष्ठामह॒ इति॒ वावैतदा॑ह। अमी॑मदन्त पि॒तर॑ः सो॒म्या इत्य॒भि प्रप॑द्यन्ते। अमी॑मदन्त

पि॒तरो॑ऽथं त्वा॒ऽभि प्रप॑द्यामह॒ इति॒ वावैतदा॑ह। अ॒पः परि॑षिञ्चति। मा॒र्जय॑त्ये॒वैना॑न्॥

अथो॑ त॒र्पय॑त्ये॒व। तृप्य॑ति प्र॒जया॑ प॒शुभिः॑। य ए॒वं वेद॑। अप॑ बर्हिषावनूया॒जौ य॑जति। प्र॒जा वै ब॒र्हिः। प्र॒जा ए॒व मृ॒त्योरुत्सृ॑जति। च॒तुरः॑ प्रया॒जान् य॑जति। द्वाव॑नूया॒जौ। षट् सं॑प॑द्यन्ते। षड्वा ऋ॒तवः॑॥

ऋ॒तूने॒व प्री॑णाति। न पत्न्यन्वा॑स्ते। न सं॑या॑जयन्ति। यत्पत्न्य॒न्वासी॑त। यत्सं॑या॒जये॑युः। प्र॒मायु॑का स्यात्। तस्मा॒न्नान्वा॑स्ते। न सं॑या॑जयन्ति। पत्नि॑यै गोपी॒थाय॑॥

उशन्तस्त्वा हवामहे

तै०ब्रा० २.६.१६

उ॒शन्त॑स्त्वा हवामह॒ आ नो॑ अग्ने सुके॒तुना॑। त्व॑ꣳ सो॑म म॒हे भग॒॑ त्व॑ꣳ सो॑म॒ प्रचि॑कितो मनी॒षा। त्वया॒ हि नः॑ पि॒तरः॑ सोम॒ पूर्वे॒ त्व॑ꣳ सो॑म पि॒तृभिः॑ संवि॒दानः॑। बर्हि॑षदः पितर॒ आऽहं पि॒तॄन्। उप॑हूताः पि॒तरोऽग्नि॑ष्वात्ताः पितरः। अ॒ग्नि॒ष्वा॒त्तानृ॑तु॒मतो॑ हवामहे। नरा॒शꣳसे॑ सोमपी॒थं य आ॒शुः। ते नो॒ अर्व॑न्तः सु॒हवा॑ भवन्तु। शं नो॑ भवन्तु द्वि॒पदे॒ शं चतु॑ष्पदे। ये अ॑ग्निष्वा॒त्ता येऽन॑ग्निष्वात्ताः॥

अ॒ꣳहो॒मुचः॑ पि॒तरः॑ सो॒म्यासः॑। परेऽव॑रे॒ऽमृतासो॒ भव॑न्तः। अधि॑ब्रुवन्तु॒ ते अ॑वन्त्व॒स्मान्। वा॒न्या॑यै दु॒ग्धे जु॒षमा॑णाः कर॒म्भम्। उ॒दीरा॑णा॒ अव॑रे॒ परे॑ च। अ॒ग्नि॒ष्वा॒त्ता ऋ॒तुभिः॑ संवि॒दानाः। इन्द्र॑वन्तो ह॒विरि॒दं जु॑षन्ताम्। यद॑ग्ने कव्यवाहन॒ त्वम॑ग्न ईडि॒तो

जा॑तवेदः। मात॑लीक॒व्यैः। ये ता॑तृ॒पुर्दे॑वत्रा जेह॑मानाः। हो॒त्रा॒वृध॒ः स्तोम॑तष्टासो अ॒र्कैः। आऽग्ने॑ याहि सुवि॒दत्रे॑भिर॒र्वाङ्। स॒त्यैः क॒व्यैः पि॒तृभि॑र्घर्म॒सद्भि॑ः। ह॒व्य॒वाह॑म॒जर॑ं पुरुप्रि॒यम्। अ॒ग्निं घृ॒तेन॑ ह॒विषा॑ सप॒र्यन्। उपा॑सदं कव्य॒वाह॑ं पितृ॒णाम्। स न॑ः प्र॒जां वी॒रव॑ती॒ँ समृ॑ण्वतु॥

अयं वाव यः पवते

तै॰ब्रा॰ ३.११.७

अ॒यं वाव यः पव॑ते। सोऽ॑ग्निर्ना॑चिके॒तः। स यत्प्राङ् पव॑ते। तद॑स्य॒ शिर॑ः। अथ॒ यद्द॑क्षि॒णा। स दक्षि॑णः प॒क्षः। अथ॒ यत्प्र॒त्यक्। तत्पुच्छ॑म्। यदुद॑ङ्। स उत्त॑रः प॒क्षः॥

अथ॒ यत्सं॒वाति॑। तद॑स्य स॒मञ्च॑नं च प्र॒सार॑णं च। अथो॑ स॒म्पद॒वास्य॒ सा। सँ ह॒ वा अ॑स्मै॒ सकाम॑ः पद्यते। यत्का॑मो॒ यज॑ते। योऽ॑ग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑। यो ह॒ वा अ॒ग्नेर्ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठां वेद॑। आ॒यतन॑वान् भवति। गच्छ॑ति प्रति॒ष्ठाम्॥

हिर॑ण्य॒ं वा अ॒ग्नेर्ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठा। य ए॒वं वेद॑। आ॒यत॑नवान् भवति। गच्छ॑ति प्रति॒ष्ठाम्। यो ह॒ वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑र॒ं वेद॑। सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति। हिर॑ण्य॒ं वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑रम्। य ए॒वं वेद॑। सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति। अथो॒ यथा॑ रु॒क्म उत्त॑प्तो भा॒य्यात्॥

ए॒वमे॒व स तेज॑सा॒ यश॑सा। अ॒स्मिꣳश्च॑ लो॒के॑ऽमुष्मिꣳ॑श्च भाति। उ॒रवो॑ ह॒ वै नामै॒ते लो॒काः। येऽव॑रेणादि॒त्यम्। अथ॑ है॒ते वरी॑याꣳसो लो॒काः। ये परे॑णादि॒त्यम्। अन्त॑वन्तꣳ ह॒ वा ए॒ष क्ष॒य्यं लो॒कं ज॑यति। योऽव॑रेणादि॒त्यम्। अथ॑ है॒षो॑ऽन॒न्तम॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति। यः परे॑णादि॒त्यम्॥

अ॒न॒न्तꣳ ह॒ वा अ॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति। यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑। अथो॒ यथा॒ रथे॒ तिष्ठ॒न् पक्ष॑सी पर्या॒वर्त॑माने प्र॒त्यपे॑क्षते। ए॒वम॑होरा॒त्रे प्र॒त्यपे॑क्षते। नास्या॑होरा॒त्रे लो॒कमा॑प्नुतः। यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑॥

उशन् ह वै

तै॰ब्रा॰ ३.११.८

उ॒शन् ह॒ वै वा॑जश्र॒वसः॑ स॑र्ववे॒दसं॑ द॑दौ। तस्य॑ ह॒ नचि॑केता॒ नाम॑ पु॒त्र आ॑स। तꣳ ह॑ कुमा॒रꣳ सन्त॑म्। दक्षि॑णासु नी॒यमा॑नासु श्र॒द्धा वि॑वेश। स हो॑वाच। तत॒ कस्मै॒ मां दा॑स्य॒सीति॑। द्वि॒तीय॑ं तृ॒तीय॑म्। तꣳ ह॒ परी॑त उवाच। मृ॒त्यवे॑ त्वा ददा॒मीति॑। तꣳ ह॒ स्मोत्थि॑तं॒ वाग॒भिव॑दति॥

गौत॑म कुमा॒रमिति॑। स हो॑वाच। परे॑हि मृ॒त्योर्गृ॒हान्। मृ॒त्यवे॒ वै त्वा॑ऽदा॒मिति॑। तं वै प्र॒वस॑न्तं ग॒न्तासीति॑ होवाच। तस्य॑ स्म ति॒स्रो रात्री॒रना॑श्वान्गृहे व॑सतात्। स यदि॑ त्वा पृच्छेत्। कुमा॑र॒ कति॒ रात्री॑रवात्सी॒रिति॑। ति॒स्र इति॒ प्रति॑ ब्रूतात्। किं प्र॑थ॒माꣳ रात्रि॑माश्ना॒ इति॑॥

प्र॒जां त॒ इति॑। किं द्वि॒तीया॒मिति॑। प॒शूꣳस्त॒ इति॑। किं तृ॒तीया॒मिति॑। सा॒धुकृ॒त्यां त॒ इति॑। तं वै प्र॒वस॑न्तं जगाम। तस्य॑ ह ति॒स्रो रा॒त्रीरनाँ॑श्वान्गृ॒ह उ॑वास। तमा॒गत्य॑ पप्रच्छ। कुमा॑र॒ कति॒ रात्री॑रवात्सी॒रिति॑। ति॒स्र इति॒ प्रत्यु॑वाच॥

किं प्र॑थ॒मा॑ꣳ रात्रि॑माश्ना॒ इति॑। प्र॒जां त॒ इति॑। किं द्वि॒तीया॒मिति॑। प॒शूꣳस्त॒ इति॑। किं तृ॒तीया॒मिति॑। सा॒धु॒कृ॒त्यां त॒ इति॑। नम॑स्ते अस्तु भगव॒ इति॑ होवाच। वर॑ं वृणी॒ष्वेति॑। पि॒तर॑मे॒व जीव॑न्नया॒नीति॑। द्वि॒तीय॑ं वृणी॒ष्वेति॑॥

इ॒ष्टा॒पू॒र्तयो॒र्मे क्षिति॑ं ब्रू॒हीति॑ होवाच। तस्मै॑ है॒तम॒ग्निं ना॑चिके॒तमु॑वाच। तता॒ वै तस्यैँ॑ष्टापू॒र्ते नाक्षी॑येते। नास्यैँ॑ष्टापू॒र्ते क्षी॑येते। यौँऽग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑। तृ॒तीय॑ं वृणी॒ष्वेति॑। पु॒न॒र्मृ॒त्योर्मेऽप॑जितिं ब्रू॒हीति॑ होवाच। तस्मै॑ है॒तम॒ग्निं ना॑चिके॒तमु॑वाच। तता॒ वै सोप॑ पुनर्मृ॒त्युम॑जयत्॥

अप॑ पुनर्मृ॒त्युं ज॑यति। यौँऽग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑। प्र॒जाप॑ति॒र्वै प्र॒जाका॑म॒स्तपो॑तप्यत। स हिर॑ण्य॒मुदाँ॑स्यत्। तद॒ग्नौ प्रास्य॑त्। तद॑स्मै॒ नाच्छ॑दयत्। तद् द्वि॒तीयं प्रास्य॑त्। तद॑स्मै॒ नैवाच्छ॑दयत्। तत्तृ॒तीय॒ं प्रास्य॑त्॥

तद॑स्मै॒ नैवाच्छ॑दयत्। तदा॒त्मन्ने॒व हृ॑द॒य्यैँऽग्नौ वैँ॑श्वान॒रे प्रास्य॑त्। तद॑स्मा अच्छदयत्। तस्मा॒द्धिर॑ण्य॒ं कनि॑ष्ठ॒ं धना॑नाम्। भु॒ञ्जत्प्रि॒यत॑मम्। हृ॒द॒य॒जꣳ हि। स वै तमे॒व नावि॑न्दत्। यस्मै॒ तां

दक्षि॑णाम॒नेष्यत्। ता॒ᳪ स्वायै॒व हस्ता॑य॒ दक्षि॑णायानयत्। तां प्रत्य॑गृह्णात्॥

दक्षा॑य त्वा॒ दक्षि॑णा॒ं प्रति॑गृह्णा॒मीति॑। सो॑ऽदक्षत॒ दक्षि॑णां प्रति॒गृह्य॑। दक्ष॑ते ह॒ वै दक्षि॑णां प्रति॒गृह्य॑। य ए॒वं वेद॑। ए॒तद्ध॑ स्म॒ वै तद्वि॒द्वाᳪसो॑ वाजश्रव॒सा गोत॑माः। अप्य॑नूदे॒श्यां दक्षि॑णा॒ं प्रति॑गृह्णन्ति। उ॒भये॑न व॒यं द॑क्षिष्यामह ए॒व दक्षि॑णां प्रति॒गृह्येति॑। ते॑ऽदक्षन्त॒ दक्षि॑णां प्रति॒गृह्य॑। दक्ष॑ते ह॒ वै दक्षि॑णां प्रति॒गृह्य॑। य ए॒वं वेद॑। प्रहा॒न्यं ब्ली॑नाति॥

तं हैतमेके

तै॰ब्रा॰ ३.११.९

तᳪ है॒तमेके॑ पशु॒बन्ध ए॒वोत्त॑रवे॒द्यां चि॑न्वते। उ॒त्त॒र॒वे॒दि सं॑मित ए॒षौं॑ऽग्निरिति॒ वद॑न्तः। तन्न तथा॑ कु॒र्यात्। ए॒तम॒ग्निं कामे॑न॒ व्य॑र्द्धयेत्। स ए॑न॒ं कामे॑न॒ व्यृ॑द्धः। कामे॑न॒ व्य॑र्द्धयेत्। सौ॒म्ये वावैनं॑मध्व॒रे चि॑न्वी॒त। यत्र॑ वा॒ भूयि॑ष्ठा॒ आहु॑तयो हू॒येर॑न्। ए॒तम॒ग्निं कामे॑न॒ समर्॑द्धयति। स ए॑न॒ं कामे॑न॒ समृ॑द्धः॥

कामे॑न॒ समर्॑द्धयति। अथ॑ हैनं पु॒रर्ष॑यः। उ॒त्त॒र॒वे॒द्याम॒ेव स॒त्रिय॑मचिन्वत। ततो॒ वै ते॑ऽवि॑न्दन्त प्र॒जाम्। अ॒भि स्व॒र्गं लो॒कम॑जयन्। वि॒न्दत॑ ए॒व प्र॒जाम्। अ॒भि स्व॒र्गं लो॒कं ज॑यति। यौं॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते। य उ॑ चैनमे॒वं वेद॑। अथ॑ हैनं वा॒युर्ऋद्धि॑कामः॥

य॒था॒न्यु॒त्तमे॒वोप॑दधे। ततो॒ वै स ए॒तामृद्धिं॑मार्ध्नोत्। यामि॒दं वा॒यु॒र्ऋ॒द्धः। ए॒तामृद्धिं॑मृध्नोति। यामि॒दं वा॒यु॒र्ऋ॒द्धः। यौँऽग्निं नाचिके॒तं चिं॑नु॒ते। य उं चैनमे॒वं वेदं। अथं हैनं गोब॒लो वार्ष्णः प॒शुका॑मः। पाङ्क्त॑मे॒व चिं॑क्ये। पञ्चं पु॒रस्ताँत्॥

पञ्चं दक्षि॒णतः। पञ्चं प॒श्चात्। पञ्चोत्त॑र॒तः। एका॒ मध्यैँ। ततो॒ वै स स॒हस्रं॑ प॒शून् प्राप्नौँत्। प्र स॒हस्रं॑ प॒शूनाँप्नोति। यौँऽग्निं नाचिके॒तं चिं॑नु॒ते। य उं चैनमे॒वं वेदं। अथं हैनं प्र॒जाप॑ति॒र्ज्यैष्ठ्यं॑कामो॒ यश॑स्कामः प्र॒जन॑नकामः। त्रि॒वृत॑मे॒व चिं॑क्ये॥

स॒प्त पु॒रस्ताँत्। ति॒स्रो दं॑क्षि॒ण॒तः। स॒प्त प॒श्चात्। ति॒स्र उं॑त्तर॒तः। एका॒ मध्यैँ। ततो॒ वै स प्र यशो॒ ज्यैष्ठ्यं॑माप्नोत्। ए॒तां प्र॒जा॑तिं॒ प्राजा॑यत। यामि॒दं प्र॒जाः प्र॒जाय॑न्ते। त्रि॒वृद्वै ज्यैष्ठ्यँम्। मा॒ता पि॒ता पु॒त्रः॥

त्रि॒वृत्प्र॒जन॑नम्। उ॒पस्थो॒ योनि॑र्मध्य॒मा। प्र यशो॒ ज्यैष्ठ्यं॑माप्नोति। ए॒तां प्र॒जा॑तिं॒ प्र॒जा॑यते। यामि॒दं प्र॒जाः प्र॒जाय॑न्ते। यौँऽग्निं नाचिके॒तं चिं॑नु॒ते। य उं चैनमे॒वं वेदं। अथं हैन॒मिन्द्रो॒ ज्यैष्ठ्यं॑कामः। ऊ॒र्ध्वा ए॒वोप॑दधे। ततो॒ वै स ज्यैष्ठ्यं॑मगच्छत्॥

ज्यैष्ठ्यं गच्छति। यौँऽग्निं नाचिके॒तं चिं॑नु॒ते। य उं चैनमे॒वं वेदं। अथं हैनम॒सावा॑दि॒त्यः स्व॒र्गका॑मः। प्राची॑रि॒वोप॑दधे। ततो॒ वै सो॑ऽभि स्व॒र्गं लो॒कम॑जयत्। अ॒भि स्व॒र्गं लो॒कं जं॑यति। यौँऽग्निं नाचिके॒तं चिं॑नु॒ते। य उं चैनमे॒वं वेदं। स यदी॒च्छेत्॥

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति। प्राङ्गाहोतुर्धिष्ण्यादुत्सर्पेत्। येयं प्रागाद्यशस्वती। सा मा प्रोर्णोतु। तेजसा यशसा ब्रह्मवर्चसेनेति। तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति। अथ यदीच्छेत्। भूयिष्ठं मे श्रद्दधीरन्। भूयिष्ठा दक्षिणा नयेयुरिति। दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्याहवनीये जुहुयात्॥

भूयिष्ठमेवास्मै श्रद्दधते। भूयिष्ठा दक्षिणा नयन्ति। पुरीषमुपधाय। चितिक्लृप्तिभिरभिमृश्य। अग्निं प्रणीयोपसमाधाय। चतस्र एता आहुतीर्जुहोति। त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपम्। अग्नाविष्णू इति वसोर्धारायाः। अन्नपत इत्यन्नहोमः। सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीः॥

यां प्रथमामिष्टकाम्

तै॰ब्रा॰ ३.११.१०

यां प्रथमामिष्टकामुपदधाति। इमं तया लोकमभि जयति। अथो या अस्मिन् लोके देवताः। तासाꣳ सायुज्यꣳ सलोकतामाप्नोति। यां द्वितीयामुपदधाति। अन्तरिक्षलोकं तयाऽभिजयति। अथो या अन्तरिक्षलोके देवताः। तासाꣳ सायुज्यꣳ सलोकतामाप्नोति। यां तृतीयामुपदधाति। अमुं तया लोकमभिजयति॥

अथो या अमुष्मिन् लोके देवताः। तासाꣳ सायुज्यꣳ सलोकतामाप्नोति। अथो या अमूरितरा अष्टादश। य एवामी उरवश्च वरीयाꣳसश्च लोकाः। तानेव ताभिरभिजयति। कामचारो ह वा अस्योरुषु च वरीयः सु च लोकेषु भवति। योऽग्निं

नाचिकेतं चिनुते। य उ चैनमेवं वेद। संवत्सरो वा
अग्निर्नाचिकेतः। तस्य वसन्तः शिरः॥

ग्रीष्मो दक्षिणः पक्षः। वर्षा उत्तरः। शरत्पुच्छम्। मासाः
कर्मकाराः। अहोरात्रे शतरुद्रीयम्। पर्जन्यो वसोर्धारा। यथा वै
पर्जन्यः सुवृष्टं वृष्ट्वा। प्रजाभ्यः सर्वान् कामान् संपूरयति। एवमेव
स तस्य सर्वान् कामान् संपूरयति। योऽग्निं नाचिकेतं चिनुते॥

य उ चैनमेवं वेद। संवत्सरो वा अग्निर्नाचिकेतः। तस्य वसन्तः
शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षाः पुच्छम्। शरदुत्तरः पक्षः।
हेमन्तो मध्यम्। पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्।
अहोरात्राणीष्टकाः। एष वाव सोऽग्निरग्निमयः पुनर्णवः। अग्निमयो
ह वै पुनर्णवो भूत्वा। स्वर्गं लोकमेति। आदित्यस्य सायुज्यम्।
योऽग्निं नाचिकेतं चिनुते। य उ चैनमेवं वेद॥

ऋचां प्राची महती दिगुच्यते

तै॰ब्रा॰ ३.१२.९

ऋचां प्राची महती दिगुच्यते। दक्षिणामाहुर्यजुषामपाराम्।
अथर्वणामङ्गिरसां प्रतीची। साम्नामुदीची महती दिगुच्यते। ऋग्भिः
पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अह्नः।
सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः। ऋग्भ्यो
जाता सर्वशो मूर्तिमाहुः। सर्वा गतिर्याजुषी हैव शश्वत्॥

सर्वं तेजः सामरूप्य ह शश्वत्। सर्व हेदं ब्रह्मणा हैव सृष्टम्।
ऋग्भ्यो जातं वैश्यं वर्णमाहुः। यजुर्वेदं क्षत्रियस्याहुर्योनिम्।

सामवेदो ब्राह्मणानां प्रसूतिः। पूर्वे पूर्वेभ्यो वच एतदूचुः।
आदर्शमग्निं चिन्वानाः। पूर्वे विश्वसृजोऽमृताः। शतं वर्षसहस्राणि।
दीक्षिताः सत्रमासत॥

तप आसीद् गृहपतिः। ब्रह्म ब्रह्माभवत् स्वयम्। सत्यꣳ ह
होतैषामासीत्। यद्विश्वसृज आसत। अमृतमेभ्य उदगायत्। सहस्रं
परिवत्सरान्। भूतꣳ ह प्रस्तोतैषामासीत्। भविष्यत्प्रति चाहरत्।
प्राणो अध्वर्युरभवत्। इदꣳ सर्वꣳ सिषासताम्॥

अपानो विद्वानावृतः। प्रति प्रातिष्ठदध्वरे। आर्तवा उपगातारः।
सदस्या ऋतवोऽभवन्। अर्धमासाश्च मासाश्च।
चमसाध्वर्यवोऽभवन्। अशꣳसद् ब्रह्मणस्तेजः।
अच्छावाकोऽभवद्यशः। ऋतमेषां प्रशास्ताऽऽसीत्। यद्विश्वसृज
आसत॥

ऊर्ग्राजानमुदवहत्। ध्रुवगोपः सहोऽभवत्। ओजोऽभ्यष्टौद्
ग्राव्णः। यद्विश्वसृज आसत। अपचितिः पोत्रीयामयजत्।
नेष्ट्रीयामयजत्त्विषिः। आग्नीध्राद्विदुषी सत्यम्। श्रद्धा
हैवायजत्स्वयम्। इरा पत्नी विश्वसृजाम्। आकूतिरपिनड्ढविः॥

इध्मꣳ ह क्षुच्चैभ्य उग्रे। तृष्णा चावहतामुभे। वागेषाꣳ
सुब्रह्मण्याऽऽसीत्। छन्दोयोगान् विजानती। कल्पतन्त्राणि
तन्वानाऽहः। सꣳस्थाश्च सर्वशः। अहोरात्रे पशुपाल्यौ। मुहूर्ताः
प्रेष्या अभवन्। मृत्युस्तदभवद्धाता। शमितोग्रो विशां पतिः॥

वि॒श्व॒सृजः॑ प्रथ॒मा स॒त्रमा॑सत। स॒हस्र॑सम॒ं प्रसु॑ते॒न यन्तः॑। ततो॑ ह जज्ञे॒ भुव॑नस्य गो॒पाः। हि॒र॒ण्मयः॑ श॒कुनि॒र्ब्रह्म॒नाम॑। येन॒ सूर्य॒स्तप॑ति॒ तेज॑से॒द्धः। पि॒ता पु॒त्रेण॑ पि॒तृमा॒न् योनि॑योनौ। नावे॑दविन्मनुते॒ तं बृ॒हन्त॑म्। स॒र्वा॒नु॒भु॒मा॒त्मान॑ꣳ संप॒राये। ए॒ष नि॒त्यो म॑हि॒मा ब्रा॑ह्म॒णस्य॑। न कर्म॑णा वर्धते॒ नो कनी॑यान्॥

तस्यै॒वात्मा प॑द॒वित्तं वि॑दित्वा। न कर्म॑णा लिप्यते॒ पाप॑केन। पञ्च॑पञ्चा॒शत॑स्त्रि॒वृतः॑ संवत्स॒राः। पञ्च॑पञ्चा॒शतः॑ पञ्चद॒शाः। पञ्च॑पञ्चा॒शतः॑ सप्तद॒शाः। पञ्च॑पञ्चा॒शत॑ एकवि॒ꣳशाः। वि॒श्व॒सृजा॑ꣳ स॒हस्र॑संवत्सरम्। ए॒ते॒न वै वि॑श्व॒सृज॑ इ॒दं विश्व॑मसृजन्त। यद्विश्व॒मसृ॑जन्त। तस्मा॑द्विश्व॒सृजः॑। विश्व॑मेना॒नन॒ु प्रजा॑यते। ब्रह्म॑ण॒ः सायु॑ज्यꣳ सलो॒कता॑ यन्ति। ए॒तासा॑मे॒व दे॒वता॑ना॒ꣳ सायु॑ज्यम्। सा॒र्ष्टिता॑ꣳ समानलो॒कता॑ यन्ति। य ए॒तद॑ुप॒यन्ति॑। ये चै॑न॒त्प्राहु॑ः। येभ्य॑श्चैन॒त्प्राहु॑ः। ओम्॥

लघुप्रयोगदर्शिनी

अभु° = अभ्युदयश्राद्धं, उदक° = उदकशान्तिः, प्रति° = प्रतिसरबन्धः, पुण्° = पुण्याहं, ग्रह° = ग्रहप्रीतिः, अङ्कु = अङ्कुरार्पणम्

		अभ्यु	उदक	प्रति	पुण्	ग्रह	अङ्कु
१	गर्भा°					❁	
२	पुंसु°		❁	❁			
३	सीमन्तो°	❁	❁	❁			
४	जात°	❁			❁		
५	नाम°	❁			❁	❁	
	कर्णवेधः	❁		❁	❁		
६	अन्नप्रा°	❁		❁	❁	❁	
७	चौलं	❁	❁	❁	❁		❁
८	उपनयनं	❁	❁	❁	❁		❁
९	व्रतानि						
१३	गोदानं						
१४	स्नातकं		❁	❁			❁
१५	उद्वाहः	❁	❁	❁			❁
१६	पैतृमेधः						

सन्ध्यावन्दनसूत्राणि

बो°ध° २.४

अथातः सन्ध्योपासनविधिं व्याख्यास्यामः॥१॥ तीर्थं गत्वा, अप्रयतो ऽभिषिक्तः प्रयतो वाऽनभिषिक्तः, प्रक्षालितपाणिः, अप आचम्य, सुरभिमत्याब्लिङ्गाभिः (348) वारुणीभिः (348) हिरण्यवर्णाभिः (349) पावमानीभिः (350) व्याहृतीभिरन्यैश्च (205) पवित्रैरात्मानं प्रोक्ष्य प्रयतो

भवति॥२॥ दर्भेष्वासीनो दर्भान् धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखः सावित्रीं (214) सहस्रकृत्व आवर्यतेत्॥५॥ वारुणीभ्यां रात्रिमुपतिष्ठत “इमं मे वरुण”, “तत्त्वा यामि” (301) इति द्वाभ्याम्॥९॥ एवमेव प्रातः प्राङ्मुखस्तिष्ठन्॥१०॥ मैत्रीभ्यामहरुपतिष्ठते “मित्रस्य चर्षणी धृतो”, “मित्रो जनान् यातयति” () इति द्वाभ्याम्॥११॥

समिधादानसूत्राणि

आ॰गृ॰ ११

“परित्वा” इति (623) परिमृज्य, तस्मिन्नुत्तरैर्मन्त्रैः समिध आदध्यात्॥२१॥

स्थालीपाकसूत्राणि

आ॰गृ॰ ७

अथैनामाग्नेयेन स्थालीपाकेन याजयति॥१॥ पत्न्यवहन्ति॥२॥ श्रपयित्वा ऽभिघार्याग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायां स्थालीपाकाज्जुहोति॥३॥ सकृदुपस्तरणाभिधारणे द्विरवदानम्॥४॥ अग्निर्देवता स्वाहाकारप्रदानः॥५॥ अपि वा सकृदुपहृत्य जुहुयात्॥६॥ अग्निः स्विष्टकृद्द्वितीयः॥७॥ सकृदुपस्तरणावदाने द्विरभिघारणम्॥८॥ मध्यात् पूर्वस्यावदानम्॥९॥ मधे होमः॥१०॥ उत्तरार्धादुत्तरस्य॥११॥ उत्तरार्धपूर्वार्धे होमः॥१२॥ लेपयोः प्रस्तरवत् तूष्णीं बर्हिरङ्क्ताग्नौ प्रहरति॥१३॥ सिद्धमुत्तरं परिषेचनम्॥१४॥ तेन सर्पिष्मता ब्राह्मणं भोजयेत्॥१५॥ योऽस्यापचितस्तस्मा ऋषभं ददाति॥१६॥

औपासनसूत्राणि

आ॰गृ॰ ७

सायं प्रातरत ऊर्ध्वं हस्तेनैते आहुती तण्डुलैर्यवैर्वा जुहुयात्॥१९॥ स्थालीपाकवद्दैवतम्॥२०॥ सौरी पूर्वाहुतिः प्रातरित्येके॥२१॥ उभयतः परिषेचनं यथा पुरस्तात्॥२२॥

पुण्याहवाचनम्

कलशस्थापनं (301), पुण्याहं (8), पवमानं (350), हिरण्यवर्णीया (349), प्रोक्षणं (353), प्राशनं (354).

बो॰गृ॰शे॰ १.१०

शुचौ समे देशे दर्भान् दूर्वां धारयमाणाः चत्वारो ब्राह्मणा अरिक्तहस्ताः प्राङ्मुखा युग्मास्तिष्ठन्ति॥२॥ तेषां दक्षिणत उदङ्मुखो वाऽपिहितमुदकुम्भं धारयन् वाचयिता तस्य दक्षिणं बाहुमाश्रित्य पत्यस्तिष्ठन्ति॥३॥ पूर्णकुम्भमभ्यर्च्य दर्भेष्वासीनो दर्भान्धारयमाणो ऽनुज्ञां कुर्यात् – "भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये" इति। ते प्रणवपूर्वं "वाच्यताम्" इति प्रतिब्रूयुः॥४॥ अथ व्याहृतिभिर्भूमौ जलं विसृज्योपविश्य सुरभिमत्याऽब्लिङ्गाभिः (), वारुणीभिः (), पावमानीभिः () व्याहृतीभिरिति मार्जयित्वा पतीं च प्रोक्षतीत्याह भगवान् बोधायनः॥२२॥

प्रतिसरबन्धः

कलशस्थापनं (301), सावित्री, वेदादयः (1), राक्षोघ्नं (304), आप्यं (311), हिरण्यवर्णीया (349), पवमानं (350), वरुणसूक्तं (348), रुद्रसूक्तं (17), ब्रह्मसूक्तं (15), विष्णुसूक्तं (15), पञ्चदुर्गाः (207), श्रीसूक्तं (17), परिधानीया (352), सुरभिमत्यब्लिङ्गाः (348), प्रोक्षणं (353), त्र्यम्बकं, अग्निरायुष्मान् (309), प्रतिसरं (10), आयुष्यं (351).

प्रथमार्तवशान्तिः

कलशस्थापनं (301), पुरुषसूक्तेन (420) पुण्डरीकाक्षपूजनं, वैष्णवी गायत्री, वेदादयः (1), सुरभिमत्यब्लिङ्गाः (348), हिरण्यवर्णीया (349), पवमानं (350), वरुणसूक्तं (348), श्रीसूक्तं (17), पुरुषसूक्तं (420), पञ्चशान्तयः (118), ऋचां प्राची (733), परिधानीया (352), प्रोक्षणं

(353), प्राशनं (354), अग्निमुखं (101), अष्टादशकृत्वः विष्णुसूक्तेन पालाशसमिद्भिः(15), ब्रह्मसूक्तेन अन्नेन (15), रुद्रेसूक्तेन आज्येन (17), अष्टाविंशतिकृत्वः ऋतुनक्षत्रस्य समिदन्नाज्याहुतीः (337), त्र्यम्बकेन अष्टोत्तरशतधा तिलेन, आयुष्यसूक्तेन आज्येन (351), जयादयः (102), प्रोक्षणं (353), प्राशनं (354).

गृहप्रवेशवास्तुशान्तिः

गार्ग्योक्तविधानेन – कलशस्थापनं (301), गृहप्रवेशवास्तुमन्त्राः (30), रुद्राध्यायः (435), चमकं (445), पुरुषसूक्तं (420), श्रीसूक्तं (17), भूसूक्तं (19), मृत्युसूक्तं (36), दुर्गासूक्तं (207), पञ्चशान्तयः (118), घोषशान्तिः (120), अग्निमुखं (101), १०८ आहुतीः समिद्भिः शर्करया आज्येन च वास्तुसूक्तेन (634), १२ आहुतीः समिद्भिः शर्करया आज्येन च द्वादशधा नवग्रहसूकेन (25), जयादयः (102), प्रोक्षणं (353), प्राशनं (354).

राक्षोघ्नहोमः

कलशस्थापनं (301), राक्षोघ्नं (304), ये देवाः पुरःसदः (308), पञ्चदुर्गाः (207), जयादयः (102), प्रोक्षणं (353), प्राशनं (354).

गणहोमः

कलशस्थापनं (301), अग्निसूक्तं (107), पुरुषसूक्तं (420), मृगारं (319), यावामिन्द्रा वरुणेति (310), पवमानं (350), कूश्माण्डमन्त्राः (108), वैश्वानरो न ऊत्या (112), जयादयः (102), प्रोक्षणं (353), प्राशनं (354), सिंꣳहे मे मन्युः (?).

मृत्युञ्जयहोमः

शौनकोक्तविधानेन – कलशस्थापनं (301), वेदादयः (1), १०८-धा त्र्यम्बकजपः, रुद्राध्यायः (435), चमकं (445), पुरुषसूक्तं (420), राक्षोघ्नं (304), हिरण्यवर्णीया (349), पवमानं (350), ब्रह्मसूक्तं (15), विष्णुसूक्तं (15), रुद्रसूक्तं (17), वरुणसूक्तं (348), मृत्युसूक्तं (36), श्रीसूक्तं (17), भूसूक्तं (19), दुर्गासूक्तं (207), आयुष्यसूक्तं (351), यक्ष्मघ्नसूक्तं (37), तदित्पदं (37), सद्योजातादिपञ्चकं (212),पञ्चशान्तयः (118), घोषशान्तिः (120), अग्निमुखं (101), १००८-धा त्र्यम्बकाहुतयः, जयादयः (102), प्रोक्षणं (353), प्राशनं (354).

शताभिषेकः

अग्निमुखं (101), आयुष्टे विश्वतो दधत् (), आयुर्दा अग्ने (), ब्रह्मसूक्तं (15), अग्निरायुष्मान् (309), या सुगन्धाः (116), याः प्राचीः (117).

उग्ररथशान्तिः

कलशस्थापनं (301), {अपैतु मृत्युः॰, परं मृत्यो॰, मानस्तोके॰, मा नो महान्तं॰, त्र्यम्बकं॰, ये ते सहस्रं॰} इति १०८-धा (218), अग्निमुखं (101), आयुष्यसूक्तं (351), उक्तं मृत्युसूक्तं १००८-धा, जयादयः (102), (36), उक्तं मृत्युसूतं, आयुष्यसूक्तं (351), समुद्रज्येष्ठा (115).

भीमरथशान्तिः

कलशस्थापनं (301), अग्निमुखं (101), पुरुषसुक्तं (), रुद्रप्रश्नः (), सौरसूक्तं (), गाणपतसूक्तं (), घोषशान्तिः (), ग्रहयज्ञः (), {अपैतु मृत्युः॰, परं मृत्यो॰, मानस्तोके॰, मा नो महान्तं॰, त्र्यम्बकं॰, ये ते सहस्रं॰} इति १०८-धा (218), अग्निमुखं (101), आयुष्यसूक्तं

(351), उक्तं मृत्युसूक्तं १००८-धा, जयादयः (102), (36), उक्तं मृत्युसूतं, आयुष्यसूक्तं (351), समुद्रज्येष्ठा (115).

प्रयोगखण्डः

मुद्दुदीक्षितस्य प्रयोगरत्नं एवास्य खण्डस्य मूलम्। तं ग्रन्थं आन्तं विभाव्य, अन्यान् च मुख्यग्रन्थान् (प्रयोगग्रन्थान्, गृह्यसूत्राणि च) परिशील्य, यथामति ग्रथितम्।

प्रतिसरबन्धः

पुंसां अन्नप्राशनचौलोपनयनस्नानेषु विवाहे पुनरुद्वाहे च प्रतिसरबन्धं कुर्यात्।
स्त्रीणां पुंसुवनसीमन्तोन्नयनान्नप्राशनचूडोद्वाहेषु कुर्यात्।

सू॰, यस्मिन् दिने नान्दीमुखं कुर्यात् तस्यां रात्र्यां प्रदोषान्ते प्रतिसरमारभेत॥
बो॰गृ॰शे॰१.१५.२॥

(अमुक)नक्षत्रे (अमुक)राशौ जातस्य, (अमुक)शर्मणो (अमुकस्य) (अमुक)कर्माङ्गं बोधायनगृह्यशेषसूत्रोक्तप्रकारेण प्रतिसरबन्धकर्म करिष्ये।

सू॰, शुचौ समे देशे गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं उपलिप्य, युग्मान् ब्राह्मणान् सुप्रक्षालितपाणिपादान् अप आचमय्य, प्रतिदिशं आसनेषु उपवेश्य, पश्चात् प्राङ्मुख आचार्य उपविशति॥३॥ तस्य दक्षिणं बाहुं अन्वितरः॥४॥

प्रतिसरबन्धजपकर्मणि ऋत्विजं त्वां वृणे, इति चतुरो वरान् वृत्वा, यथोक्तं उपवेश्य

सू॰, अथ हस्तमात्रं सैकतं स्थण्डिलं कृत्वा, उल्लिख्य, अद्भिरभ्युक्ष्य

सैकतवद्द्रोणपरिमितव्रीहिभिः स्थण्डिलं कृत्वा, तदुपरि तण्डुलराशिं निक्षिप्य, तस्मिन् प्रादेशमात्रं चतुरश्रं दर्भैः उल्लिखेत्।

त्रिः प्राचीनं उल्लिखेत् – मध्ये, ब्रह्म॑ जज्ञा॒नं ॰ ॥ दक्षिणतः, नाके॑ सुप॒र्णम् ॰ ॥ उत्तरतः, आप्या॑यस्व॒ ॰ ॥

त्रिरुदीचीनं उल्लिखेत् – मध्ये, यो रु॒द्रो ॰ ॥ अप उपस्पृश्य॥ पश्चिमतः, इ॒दं विष्णु॒ः॥ पुरस्तात्, इन्द्रं॒ विश्वा॑ ॰ ॥ धर्भान् निरस्य, अप उपस्पृश्य, स्थण्डिलं अद्भिः प्रोक्ष्य, तन्तुवेष्टितं सुधूपीतं कुम्भं अद्भिः प्रोक्ष्य

सू॰, स्थण्डिलस्य मध्ये प्रागग्रान् गर्भान् संस्तीर्य, तेषु उपरि कुम्भं निधाय, व्याहृतीभिः शुद्धोदकैः पूरयित्वा, दूर्वाक्षतफलैरवकीर्य, गन्धपुष्पधूपदीपैरुदकुम्भं अभ्यर्च्य

प्रागग्रान् धर्भान् संस्तीर्य, ब्रह्मजज्ञानं () इत्यृचा स्थण्डिले कुम्भं निधाय (301), ब्रह्म॑ जज्ञा॒नं ॰ ॥ तस्मिन् गायत्र्या तिरः पवित्रमुदगग्रं निधाय, तत्स॑वि॒तुः ॰ ॥ व्याहृतीभिः ॐ भूर्भुव॒ः सुव॑ः इति शुद्धोदकैः पूरयित्वा, दूर्वाक्षतफलैरवकीर्य, गन्धोदकेन अभ्युक्ष्य, पुष्पैरवकीर्य, अभ्यर्चयति () आपो॒ वा इ॒द९ ॰ ॥ अ॒पः प्रण॑यति ॰ ॥

अभिमन्त्र्य, त्रिः प्रागुत्पुनाति, दे॒वो व॑ः सवि॒तोत्पु॑नातु ॰॥ कुम्भरत्नं निक्षिप्य, स हि रत्ना॑नि ॰॥ कूर्चाग्रै ॰ ॥ इति कूर्चं निधाय, वृक्षराजसमुद्भूताः ॰ ॥ चूतपल्लवैः बिल्वपल्लवैः वाऽवकीर्य, नालिकेर समुद्भूत ॰ ॥ नालिकेरफलेनापिधाय, ऊर्ध्वकूर्चं च निधाय

नागपाशधरं देवं॰ इति वरुणं ध्यात्वा, इमं मे वरुण, तत्वायामीति द्वाभ्यां कुम्भे वरुणं आवाह्य, इ॒मं मे॑ वरुण ॰ ॥ तत्त्वा॑ यामि॒ ॰ ॥ आसनं दत्वा, पाद्यादि निवेदनान्तं कृत्वा

सू॰, दूर्वाभिर्दर्भैः प्रतिच्छाद्योत्तरतः शालितण्डुलस्योपरि प्रतिसरसूत्रं गन्धानुलिप्तं निधाय

प्रागग्रान् दर्भान् संस्तीर्य, उत्तरतः कांस्यपात्रे शालितण्डुलोपरि नवगुणितं हारिद्रगन्धानुलिप्तं कार्पाससूत्रं भस्मताम्बूलसहितं निधाय

सू°, आचार्यमुखांस्त्रीन् प्राणायामान् धारयित्वा, उदकुम्भं अन्वारभ्य, सावित्रीं जपति – "तत्सवितुर्वरेण्यं" इत्येतां पच्छोऽर्धर्चशोऽनवानमुक्त्वा, वेदादीन् जपति (1) ॥५॥

त्रीन् प्राणायामान् धारयित्वा, ऋत्विग्भिः सह कुम्भं अन्वारभ्य, गायत्रीं पच्छोऽर्धर्चशोऽनवानमुक्त्वा वेदादीन् जपति ॐ भूः तत्स॑वि॒तुः ° ॥ अ॒ग्निमी॑ळे ° ॥ अग्न॒ आ या॑हि ° ॥ इ॒षे त्वो॒र्जे त्वा॑ ° ॥ शं नो॑ दे॒वीः ° ॥

सू°, राक्षोघ्नं "कृणुष्व पाजः" इत्येतमनुवाकम् (304), "अग्ने यशस्विन्" इति चतस्र आप्यम् (311), "हिरण्यवर्णाः शुचयः पावकाः" इत्येतमनुवाकं (349), "पवमानः सुवर्जनः" इत्येतमनुवाकम् (350), वरुणसूक्तं "उदुत्तमं वरुण पाशं" इति षडृचम् (348), रुद्रसूक्तं "परि णो रुद्रस्य हेतिः" इति षडृचम् (17), ब्रह्मसूक्तं "ब्रह्म जज्ञानं" इति षडृचम् (15), विष्णुसूक्तं "विष्णोर्नुकं" इति षडृचम् (15), पञ्च दुर्गाः "जातवेदसे" इति (207), श्रीसूक्तं "हिरण्यवर्णां हरिणीं" इति पञ्चदशर्चम् (17), '"नमो ब्रह्मणे" इति परिधानीयां त्रिरन्वाह' इति ब्राह्मणम् (352)

यथोक्तं जपित्वा

सू°, प्रणवेनोत्थाप्य, व्याहृतीभिः सुरभिमत्याऽब्लिङ्गाभिः (348) प्रोक्ष्य (353)

तत्त्वा॑यामि ॰ ॥ इति वरुणमुद्वास्य, ॐ इति प्रणवेन कुम्भं उत्थाप्य, व्याहृतीभिः सुरभिमत्याब्लिङ्गाभिः कुम्भजलेन प्रतिसरसूत्रं प्रोक्ष्य भूर्भु॒वः सुव॑ः । द॒धिक्राव्णो॑ ॰ ॥ आपो॑ हि ष्ठा ॰ ॥ देवस्य त्वेति त्रिभिः पर्यायैः कर्तारं च प्रोक्ष, दे॒वस्य॑ त्वा सवि॒तुः ॰ ॥

सू॰, प्रतिसूत्रमादाय, वासुकिं ध्यात्वा, अङ्गुष्ठेनोपकनिष्ठिकाभ्यां त्र्यम्बकेन () त्रिरूर्ध्वं भस्मना संमृज्य

प्रतिसरसूत्रमादाय वामहस्ताङ्गुष्ठानामिकाभ्यां मूले गृहीत्वा, वासुकिं ध्यात्वा[70], दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां "त्र्यम्बकं यजामह" इति सकृन्मन्त्रेण, त्र्यं॑म्बकं यजामहे ॰ ॥ ततो द्विस्तूष्णीं भस्मना त्रिरूर्ध्वं उन्मृज्य, तण्डुलैरञ्जलिं पूरयित्वा, तदुपरि फलं, तदुपरि सूत्रं च निधाय,

सू॰, "अग्निरायुष्मान्" इति पञ्चभिः[71] (309) तस्य दक्षिणहस्तं गृहीत्वा, "बृहत्साम" इति बध्वा (10), स्त्रीणां वामहस्तम्

यथोक्तं पुरुषाणां दक्षिणहस्तं, स्त्रीणां वामहस्तं अभिमन्त्र्य

सू॰, भस्मना घृतसूक्तेन "यो ब्रह्मा ब्रह्मणः" इत्यष्टर्चेन (351) रक्षां कुर्यादित्याह भगवान् बोधायनः॥७॥

यथोक्तं जपित्वा, रक्षां कृत्वा, आचार्याय दक्षिणां दत्वा, ब्राह्मणेभ्यो दक्षिणां दद्यात्। तत्तत्कर्मसमाप्तौ सायं सन्ध्यायां व्याहृतीभिः ॐ भूर्भुव॒ः सुव॑ः इति बन्धनसूत्रं विस्रस्य नद्यां तडाकादौ वा त्यजेत्।

---

[70] "नमो॑ अस्तु स॒र्पेभ्य॑ः इति त्र्यर्चेन वासुकिध्यानम्" इत्येके॥

[71] "आयुष्मतीं करोमीति स्त्रीणाम्" इति क्वाचित्कः पाठः॥

अङ्कुरार्पणम्

“चौलोपनयने स्नाने दम्पत्योश्च विवाहके” इत्येवं कुर्यात्॥

(अमुक)नक्षत्रे (अमुक)राशौ जातस्य मम कुमारस्य (श्वः) करिष्यमाण(अमुक)कर्माङ्गं बोधायनोक्तप्रकारेण अङ्कुरार्पणकर्म करिष्ये।

सू°, ब्राह्मणानन्नेन परिषिच्य, “पुण्याहं स्वस्ति ऋद्धिं” इति वाचयित्वा, शुचौ समे देशे गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं उपलिप्य, अक्षतान् संप्रकीर्य, अद्भिरभ्युक्ष्य, पञ्च पालिकाः सौवर्णा रजतास्ताम्रा मृण्मयीर्वा यथासंभवं गृह्णाति॥१॥

तदङ्गं पुण्याहं वाचयिष्ये। ब्रह्मादयः प्रीयन्तां इति पुण्याहं वाचयित्वा, पञ्चपालिकाः संभृत्य, मध्ये चतुर्दिक्षु च मध्यादिप्रदक्षिणक्रमान्निधाय, तासां मूले दूर्वाश्वत्थबिल्वशिरीषाणि बध्वा, श्वेतसूत्रेण वेष्टयित्वा, शुद्धाभिर्मृद्भिरापूर्य[72], पुण्याहजलैः पञ्चपालिकाः कूर्चेण व्याहृतीभिः “ॐ भूर्भुव॒ः सुव॒रोम्” इति प्रोक्ष्य

सू°, मध्यमायां व्याहृतीभिर्ब्रह्माणं प्रजापतिं चतुर्मुखं हिरण्यगर्भं चावाह्य पूजयेत्।

---

[72] सू°, वल्मीकमृत्तिकां हृत्वा गोमयं च तथैव च। एतानि प्रक्षिपेत् तासु पालिकासु यथाक्रमम्॥ दूर्वां अश्वत्थपत्रं च शिरीषं बिल्वपत्रकम्। तासां मूलेषु बध्नीयाच्छ्वेतसूत्रेण वेष्टयेत्॥

मध्यमायां पालिकायां, ॐ भूः ब्रह्माणं आवाहयामि। ॐ भुवः प्रजापतिं आवाहयामि। ओ३ सुवः चतुर्मुखं आवाहयामि। ॐ भूर्भुवः सुवः हिरण्यगर्भं आवाहयामि। ब्रह्मादीनामिदमासनम्।

सू॰, एताभिरेव प्राच्यां – इन्द्रं वज्रिणं शचीपतिं शतक्रतुम् – इति

प्राच्यां, ॐ भूः इन्द्रं आवाहयामि। ॐ भुवः वज्रिणं आवाहयामि। ओ३ सुवः शचीपतिं आवाहयामि। ॐ भूर्भुवः सुवः शतक्रतुं आवाहयामि। इन्द्रादीनामिदमासनम्।

सू॰, एताभिरेव दक्षिणस्यां – यमं वैवस्वतं पितृपतिं धर्मराजं (प्रेतपतिं) – इति

दक्षिणस्यां, ॐ भूः यमं आवाहयामि। ॐ भुवः वैवस्वतं आवाहयामि। ओ३ सुवः पितृपतिं आवाहयामि। ॐ भूर्भुवः सुवः धर्मराजं आवाहयामि। यमादीनामिदमासनम्।

सू॰, एताभिरेव प्रतीच्यां – वरुणं प्रचेतसं सुरूपिणं अपांपतिम् – इति

पश्चिमायां, ॐ भूः वरुणं आवाहयामि। ॐ भुवः प्रचेतसं आवाहयामि। ओ३ सुवः सुरूपिणं आवाहयामि। ॐ भूर्भुवः सुवः अपां पतिं आवाहयामि। वरुणादीनामिदमासनम्।

सू॰, एताभिरेव उदीच्यां – शशिनं निशाकरं चन्द्रं सोमम् – इति

उत्तरस्यां, ॐ भूः शशिनं आवाहयामि। ॐ भुवः निशाकरं आवाहयामि। ओ३ सुवः चन्द्रं आवाहयामि। ॐ भूर्भुवः सुवः सोमं आवाहयामि। शशिनादीनामिदमासनम्।

अथ पालिकाः परिस्तीर्य, ब्रह्मादिभ्यो नमः, इदं पाद्यं अर्घ्यं आचमनीयं इति क्रमेण दत्वा,

सू॰, अथैनान् स्नापयति – "आपो हि ष्ठा मयोभुवः" इति तिसृभिः (),
"हिरण्यवर्णाः शुचयः पावकाः" इति चतसृभिः (),
"पवमानः सुवर्जनः" इत्येतेनानुवाकेन मार्जयित्वा (),
अथैनान् गन्धपुष्पधूपदीपैरभ्यर्चयति – "अमुष्यै नमोऽमुष्यै नमः" इति।

यथोक्तमन्त्रैः "आपो हि ष्ठा" इत्यादिभिः मार्जयित्वा, वस्त्रादिनिवेदनान्तं, ताम्बूलं मन्त्रपुष्पं सुवर्णपुष्पं च दत्वा

सू॰, अथैनान् उपतिष्ठते – दिशां पतीन् नमस्यामि सर्वकामफलप्रदान्। कुर्वन्तु सफलं कर्म कुर्वन्तु सततं शुभम्॥ व्रीहियवमाषतिलमुद्गसर्षपान् मिश्रीकृत्य, क्षीरेण प्रक्षाल्य, ओषधिसूक्तेन "या जाताः" इत्यनुवाकेन अभिमन्त्र्य,

अङ्कुरार्थबीजानि व्रीहिमाषतिलमुद्गसर्षपान् क्षीरेण प्रक्षाल्य, सक्षीरं ओषधिबीजसहितं पात्रं सकूर्चं आदाय, उत्थाय, दिशां पतीन् नमस्यामि सर्वकामफलप्रदान्। कुर्वन्तु सफलं कर्म कुर्वन्तु सततं शुभम्॥ इति ब्रह्मादीन् उपस्थाय

ओषधिसूक्तजपार्थं ऋत्विजं त्वां वृणे, इति चतुरो वरान् वृत्वा, "या जाता ओषधय" इत्यनुवाकेन () ओषधिबीजान्यभिमन्त्र्य या जा॒ता ओष॑धयो ॰ ॥

सू॰, यथाक्रमं निर्वपति – ब्रह्म जज्ञानं, पिता विजारां – इति द्वाभ्यां मध्यमायाम्। यत इन्द्र भयामहे, स्वस्तिदा विशस्पतिः – इति द्वाभ्यां प्राच्याम्। योऽस्य कोष्ठ्य, यमं गाय – इति द्वाभ्यां दक्षिणस्याम्। इमं मे वरुण, तत्त्व यामि – इति द्वाभ्यां प्रतीच्याम्। सोमो धेनुं, आप्यायस्व – इति द्वाभ्यामुत्तरस्याम्॥

यथाक्रमं सकृन्मन्त्रेण द्विस्तूष्णीं निवपति॥ ब्रह्म जज्ञानं ॰ ॥ ब्रह्मादिभ्यो नमः, अयं बीजावापः॥ प्राच्यां, यत इन्द्र भयामहे ॰ ॥ इन्द्रादिभ्यो नमः, अयं बीजावापः॥ दक्षिणस्यां, योस्य कौष्ठ्य ॰ ॥ यमादिभ्यो नमः, अयं बीजावापः। सकृन्मात्रेण द्विस्तूष्णीम्॥ प्रतीच्यां, इमं मे वरुण ॰ ॥ वरुणादिभ्यो नमः, अयं बीजावापः। उत्तरस्यां, सोमो धेनुꣳ ॰ ॥

सू॰, यथाक्रमं शुद्धाभिः सिकताभिः प्रच्छादयेत्। पञ्चगव्येन यथाक्रमं सेचयेत्। प्रणवेनैव सापिधानं कृत्वा, यावत्कर्म तावत् सुरक्षितं गोपयेत्। समाप्ते कर्मणि ब्राह्मणान् पञ्च भोजयेत्, व्याहृतीभिः देवता यथाक्रमं उद्वासयेत्। आसप्तमात् प्रजाकाम आषष्ठात् पुत्रनाशनम्। पञ्चमे भक्तिकामानां विष्णोः सर्वात्मनस्तथा॥ चतुर्थे चाङ्कुरं विद्यात् पापीयान् जायते तु सः॥ त्रिरहे सर्वकामानां सद्यो वाऽप्यङ्कुरार्पणम्॥

इति बीजान्युप्त्वा[73], अथ पालिकासु यथाक्रमं पञ्चगव्येन सेचयित्वा, शुद्धाभिः सिकताभिः प्रच्छाद्य, यावत् कर्मसमाप्तिः तावत् सुरक्षितं कृत्वा, सायं प्रातर्निवेद्य संपूज्य, समाप्ते कर्मणि, अयुग्मेऽह्नि, प्रणवव्याहृतीभिस्तैरेव मन्त्रैः "ॐ भूः ब्रह्माणं उद्वासयामि" इत्यादिक्रमेण देवता उद्वास्य, नद्यां तटाके वा अङ्कुराणि प्रक्षिपेत्।

---

[73] सुमङ्गल्योऽथ वा कन्यास्तिस्रः पञ्चाथ सप्त वा। अवन्ध्या निवपेयुः नरजो वर्जिताश्च निवपेयुः। ताः स्त्रियश्च गन्धादिभिः संपूजयेत्।

अग्निमुखम्

यत्र क्व चाग्निमुखं समाधास्यन् स्यात्, तत्राङ्गुष्ठानामिकाभ्यां सङ्गृहीतेन शकलेन दर्भेण वा दक्षिणारम्भं प्राचीस्तिस्रो रेखाः, पश्चिमारम्भं उदीचीस्तिस्रो रेखाश्च लिखित्वा, तत्र तं न्यस्य, अद्भिरवोक्ष्य, शकलं नैर्ऋत्यां निरस्य, अप उपस्पृश्य,

सू°, अग्निमिध्वा॥१,१२॥

(विहिताग्निं) **भूर्भुवःसुवरोम्** इति प्रतिष्ठाप्य, याज्ञिकैरिन्धनैरग्निं इध्वा, प्रज्वाल्य, अथावोक्षणतोयशेषं उत्तरतः पूर्वतो वा उत्सिञ्चेत्। अथान्यदुदकं पात्रस्थं तत्रैवापदध्यात्।

सू°, प्रदक्षिणम्॥ पुरस्तादुदग्वोपक्रमः॥ तथापवर्गः॥ प्रागग्रैर्दर्भैरग्निं परिस्तृणाति॥१२॥ प्रागुदगग्रैर्वा॥१३॥

अथ प्रागादिप्रदक्षिणं सर्वासु दिक्षु प्रागग्रैः कुशैः अग्निं परिस्तृणाति। अथवा दक्षिणत उत्तरतश्च प्रागग्रैः, पश्चात् पुरस्ताच्चोदगग्रैः।

सू°, उत्तरेणाग्निं दर्भान् संस्तीर्य, द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति देवसंयुक्तानि॥१६॥

उत्तरेणाग्निं पात्रसादनार्थं प्रागग्रान् दर्भान् संस्तीर्य। तेषु द्वन्द्वं न्यञ्चि अधोबिलानि पात्राणि सादयति। उच्यन्ते मुख्यपात्राणि – प्रधानदर्वीं आज्यस्थालीं च, प्रोक्षणीपात्रं प्रणीतापात्रं च, इतरदर्वीं इध्मं च दक्षिणोदं(?) च सादयित्वा,

सू॰, पवित्रयोः संस्कार आयामतः परीमाणं प्रोक्षणीसंस्कारः पात्रप्रोक्षः इति दर्शपूर्णमासवत् तूष्णीम्॥१९॥

समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कृत्वा, तृणं काष्ठं वाऽन्तर्धाय छित्वा, अप उपस्पृश्य, आमूलाग्रादद्भिरनुमृज्य, सपवित्रेण पाणिना पात्राणि संमृश्य, प्रोक्षणीपात्रं आदाय पुरतो निधाय, पवित्रमन्तर्धाय, अप आसिच्य, उदगग्राभ्यां पवित्राभ्यां त्रिः प्रागुत्पूय, उत्तानानि पात्राणि कृत्वा, इध्मं च विस्रस्य, उत्तानेन सपवित्रहस्तेन त्रिः सर्वाभिरद्भिः प्रोक्ष्य

सू॰, अपरेणाग्निं पवित्रान्तर्हिते पात्रेऽप आनीय, उदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूय, समं प्राणैर्हृत्वोत्तरेणाग्निं दर्भेषु सादयित्वा, दर्भैः प्रच्छाद्य॥२०॥

प्रोक्षणीपात्रं दक्षिणतो निधाय, प्रणीतापात्रमादाय पुरतो निधाय, पवित्रमन्तर्धाय, अप आसिच्य, पूर्ववत् त्रिरुत्पूय, अभिमन्त्र्य, समं प्राणैर्हृत्वा, उत्तरेणाग्निं दर्भान् संस्तीर्य, तेषु प्रणीताः सादयित्वा

वरुणाय नमः सकलाराधनैः स्वर्चितम्। दर्भैः प्रच्छाद्य, पवित्रमादाय

सू॰, ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य॥२१॥

ब्रह्मवरणम्। **अस्मिन् (अमुक)होमकर्मणि ब्रह्माणं त्वां वृणे। ब्रह्मणे नमः सकलाराधनैः स्वर्चितं।**

सू॰, आज्यं विलाप्य, अपरेणाग्निं पवित्रान्तर्हितायां आज्यस्थाल्यां आज्यं निरुप्य, उदीचोऽङ्गारान्निरूह्य, तेष्वधिश्रित्य, ज्वलतावद्युत्य, द्वे दर्भाग्रे प्रत्यस्य, त्रिः पर्यग्नि कृत्वोदगद्वास्याङ्गारान् प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पूय, पवित्रे अनुप्रहृत्य॥२२॥

(विलीनमप्याज्यं होमार्थं) अग्नावाज्यं विलाप्य, अपरेणाग्निं पवित्रान्तर्हितायां आज्यस्थाल्यां आज्यं निरुप्य, उदीचीऽङ्गारान्निरूह्य, व्यन्तान् कृत्वा, तेष्वाज्यमधिश्रित्य तृणेन ज्वलताऽवद्योत्य, द्वे दर्भाग्रे प्रच्छिद्य, प्रक्षाल्य, प्रत्यस्य, त्रिः पर्यग्निकृत्वा, आज्यं कर्षन्नुदगुद्वास्य, अङ्गारान् प्रत्यूह्य, उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य, प्रागग्रमग्नौ प्रहरति।

सू॰, येन जुहोति तदग्नौ प्रतितप्य दर्भैः संमृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्भिः संस्पृश्याग्नौ प्रहरति॥

अग्नेः पश्चाद्दर्भानास्तीर्य, तेष्वाज्यस्थालीं सादयित्वा, येन जुहोति। तदग्नौ प्रतितप्य, दर्भैरितरदर्वीं प्रधानदर्वीं च क्रमेण संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, आज्यस्थाल्या उत्तरतो निधाय, दर्भानद्भिः संस्पृश्याग्नौ प्रहरति

सू॰, शम्याः परिध्यर्थे विवाहोपनयनसमावर्तनसीमन्तचौलगोदानप्रायश्चित्तेषु॥

परिधीन् परिदधाति। (शम्याः परिध्यर्थेवा) स्थविष्ठं पश्चादुदगग्रं मध्यं निधाय। ततोऽणिष्ठं दीर्घं प्रागग्रमग्नेर्दक्षिणतो निधाय। ततोऽपि ह्रसिष्ठं कृशं प्रागग्रमग्नेरुत्तरतो निधाय। परिधीनन्योन्यसंसृष्टान् कृत्वा मध्यमं परिधिं दक्षिण हस्तेनोपस्पृश्य, अग्नेर्दक्षिणपूर्वोत्तर पूर्वदेशयोराघार समिधौ निधाय

सू॰, अग्निं परिषिञ्चत्यदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनमनुमतेऽनुमन्यस्वेति पश्चादुदीचीनं सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनं देव सवितः प्रसुवेति समन्तम्॥

अथाग्निं परिषिञ्चति। अदि॒तेऽनु॑मन्यस्व (दक्षिणतः)।
अनु॑म॒तेऽनु॑मन्यस्व (पश्चिमतः)। सर॑स्व॒तेऽनु॑मन्यस्व (उत्तरतः)।
देव॑सवित॒ः प्रसु॑व (समन्तं)।

सू॰, इध्मं आधायाघारावाघारयति दर्शपूर्णमासवत् तूष्णीम्॥

अग्निमलङ्कृत्य, इध्ममादाय आज्येनाभ्यज्य, अस्मिन्नमुकहोमकर्मणि ब्रह्मन्निध्ममाधास्ये। इतरदर्व्या आज्यं गृहीत्वा, प्रजापतिं मनसा ध्यायन्नाघारावाघारयति।

उत्तरं परिधिसन्धिमन्ववहृत्य, दक्षिणाप्राञ्चमृजुं सन्ततं ज्योतिष्ठत्याऽघारमाघारयन् सर्वाणीध्मकाष्ठानिसङ्ँ स्पर्शयति। (स्वाहा) प्रजापतय इदं।

प्रधानदर्व्या, दक्षिणं परिधिसन्धिमन्ववहृत्य, प्राञ्चमुदञ्चमृजुं सन्ततमाघारयति (स्वाहा) इन्द्रायेदम्।

सू॰, अथाज्यभागौ जुहोत्यग्नये स्वाहेत्युत्तरार्धपूर्वार्धे सोमाय स्वाहेति दक्षिणार्धपूर्वार्धे समं पूर्वेण॥

अथाज्यभागौ जुहोति। अग्नये स्वाहा। उत्तरार्धपूर्वार्धे। अग्नय इदं॥ सोमाय स्वाहा। दक्षिणार्धपूर्वार्धे। सोमायेदं॥

(अग्निमुखं जुहोति। अग्नये स्वाहा। अग्नय इदं) सङ्कल्प प्रभृत्येतत्क्षणपर्यन्तं मध्ये संभावितसमस्तविध्यपराय प्रायश्चित्तार्थं सर्व प्रायश्चित्तं होष्यामि । ॐ भूर्भुवः सुवः स्वाहा, प्रजापतय इदम्।

सू॰, यथोपदेशं प्रधानहुतीर्हुत्वा॥

अथ यथोपदेशं प्रधानाहुतीर्जुहोति। येन येन मन्त्रेण हविरादिविधिना विवाहादिषु प्रधानाहुतय उपदिष्टाः, तेन तेन विधानेन जुहुयात्। तत्र चरुकर्मसु प्रधानाहुतीर्हुत्वा, चरुणा अग्नये स्विष्टकृते स्वाहेति स्विष्टकृतं जुहुयात्।

सू॰, जयाभ्यातानान् ( )

एतत्कर्मसमृद्ध्यर्थं जयादिहोमं करिष्ये। चि॒त्तं च॒ ॰ ॥

सू॰, अभ्यातानान् ( )

अ॒ग्निर्भू॒ता॒नामधि॑पति॒ः ॰ ॥

सू॰, राष्ट्रभृतः ( )

ऋ॒ता॒षाडृ॒तधा॑मा॒ऽग्निः ॰ ॥

सू॰, प्रजापत्यां व्याहृतीर्विहृताः सौविष्टकृतीं इत्युपजुहोति॥

भूः स्वाहा॑। अग्नय इदम्। भुव॒ः स्वाहा॑। वायव इदम्। सुव॒ः स्वाहा॑। सूर्याय इदम्।

सू॰, यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वꣳ स्विष्टं सुहुतं करोतु स्वाहेति॥

यदं॑स्य॒ कर्म॒णो ० ॥ चरुकर्मसु प्रधानदर्व्याज्येन निधानक्रमात् परिद्ध्यञ्जनम् कृत्वा, लेपकार्यं कुर्यात्। आज्यस्थाल्यादक्षिणतः प्रधानदर्वीं निधाय, इतरदर्वीं मध्ये निधाय, पात्रसादनार्थदर्भानादाय, प्रधानदर्व्यां अग्रं इतरस्यां मध्यम्, आज्यस्थाल्यां मूलमित्युदगपवर्गं क्रमेण त्रिरक्त्वा, अक्तस्य बर्हिषस्तृणमपादाय, प्रज्ञातं निधाय, दक्षिणोत्तराभ्यां पाणिभ्यां प्रधानदर्व्यां बर्हिः प्रतिष्ठाप्य, दक्षिणेन करेणाग्नौ प्रहरति। त्रिरुद्यम्य, अपात्तकृणमग्नौ प्रहरति। तत्रिरङ्गुल्या निर्दिश्य, अग्निमभिमन्त्रयते। अथ भूमिमुपस्पृश्य, परिधीन्प्रहरति। मध्यमं परिधिमग्नौ प्रहृत्य, अन्यौ परिधी हस्ताभ्यामादाय युगपदग्नौ प्रहरन्नुत्तरार्ध्यस्याग्रमङ्गारेषूपोहति। दर्वीद्वयेन सꣳस्रावं परिधीनभिजुहोति।

(स्वाहा) वसुभ्योरुद्रेभ्य आदित्येभ्यः सꣳस्रावभागेभ्य इदम्। ॐ भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्। (सङ्कल्पः) अस्मिन् अमुक होम कर्मणि अविज्ञात प्रायश्चित्तादीनि होष्यामि। अना॑ज्ञातं॒ यदाज्ञा॑तं ० ॥

भू॒ः स्वाहा॑। अग्नय इदम्। भुव॒ः स्वाहा॑। वायव इदम्। सुव॒ः स्वाहा॑। सूर्याय इदम्। ॐ भूर्भुव॒ः सुव॒ः स्वाहा॑। प्रजापतय इदम्।

(सङ्कल्पः) अस्मिन् अमुक होम कर्मणि मध्ये सम्भावित समस्त मन्त्रलोप तन्त्रलोप द्रव्यलोप क्रियालोपाज्यलोप न्यूनातिरेक विस्मृतिविपर्यासप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि।

ॐ भूर्भुव॒ः सुव॒ः स्वाहा॑। प्रजापतय इदम्। श्री विष्णव॒े स्वाहा॑। विष्णवे परमात्मन इदम्। नमो रुद्राय पशुपतय॒े स्वाहा॑। रुद्राय पशुपतय इदम्। अप उपस्पृश्य।

स॒प्त ते॑ अग्ने ॰ स्वाहा॑। अग्नये सप्त इदम्। आज्यपात्रादीन् उत्तरतो निधाय। प्राणायामं कृत्वा

सू॰, पूर्ववत् परिषेचनमन्वम॰ स्थाः प्रासावीरिति मन्त्रसन्नामः॥

अग्निं परिषिञ्चति। अदि॒तेऽन्व॑मꣳस्थाः (दक्षिणतः)। अनु॑म॒तेऽन्व॑मꣳस्थाः (पश्चिमतः)। सर॑स्व॒तेऽन्व॑मꣳस्थाः (उत्तरतः)। देव॑सवित॒ः प्रासा॑वीः (समन्तम्)।

अथ वरुणपात्रमादाय पुरतो निधाय, तस्मिन् पात्रान्तरेण जलं संस्राव्य, तज्जलं प्रागादिप्रदक्षिणं प्रतिदिशं दक्षिणहस्तेन मार्जयित्वा, ऊर्ध्वश्चोत्क्षिप्य, भूमौ किञ्चिज्जलं प्राङ्निनीय, तेनात्मानं पत्नीं च प्रोक्ष्य, ब्रह्मन्वरं ते ददामि। ब्रह्मणे नमः। सकलाराधनैः स्वर्चितम्।

स्वाहा॑। इत्यग्नौ समिधमाधाय, अग्ने नयेत्यग्निसूक्तेन अग्निं उपस्थाय (), अग्ने॒ नय॑ ॰ ॥ प्रणम्य, अभिवादयेत्॥

प्रथमार्तवशान्तिः

सू॰, चतुर्थे वा पञ्चमेऽह्नि वा शान्तिस्नानं प्रकुर्वीत॥

(अमुक)नक्षत्रे (अमुक)राशौ जातायाः (अमुक)नाम्न्या अस्या मम कुमार्याः प्रथमरजःप्रादुर्भावकाले तिथि-वार-नक्षत्र-योग-करण-लग्नादिभिः संसूचितो यो दोषः समजनि, तद्दोषपरिहारार्थं एभिर्ब्राह्मणैः सह बोधायनोक्तप्रकारेण ऋतुशान्तिजपहोमकर्म कर्तुं योग्यतासिद्धिं अनुगृहाण॥ विघ्नेश्वरपूजां कृत्वा, दर्भेष्वासीनो दर्भान् धारयमानः सङ्कल्पं करोति। शुभे शोभने ॰ प्रीत्यर्थं (अमुक)नक्षत्रे (अमुक)राशौ जातायाः ॰ बोधायनोक्तप्रकारेण ऋतुशान्तिजपकर्म करिष्ये। उत्तरतो दर्भान् निरस्य, अप उपस्पृश्य, विघ्नेश्वरं उद्वास्य

धान्यद्रोणं तदर्धं वा तण्डुलं तिलमेव वा। तदर्धं चतुरश्रं तान् कृत्वा स्थण्डिलरूपकान्॥ उल्लिख्य पद्मं तन्मध्ये स्थापयेत् कुम्भमुत्तमम्॥ धूपितं वस्त्रसंयुक्तं तन्तुना परिवेष्टितम्। व्याहृतीभिर्जलं पूर्य कूर्चमन्तर्निधाय च। चूतपल्लवदर्भैश्च पुष्पैस्त्वक्पञ्चकैरपि। पल्लवैर्नवरत्नैश्च नारिकेलं निधाय च। आवाह्य पुण्डरीकाक्षं पुरुषं पूजयेत्ततः॥ इति न्यायेन स्थण्डिलकरणादि कुम्भं प्रतिष्ठाप्य

'इमं मे वरुण' 'तत्त्वायामि' इति द्वाभ्यां कुम्भे वरुणमावाह्य, इ॒मं मे॑ वरुण॰॥ तत्त्वा॑ यामि॒॰॥

सू॰, पुण्डरीकाक्षं ध्यात्वा कुम्भं संपूज्य॥

कुम्भोपरि प्रतिमां निधाय, पुरुषसूक्तविधानेन षोडशोपचारपूजां कृत्वा ()
स॒हस्र॑शीर्षा॒ पुरु॑षः ० ॥

सू०, श्रोत्रियान् विप्रान् षट् अष्टौ वा वरणपूर्वकं अभ्यर्च्य॥

अस्मिन् ऋतुशान्तिजपकर्मणि ऋत्विजं त्वां वृणे। इति ब्राह्मणान् वृत्वा, ऋतुशान्तिजपं कुरुध्वम्। इति प्रार्थयेत्, कुर्म इति प्रत्युक्ते यजमाने

सू०, त ऋत्विजः कुम्भं अन्वारभ्य वैष्णवीं गायत्रीं अष्टसहस्रं अष्टशतं वा वदन्तः॥

ऋत्विजश्च कुम्भमन्वारभ्य, नारायणाय विद्महे इति विष्णुगायत्रीं अष्टोत्तरशतवारं जपित्वा, ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासु॒देवाय॑ धीमहि। तन्नो॑ विष्णुः प्रचो॒दया॑त्॥

अथ कारिका – गायत्रीं वैष्णवीं चादौ शतमष्टोत्तरं पुनः। वेदाद्यापो हिरण्येति पवमानः सुवर्जनः। वारुणं सूक्तमुक्त्वा च विष्णुसूक्तं ततः परम्। रुद्रसूक्तं ब्रह्मसूक्तं दुर्गाश्रीसूक्तमेव च। पुरुषसूक्तं पञ्चशान्तिमृचां प्राची ततः परम्॥

सू०, वेदादीन्, "आपो हि ष्ठा मयुभुव" इति तिस्रः (), "हिरण्यवर्णाः" (), "पवमान" इत्यनुवाकौ (), वरुणसूक्तं (), श्रीसूक्तं (), पुरुषसूक्तं (), पञ्चशान्तिं (), "ऋचां प्राची" इत्येतं अनुवाकम् (), "नमो ब्रह्मण इति परिधानीयां त्रिरन्वाह" इति ब्राह्मणम् ()॥

पुनर्निवेद्य, वरुणमुद्वास्य, यज्ञेन यज्ञमित्यृचा पुण्डरीकाक्षं चोद्वास्य, यज्ञेन यज्ञमयजन्त ° ॥

सु°, "देवस्य त्वा" इति त्रिभिः प्रोक्ष्य॥

देवस्य त्वेत्यादिभिर्मन्त्रैः प्राङ्मुखं आसीनं यजमानं सपत्नीकं प्रोक्षयेत्। देवस्य त्वा सवितुः प्रसवे। ° ॥

सू°, "ऋतं च सत्यं च" इति त्रिभिर्मन्त्रैः ऋत्विजः स्नापयेयुः॥ ततो नारीं पञ्चगव्यं[74] प्राशयेत्॥

अथ पुत्रीं कुम्भजलेन स्नापयित्वा, ऋतं च सत्यं ° धौत(शुष्क)वस्त्रं धारयित्वा, (पञ्चगव्यं संयोज्य, प्राशयित्वा)

सू°, अग्निमुखात् कृत्वा ( )

देवयजनोल्लेखनप्रभृति, लौकिकाग्निं प्रतिष्ठाप्य, अग्निमुखात् कृत्वा, चरुं श्रपयित्वा, अभिघार्य, प्राचीनं उदीचीनं वा उद्वास्य, प्रतिष्ठितं अभिघार्य, दर्व्यां उपस्तीर्य, द्विरवदाय, सकृदभिघार्य।

ॐ भूर्भुवः सुवरों तत्सवितुर्वरेण्यं भर्गो °°° दयात्स्वाहा। सवित्र इदम्। इति हुत्वा,

[74] सू°, गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधिक्राव्णोति वै दधि॥ तथा शुक्रमसि याज्यं देवस्य त्वा कुशोदकम्॥

अथ कारिका – विष्णुसूक्तेन समिधो ब्रह्मसूक्तेन वोदनम्। हुत्वाज्यं रुद्रसूक्तेन ऋतुनक्षत्रवाक्यतः। समिदन्नघृतैर्हुत्वा अष्टोत्तरशताहुतीः॥ इति न्यायेन समिदन्नाज्यैरष्टोत्तरशतं हुत्वा॥

सू॰, सूक्तान्यष्टादशकृत्वः प्रत्येकं आवर्तयेत्[75],
पालाशसमिद्भिरष्टोत्तरशतं विष्णुसूक्तेन जुहुयात् (),
तथा ब्रह्मसूक्तेनान्नम् (),
रुद्रसूक्तेनाज्यम् (),
ऋतुनक्षत्रस्य () समिदन्नाज्याहुतीः प्रत्येकं अष्टाविंशतिकृत्वः तन्मन्त्रेण जुहुयात्॥

यथोक्तं हुत्वा

सू॰, त्र्यम्बकेन तिलहोमं अष्टोत्तरसहस्रं अष्टोत्तरशतं वा जुहुयात् ()
आज्याहुतीर्घृतसूक्तेनाष्टौ जुहुयात् ()

सू॰, स्विष्टकृत् प्रभृति सिद्धं आधेनुवरप्रदानात्॥

स्विष्टकृतमवदाय, अन्तःपरिधि सादयित्वा, हव्यवाहं स्विष्टमग्न इति द्विभ्यां स्विष्टकृतं हुत्वा, जयप्रभृति ब्रह्मोद्वासनान्तं कृत्वा

सू॰, ऋत्विग्भ्यो दक्षिणां ददात्याचार्याय विशेषतः॥

ऋत्विग्भ्यो दक्षिणान् दत्वाऽग्निमुपस्थाय आशीर्वादं कुर्यात्॥

---

[75] सूक्तावृत्तिकथनात् एकैकमन्त्राणां आवृत्तिर्न कार्या इति ज्ञापितं भवति

गर्भाधानम्

समावेशनान्तरेषु तु अकर्मार्थत्वादेव नायं जपः। तात्कालिक कर्मेदम्। "सर्वाण्युपगमनानि मन्त्रवन्तीति बोधायनो यच्चादौ यच्चर्ताविति शालिकिः" इति कार्यविकल्पो दर्शितः॥

सू°, चतुर्थिप्रभृत्या षोडशीमुत्तरामुत्तरां युग्मां प्रजानिश्रेयसं ऋतुगमन इत्युपदिशन्ति।

रवावस्तंगते ब्राह्मणैराशीर्वादं कारयित्वा, फलदानं च कृत्वा, गणपतिपूजां कृत्वा, प्राणानायम्य, (समावेशनजपं) गर्भाधानाख्य ऋतुसमावेशनजपं च करिष्ये, इति सङ्कल्प्य, गणपतिमुद्वास्य, ग्रहप्रीतिं कृत्वा

सू°, शेषं "आरोहोरुम्" इति "कृणुतो दुवः" इत्यन्तं ( ) समावेशने जपेत्॥ अन्यो [76] वैनामभिमन्त्रयेत॥

आरो॑हो॒रुमुप॑बर्हस्व ° दे॒वेषु॑ कृ॒णुतो॒ दुवः॑॥

सू°, रजसः प्रादुर्भावात् स्नातां [77] ऋतुसमावेशन उत्तराभिः "विष्णुर्योनिम" इत्यादि त्रयोदशभिः ( ) अभिमन्त्रयते॥

विष्णु॒र्योनिं॑ कल्पयतु॒ ° का॒मये॑ देव॒ तं मे॑ वायो॒ सम॑र्धय॥

---

[76] इदं च "अहं गर्भं अदधां" इत्यादि लिङ्गविरोधेऽपि

[77] तात्°, ऋतुश्च स्त्रीणां रजोनिर्गमनाद् आरभ्य षोडश दिवसाः॥

इति जपित्वा, पृष्ठतो निवीतं कृत्वा, स्त्रियं गच्छेत्॥ ततः परेद्युः प्रातरुत्थाय कृताह्निको जायया सहाभ्युदयश्राद्धं पुण्याहवाचनं च कृत्वाऽऽशीर्वादादिकं कारयेत्॥

पुंसुवनम्

तात्°, कर्मणानेन संस्कृता अन्तर्वत्नी पुमांसं जनयति। पुंसुवनं प्रथमे गर्भे कर्तव्यमेव। तत ऊर्ध्वं तु यत्र यत्र गर्भे पुत्रेप्सा, तत्र तत्र कर्तव्यं, नान्यत्र। यस्त्वतिक्रान्तचोदनः स्त्रीरेव जनयेयमिति कामयते तस्य सकृदपि न भवति॥

सू°, पुमांसं जनयति॥ पुंसुवनं व्यक्ते गर्भे तिष्येण॥[78]

पूर्वेद्युरुदकशान्तिं प्रतिसरबन्धं च कृत्वा, श्वोभूते नित्यकर्म परिसमाप्य, अनुज्ञां कुर्यात्। **अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणां इव स्वीकृत्य, (अमुक)नक्षत्रे (अमुक)राशौ जाताया नाम्न्या अस्या मम धर्मपत्न्याः पुंसुवनकर्म कर्तुं योग्यतासिद्धिं अनुगृहाण।** विघ्नेश्वरपूजां कृत्वा, दर्भेष्वासीनो दर्भान् धारयमाणः सङ्कल्पं करोति। **(अमुक)नक्षत्रे (अमुक)राशौ जातां मम धर्मपत्नीं पुंसुवनकर्मणा संस्करिष्यामि॥** उत्तररो दर्भान् निरस्य, अप उपस्पृश्य, स्थण्डिलं कल्पयित्वा

सू°, सीमन्तवदग्नेरुपसमाधानादि उल्लिख्य॥

भूर्भुवः सुवरोम् इत्यौपासनाग्निं प्रतिष्ठाप्य, प्राक् तोयमित्यादि पात्रसादनकाले दैवानि षद्पात्राणि यथावत् सादयित्वा

---

[78] तात्°, व्यक्तिश्च तृतीये चतुर्थे वा मासे। ° । यदि पुंसवनं चतुर्थे स्यात् तदा पूर्वं सीमन्तं कृत्वैव। कुत एतत्? पुंसवने पश्चात् क्रियमाणेऽपि चोदितकालानतिक्रमात्, पश्चान्मन्त्राम्नानसूत्रोपदेशयोरेवंक्रमार्थत्वाच्च॥

सू॰, न्यग्रोधस्य या प्राच्युदिची वा शाखा ततः सवृषणां फलद्वयेन संयुक्तां शुङ्गां अग्राङ्कुरं आहृत्य॥ [79]

प्रागुदग्वा शाखाजातं छलद्वययुक्तं वटाङ्कुरं दृषत्पुत्रद्वयं नववस्त्रं च सहैव सादयित्वा, पवित्रकरणादि स्रुक्संमार्जनान्तं कृत्वा। परिधीन् परिदधाति। स्थविष्ठं पश्चादित्यादि इध्मं आधाय, आघारावाघार्याज्यभागौ जुहोति।

अग्नये स्वाहा। अग्नय इदम्॥ सोमाय स्वाहा। सोमायेदम्॥

सङ्कल्पप्रभृत्येतत् ॰॰॰ होष्यामि । ॐ भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्॥

मुख्यकालातिक्रमे कृच्छ्राचरणपूर्वकं कुर्यात्॥

सू॰, अन्वारब्धायां उत्तराः "धाता ददातु नो रयिं" इति चतस्रो, "यस्त्वा हृदा कीरिणा" इति चतस्रः इति [80]अष्टौ आहुतीर्हुत्वा॥

धा॒ता द॑दातु नो ॰ ॥ यस्त्वा॑ हृ॒दा की॒रिणा॒ ॰ ॥

सू॰, जयादि प्रतिपद्यते॥ परिषेचनान्तं कृत्वा॥

कर्मसमृद्ध्यर्थं जयादिहोमं करिष्ये, चित्तं च स्वाहेत्यादि, यदस्येति स्विष्टकृतं हुत्वा, परिध्यञ्जनम्॥ न लेपकार्यम्॥ परिधीन् प्रहृत्य सꣳस्रावेणाभिजुहोति॥ सꣳस्रावादि ब्रह्मोद्वासनान्तं कृत्वा

---

[79] तात्॰, ब्राह्मणभोजनं आशीर्वचनं च तन्त्रात् पुरस्तान्निवर्तते। कर्मान्ते तु भवत एव॥

[80] प्रतिमन्त्रं अष्टौ आहुतीर्हुत्वा इति मुद्दुदीक्षितः। प्रमाणं मृग्यम्॥

सू°, अनवस्नातया कुमार्या दृषत्पुत्रे दृषदर्थापन्ने शुङ्गां निधाप्य दृषत्पुत्रेण पेषयित्वा तद्रसं परिप्लाव्य॥

अग्नेरुत्तरेण दृषत्पुत्रे वटाङ्कुरं न्यस्य, दृषत्पुत्रान्तरेण कन्यया पेषयित्वा, नववस्त्रेण परिप्लाव्य, ग्रहप्रीतिं कृत्वा

सू°, जायां अपरेणाग्निं प्राचीं उत्तानां ऊर्ध्वमुखीं निपात्य, उत्तरेण 'पुंसुवनं' इति यजुषा अङ्गुष्ठेन दक्षिणे नासिकाच्छिद्रे तद्रसं ऽपिनयति गर्भं प्रापयति[81]॥

पुꣳसुवनमसि। प्राक् शिरसमुत्तानशयानां वा प्रत्यङ्मुखीं आसीनां ऊर्ध्वमुखीं निपात्य, स्वयं प्राङ्मुखः स्थित्वा, पुंसुवनमुहूर्तः सुमुहूर्त इति भवन्तो महान्तोऽनुग्रह्णन्तु॥ तथास्तु॥

अथ प्राणानायम्य, अद्यकृतपुंसुवनकर्माङ्गं अभ्युदयश्राद्धं हिरण्यरूपेणाद्य करिष्ये॥ अभुदयं कृत्वा, पुण्याहं च कृत्वा, अग्निमुपस्थाय, आशीर्वादादिकं कारयेत्॥

---

[81] तात्°, सा रसं न निष्ठीवेदित्यर्थः॥

सीमन्तोन्नयनम्

सू॰, सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि॥ ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा॥

पुर्वेद्युरुदकशान्तिं प्रतिसरबन्धं अभ्युदयश्राद्धं पुण्याहं च कुर्यात्। अनुज्ञा, **अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणां इव स्वीकृत्य, (अमुक)नक्षत्रे (अमुक)राशौ जातां (अमुक)नाम्नीं एनां मम धर्मपत्नीं सीमन्तोन्नयनकर्मणा संस्कर्तुं योग्यतासिद्धिं अनुगृहाण।** विघ्नेश्वर पूजां कृत्वा, दर्भेष्वासीनो दर्भान् धारयमाणः सङ्कल्पं करोति। **(अमुक)नक्षत्रे (अमुक)राशौ जातां एनां मम धर्मपत्नीं सीमन्तोन्नयनकर्मणा संस्करिष्यामि।** अप उपस्पृश्य, विघ्नेश्वरमुद्वास्य, उल्लेखनाद्यौपासनाग्निं प्रतिष्ठाप्य,

सू॰, अग्नेरुपसमाधानादि पात्रप्रयोगकाले

अथ कारिका – यवान् विरूडान्छलल़ीं सपुञ्जान् ग्लप्सो यवानामपि बन्धनं च। एतानि सीमन्तविधौ प्रयुञ्ज्यात् पात्राणि साकं खलु मानुषाणि॥ इति सादयित्वा। पवित्रकरणादि शम्याः परिध्यर्थे।

सू॰, आज्यभागान्तेऽन्वारब्धायां उत्तराः “धाता ददातु नो रयिं” इति चतस्रो “यस्त्वा हृदा कीरिणा” इति चतस्रः इति [82]अष्टौ आहुतीर्हुत्वा पुंसुवनवत्॥

---

[82] प्रतिमन्त्रं अष्टौ आहुतीर्हुत्वा इति मुद्दिदीक्षितः। प्रमाणं मृग्यम्॥

धा॒ता द॑दातु नो ० ॥ यस्त्वा॑ हृ॒दा की॒रिणा॒ ० ॥

सू०, जयादि प्रतिपद्यते॥ परेषेचनान्तं कृत्वा॥

[83]शम्या अपोह्य, अनाज्ञातादि ब्रह्मोद्वासनान्तं कृत्वा, ग्रहप्रीतिं कृत्वा,

सू०, अपरेणाग्निं प्राचीं उपवेश्य, त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलैः शलालुग्लप्सेनेति। ऊर्ध्वं सीमन्तमुन्नयति ()। व्याहृतीभिः भूर्भुवःसुवो-राकामहमिति () उत्तराभ्यां द्वाभ्यां च॥

अपरेणाग्निं प्राङ्मुखीं उपवेश्य, स्वयं प्रत्यङ्मुखः स्थित्वा, शलल्यादीनि युगपदादाय, शिरोमध्ये रेखां उदूहति।

भूर्भुव॒ः सुव॑ः॥ रा॒काम॒हं यास्ते॑ राके॥ रा॒काम॒ह॑ ० ररा॑णा॥
शलल्यादीन् पश्चान्निरस्य, अप उपस्पृश्य

सू०, 'गायतं' इति वीणागाथिनौ संशास्ति॥ उत्तरयोः 'यौ गन्धरिरेव न' इत्येतयोः पूर्वा साल्वानां, ब्राह्मणानां इतरा॥ नदीनिर्देशश्च यस्यां वसन्ति॥

यौ ग॑न्धरिरे॒व ० तव॑॥ गायतं, इति वीणागाथिनौ संप्रेषयति। तौ च॥
सोम॑ ए॒व नो॒ राजेत्या॑हुर्ब्राह्म॒णीः प्र॒जाः। विवृ॑त्तचक्रा॒
आसी॑ना॒स्तीरे॑ण (असौ) तव॑॥ अत्र असावित्यस्य स्थाने
स्वनिवासग्रामसमीपनद्या नामनिर्देशः संबुध्या कार्यः। "कावेरि॒" "यमुने॒" यथा॥

---

[83] शम्याय त्रविधीयन्ते गार्ह्यकर्मसु सूत्रतः। सङ्स्रावं न तत्रस्यादभिशब्दविहीनतः। इति॥

सू°, यवान् विरूढानाबद्ध्य॥

अङ्कुरितान् यवान् सूत्रग्रथितान् वध्वाः शिरसि तूर्ष्णीं बध्वा,

सू°, वाचं यच्छत्या नक्षत्रेभ्यः॥ उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशं उपनिष्क्रम्य, वत्समन्वारभ्य, व्याहृतीश्च जपित्वा, वाचं विसृजेत्॥

छलदानम्। उपस्थानं कृत्वा, आशीर्वादादिकं कारयेत्॥

क्षिप्रंसुवनम्

सू°, अनाप्रीतेन शरावेणानुस्रोतसमुदकं आहृत्य पत्तस्तूर्यन्तीं निधाय मूर्धञ्छोष्यन्तीं उत्तरेण यजुषाऽभिमृश्यैताभिरद्भिरुत्तराभिरवोक्षेत्॥

शोष्यन्तीं स्त्रियं "आभिष्ट्वाहं दशभिरभिमृशामि" इति यजुषोभाभ्यां हस्ताभ्यां मूर्धन्यभिमृश्य, आ॒भिष्ट्वा॒ऽहं ° सूत॑वे॥

एताभिराहृताभिरद्भिः उत्तराभिः "यथैव सोमः पवते" इत्यादिभिस्तिसृभिस्तां सकृदेवावोक्षेत्, यथै॒व सोम॒ः ° सर॑स्वतीः। ऐतु॒ गर्भो॒ अक्ष॑तो जी॒वो जीव॑न्त्याः॥

सू°, यदि जरायु न पतेदेवं विहिताभिरेवाद्भिरुत्तराभ्यां अवोक्षेत्॥

ति॒ल॒देऽव॑ ° ज॒राय्व॒त्तवैँ॥

जातकर्म

मम जातं कुमारं जातकर्मणा संस्कर्तुं योग्यतासिद्धिं अनुगृहाण[84]। विघ्नेश्वर पूजां कृत्वा, दर्भेष्वासीनो ००० करोति। जातं कुमारं जातकर्मणा संस्करिष्यामि, इति सङ्कल्प्य, अप उपस्पृश्य, गणपतिमुद्वास्य

सू०, जातं कुमारं पिता वात्सप्रेण "दिवस्परि" इत्यनुवाकेन अन्ते सकृद् अभिमृश्य॥

दि॒वस्परीत्ये॒षोऽनुवा॒कः॥ दि॒वस्परि॑ प्रथ॒मं ० द्यौरज॑नयत्सु॒रेताः॑। अन्ते सकृत् कुमारं अभिमृश्य

सू०, उत्तरेण "अस्मिन्नहं" इत्यनेन यजुषोपस्थे तं आधाय॥

अ॒स्मिन्न॒ह२ ० वशी॑। इति स्वोपस्थ आधाय

सू०, उत्तराभ्यां "अङ्गादङ्गात्", "अश्मा भव" इति द्वाभ्यां अभिमन्त्रणम्॥

[84] उपनयनेन सह जातकर्मादिकरणे, मम कुमारं जातकर्म-नामकरणान्नप्राशन-चौलोपनयन कर्मभिः संस्कर्तुं योग्यतासिद्धिं अनुगृहाण॥

अङ्गा॑दङ्गा॒त् ° अभिजि॑घ्रामि (असौ)॥ [85]

सू°, तथैव ताभ्यां एव मूर्धन्यवघ्राणम्॥

अङ्गा॑दङ्गा॒त् ° अभिजि॑घ्रामि (असौ)॥

सू°, एतयोरेवर्चोः दक्षिणे कर्णे जापः॥

अङ्गा॑दङ्गा॒त् ° अभिजि॑घ्रामि (असौ)॥

सू°, मधुघृतमिति कांस्यपात्रे संसृज्य, तस्मिन् दर्भेण हिरण्यं निष्टतर्क्य, बध्वावधाय, उत्तरैः मन्त्रैः "मेधां ते देवः सविता" इत्यर्चा, "त्वयि मेधां" इति त्रिभिर्यजुर्भिः कुमारं प्राशयित्वा॥

कांस्यपात्रे मधुघृतं च संसृजति। मे॒धां ते॑ दे॒वः ° भ्राजो॑ दधातु॥
दर्भबद्धहिरण्येनैव शिशुं सकृदेव प्राशयित्वा

सू°, उत्तराभिः पञ्चभिः "क्षेत्रियै त्वा" इत्यादिभिः स्नापयित्वा॥

क्षे॒त्रि॒यै त्वा॒ निर्ऋ॑त्यै त्वा ° क्षै॒त्रि॒याज्जा॑मिश॒ꣳ॒साद् द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॒त्। इत्यन्ते कुमारं सकृत्कूर्चेन संस्नाप्य

सू°, दधिघृतमिति संसृज्य कांस्येन पृषदाज्यं भूः स्वाहेति व्यहृतीभिरोङ्कारचतुर्थाभिः कुमारं प्राशयित्वा॥

---

[85] सू°, नक्षत्रनाम च निर्दिशति॥ तद्रहस्यं भवति॥ (ता°, कुमारस्य यन्नक्षत्रजननाद्यन्नाम तच्च रौहिणेत्यादिसम्बुद्ध्या असौ-शब्दस्य स्थाने निर्दिशति)

भूः स्वाहा॑। भुव॒ः स्वाहा॑। सुव॒ः स्वाहा॑। ओ३ँ स्वाहा॑। अन्ते कांस्येनैव सकृदेव प्राशयित्वा

सू°, अद्भिः शेषं संसृज्य गोष्ठे निनयेत्॥

अन्येन गोष्ठे निनयेत्।

सू°, उत्तरया "मा ते कुमारं" इत्यनेन मातुरुपस्थ आधाय॥

मा ते॑ कुमा॒र३ँ ० स्वे गृ॒हे॥

सू°, उत्तरया "अयं कुमार" इत्यनेन दक्षिणं स्तनं प्रतिधाप्य॥

अ॒यं कु॑मा॒रो ज॒रां ० बल॑म्॥

सू°, उत्तराभ्यां "यद्भूमेर्हृदयं" इति द्वाभ्यां पृथिवीं अभिमृश्य॥

यद्भूमे॒र्हृद॑यं ० पौत्र॒मघ३ँ॑रुदम्॥

सू°, उत्तरेण "नामयति" इति यजुषा संविष्टम्॥

नाम॑यति॒ ० चा॒भिमृ॑शामसि॥

सू°, उत्तरेण "आपः सुप्तेषु" इति यजुषा शिरस्त उदकुम्भं निधाय॥

आप॑ः ० नु॑दध्वम्।

अस्य मम कुमारस्य जातकर्मान्ते छलीकरणहोमं करिष्ये। यत्र क्व चेति विधिना उल्लिख्य। लौकिकाग्निं प्रतिष्ठाप्य। संपरिस्तीर्य। (अञ्जलिसंस्कारं पाक्षिकम्) परिषिच्य

सू॰, सर्षपान् फलीकरणमिश्रानञ्जलिना उत्तरैः “अयं कलिं” इत्यष्टाभिः प्रतिमन्त्रं त्रिस्त्रिः प्रतिस्वाहाकारं हुत्वा संशास्ति॥

अयं कलिं ॰ अक्षीणि निर्दहः॥

मरुद्भ्य इदं। अग्नय इदम्। अग्नय इदम्। अग्नय इदम्। अग्नय इदम्। अग्नीन्द्राबृहस्पतिभ्य इदम्। अग्नय इदम्। अग्नय इदम्।

सू॰, प्रविष्टे प्रविष्ट एव तूष्णीमग्नावावपतेति॥

अत्राभ्युदयं पुण्याहवाचनं च कुर्यात्। नक्षत्रे राशौ जातस्यास्य मम कुमारस्याद्य कृत जातकर्माङ्गं अभ्युदयश्राद्धं हिरण्यरूपेणाद्य करिष्ये। तदङ्गं पुण्याहवाचनं च करिष्ये॥ अप उपस्पृश्य। यथाविध्यभ्युदयं पुण्याहं च कुर्यात्।

नामकरणम्

सू°, दशम्यां रात्रौ दशमेऽहनि उत्थितायां सूतिकागृहान्निष्क्रान्तायां स्नातायां पुत्रस्य नाम दधाति व्यवस्थापयति पिता मातेति मातापितरौ सहितौ ॥

सू°, द्व्यक्षरं चतुरक्षरं वा नामपूर्वं आख्यातोत्तरं दीर्घाभिनिष्ठानान्तं घोषवदाद्यन्तरन्तस्थम् ॥ अपि वा यस्मिन् स्वित्युपसर्गः स्यात्तद्धि प्रतिष्ठितमिति हि ब्राह्मणम् ॥ [86]

नक्षत्रे राशौ जातस्यास्य मम कुमारस्य नाम धास्यावः॥ नामकरणकर्माङ्गं पुण्याहवाचनं करिष्ये॥ इति सङ्कल्प्य, स्थण्डिलं कल्पयित्वा, कुम्भं प्रतिष्ठाप्य, कुम्भे वरुणमावाह्य, षोडशोपचारपूजां कृत्वा, ग्रहप्रीतिं च कृत्वा, भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये॥ नामकरणकर्मणः पुण्याहं भवन्तो ब्रुवन्तु॥ त्रिः ।

[87] नामकरणकर्मणे स्वस्ति भवन्तो ब्रुवन्तु॥ इति सकृदुक्त्वा। नाम ब्रुयाताम्॥ नाम्ना त्वं नारायणोऽसि। नामकरणकर्मणे नारायणशर्मणे स्वस्ति भवन्तो ब्रुवन्तु॥ इति द्विरुक्त्वा॥

---

[86] अनेन सूत्रेण नाम्नो लक्षणं उच्यते । विवरणं टीकायाः ज्ञेयम् ।

[87] पुण्याहादींस्त्रिराह त्रिः प्रतिब्रूयुस्तथा द्विजाः। कर्त्रा सह सकृत् ब्रूयुः सर्वे शान्तिमुखाशिषः॥

[88] नाम ००० कर्मणः। नामकरणकर्मणे नारायणशर्मणः ऋद्धिं भवन्तो ब्रुवन्तु॥ त्रिः। ऋद्धिः समृद्धिरित्यादि शेषं समानम्। नक्षत्रे राशौ जातस्य शर्मणोऽस्य मम कुमारस्य नामकरण कर्माङ्गं अभ्युदयश्राद्धं हिरण्यरूपेण करिष्ये। अभ्युदयं कृत्वा, पुण्याहं कुर्यात्।

---

[88] पुण्याहवाचने नाम्नि मध्यमे स्वस्तिवाचने। उक्त्वा बालकनामास्मै स्वस्तीत्यन्यत्समं भवेत्॥

उपनिष्क्रामणम्

[89] चतुर्थे मासि पुण्येनक्षत्रे पुण्ये दिने पूर्वेद्युर्नान्दिमुखं कृत्वा श्वोभूते विघ्नेश्वरं संपूज्य, नक्षत्रे राशौ जातं एनं मम कुमारं बोधायनोक्तप्रकारेण उपनिष्क्रामणकर्मणा संस्करिष्यामि। "सविता प्रीयतां" इति पुण्याहं वाचयित्वा, पूर्ववदौपासनादेकदेशाग्निमाहृत्य, उल्लेखनप्रभृत्याग्निमुखात्कृत्वा, सवित्रे जुष्टमिति विशेषः। पक्कां जुहोति। अवदानधर्मेणावदाय

ॐ भूर्भुव॒ः सुव॒रों तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। धियो॒ यो नः॑ प्रचो॒दया॒त्स्वाहा॑॥ सवित्र इदम्।

स्विष्टकृतमवदायान्तःपरिधि सादयित्वा। स्वस्तिसूक्तेन अष्टभिर्मन्त्रैः () आज्याहुतीरुपजुहोति। स्व॒स्ति नो॑ मिमीताम् ॰ स्वाहा॑॥

स्विष्टकृत्प्रभृति सङ्स्रावान्तं कृत्वा, अग्रेणाग्निमश्वत्थपर्णेषु हुतशेषं निदधाति। नम॑ आव्या॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नम॑ः। इति बलीन्दत्वा,

अथ मङ्गलवाद्यसहितं शिशुं बहिर्निष्क्रमय्य तत्रोपवेश्य, चित्रियेभ्यो नमः इति बाह्यानि चित्रियाणि आसनादिनिवेदनान्तं पूजयित्वा। चित्रियेभ्यः स्वाहा इति निवेद्य पश्चाच्चित्रियाणि प्रीयन्तामिति पुण्याहं वाचयित्वा चित्रियं प्रदक्षिणीकृत्य गृहमानाय्य, अथ परिषेचनादि समापयेत्॥

---

[89] (स्मृ॰मु॰फ) स्मृत्यर्थसारे, निष्क्रामणं चन्द्रसूर्यदेवतादर्शणं च द्वादशेऽहनि तृतीये चतुर्थे वा मासि कुर्यात्॥

कर्णवेधनम्

सप्तमेऽष्टमे वा मासि कुर्यात्।[90] पूर्वेद्युर्नान्दीमुखं प्रतिसरं च कृत्वा, श्वोभूते गणपतिं संपूज्य, **नक्षत्रे राशौ जातं एनं मम कुमारं बोधायनोक्त प्रकारेण कर्णवेधकर्मणा संस्करिष्यामि।** श्रोत्रं प्रीयतामिति पुण्याहं वाचयित्वा। पूर्ववदेकदेशाग्निं आहृत्य, देवयजनोल्लेखन प्रभृत्याग्निमुखात्कृत्वा, श्रोत्राय जुष्टमिति विशेषः।

अवदानधर्मेणावदाय (327)। श्रोत्रे॑ण भ॒द्रमु॒त शृ॑ण्वन्ति ॰ परि॒सर्वं॑ बभू॒व स्वाहा॑॥ श्रोत्रायेदम्॥

स्विष्टकृतमवदाय बर्हिषि निधाय, आज्याहुतीरुपजुहोति। "प्राणो रक्षति विश्वमेजत्" इत्येतेनानुवाकेन दशभिः प्रत्यृचम्।

[91] प्रा॒णो र॑क्षति॒ ॰ परि॒सर्वं॑ बभू॒व स्वाहा॑॥ प्रतृचं श्रात्रायेदम्॥

इति दशाज्याहुतीर्हुत्वा, स्विष्टकृदादि संस्रावान्तं कृत्वा, अग्रेणाग्निं वेणुपर्णेषु हुतशेषं निदधाति।

(56) स॒मु॒द्राय॑ व॒युना॑य॒ ॰ अम॑र्त्यः॒ ह॒विः।

---

[90] (स्मृ॰मु॰फ) सायनीये, कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा। कर्णवेधं प्रशंसन्ति शुक्ले पक्षे शुभे दिने। शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः। सौचिको वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया॥

[91] प्राणो रक्षति यो देवो मनसश्चान एत्विति। जुषतां च यया चक्षुर्मानः श्रोत्रेण येन च॥ इति। इमे मन्त्राः जातकर्मणि पठिताः।

अथ प्रजापतिः प्रीयतामिति पुण्याहं वाचयित्वा, लोहितसूच्या वा वेणुकण्टकेन वा दक्षिणं कर्णमातृणत्ति।

गा॒य॒त्रीं ॰ शिम्यन्तुत्वा। अथ सव्यमातृणत्ति। द्वि॒पदा॒ या ॰ शिम्यन्तुत्वा। अथ लोहितसूत्रेण शणेन(?) वा दक्षिणवामकर्णौ बध्नाति। वरु॑णस्य॒ ॰ आवृत्तिः। परिषेचनादि तन्त्रशेषं समापयेत्। श्वोभूते सूत्रं विस्रंसयति। वरु॑णस्य स्कम्भ॒सर्ज॑नमसि। द्विः। अथ ऊर्ध्वं सूत्रेण वा वेणुकाण्डेन वा कर्णौ वर्धयेत्।

अन्नप्राशनम्

सू°, जन्मनोऽधि षष्ठे मासि ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा॥१६,१॥

नक्षत्रे राशौ जातस्य शर्मणोऽस्य मम कुमारस्यान्नप्राशन कर्माङ्गं प्रतिसरबन्धकर्म करिष्ये॥ प्रतिसरं कृत्वा, अस्य मम कुमारस्य अन्नप्राशनकर्माङ्गं अभुदयश्राद्धं हिरण्यरूपेण करिष्ये॥ अभ्युदयं पुण्याहं च कृत्वा, पुण्याहतीर्थेन कुमारं ओदनादिकं च प्रोक्ष्य, नक्षत्रे राशौ जातं शर्माणं इमं मम कुमारं अन्नप्राशनकर्मणा संस्करिष्यामि॥ अप उपस्पृश्य

सू°, दधिमधुघृतमोदनमिति संसृज्य उत्तरैः भूरपामिति चतुर्भिः मन्त्रैः कुमारं सकृदेव प्राशयेत्॥

ग्रहप्रीतिं कृत्वा, सौवर्णपात्रे क्षारलवणवर्जितान्नं दध्यादिभिः संसृज्य

[92] भूर॒पां त्वौषं॑धीना॒ꣳ रस॒ं प्राश॑यामि शि॒वास्त॒ आप॒ ओष॑धयः सन्त्वनमी॒वास्त॒ आप॒ ओष॑धयः सन्तु (नारायण)शर्मन्॥

भुवो॒ऽपां °, सुव॑र॒पां °, भूर्भुव॒ः सुव॑र॒पां °॥ चतुर्णां अन्ते सकृदेव कुमारं प्राशयेत्।

---

[92] भूरपां इति॥ व्याहृतयः उचारनमात्रेणोपकारकाः। अपां ओषधीनां च रसं त्वा त्वां प्राशयामि ता आप ओषधयश्च ते शिवाः सन्तु। अनमीवाः अरोगा आरोग्यहेतवश्च ते सन्तु असौ यज्ञशर्मन्! उत्तरेषु व्याहृतिमात्रं भिद्यते। अन्यत्समानम्॥

सू°, तैत्तिरीयेण मांसेन व्यञ्जनमोदनेन इत्येके॥

चौलम्

सू°, जन्मनोऽधि तृतीये वर्षे चौलं पुनर्वस्वोः॥ ब्राह्मणानां भोजनमुपायनवत्॥

चौलकर्माङ्गं उदकशान्तिं अङ्कुरं प्रतिसरं अभ्युदयं पुण्याहं च कुर्यात्।
(अमुक)नक्षत्रे (अमुक)राशौ जातं कर्माणं इमं मम कुमारं चौलकर्मणा संस्करिष्यामि॥ अप उपस्पृश्य, क्षारलवणवर्जं[93] कुमारं भोजयित्वा

सू°, सीमन्तवदग्नेरुपसमाधानादि आज्यभागान्ते॥

यत्रक्कचेति विधिना उल्लिख्य। भूर्भुवः सुवरोमिति लौकिकाग्निं प्रतिष्ठाप्य। अग्नेरुपसमाधानादि पात्रप्रयोगे॥ जलद्वयं कुशान् यवान्छलालुदर्भपुञ्जलान्। शकृच्छलल्यसीन् क्षिवेत्सहैव चौलकर्मणि(?)॥ इति पात्राणि सादयित्वा॥ पवित्रकरणाद्याज्यभागान्ते।

अन्वारब्धे कुमारे “धाता ददातु नो रयिं” इति चतस्रो, “यस्त्वा हृदा कीरिणे”ति चतस्र इति प्रतिमन्त्रमष्टावाहुतीर्जुहुयात्(?)।

धा॒ता द॑दातु नो र॒यिमिति॒ चत॑स्रो॒ यस्त्वा॑ हृ॒दा की॒रिणेति॒ चत॑स्रः॥
धा॒ता द॑दातु नो ° स्वाहा᳚॥ यस्त्वा॑ ° स्वाहा᳚॥ जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा। शम्या अपोह्य

---

[93] भुक्तिद्वये तु संप्राप्ते कथं भुक्तिर्विधीयते। शर्कराज्यपयः पीत्वा पश्चाद्भुक्तिं समाचरेत्॥

सू॰, अपरेणाग्निं प्राञ्चमुपवेश्य त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलैः सलालुग्लप्सेनेति तुष्णीं केशान् विनीय यथर्षिशिखा निदधाति॥ यथा वैषां कुलथर्मः स्यात्॥ उष्णेन वायवितियजुषा अपां संसर्जनाद्याकेशनिधानात्समानम्॥

अपरेणाग्निं कुमारमुपवेश्य शलल्यादीनादाय शिखार्थान्केशान्वप्तव्यांश्च तूष्णीं पृथक्कृत्य [94]

सू॰, प्रथमेन उष्णेन वायविति यजुषाऽपः संसृज्योष्णाः शीतास्वानीय॥

उ॒ष्णेन॑ ॰ वपतु॥

सू॰, उत्तरया आप इन्दन्त्विति शिर उनत्ति॥

आप॑ ॰ सूर्य॑ दृ॒शे॥

सू॰, त्रींस्त्रीन् दर्भानन्तर्धायोत्तराभिः येनावपदिति चतसृभिः प्रतिमन्त्रं प्रतिदिशं प्रवपति॥

पुरस्तात्। येनाव॑पथ्सवि॒ता क्षु॒रेण॒ ॰ सं॑द॒यं (असौ) नारायणशर्मा॥ क्षुरेण छित्वाऽप उपस्पृश्य

सू॰, वपन्तं उत्तरया यत्क्षुरेणेति अनुमन्त्रयते॥

यत्क्षु॒रेण॑ म॒र्चय॑ता ॰ प्रमो॑षीः॥

---

[94] द्विमुण्डणे तु सम्प्राप्ते कथं युग्मं समाचरेत्। उपायने तदुक्तं स्याज्ञपेन्मन्त्रं गतसतु॥

दक्षिणतः। येन॑ पू॒षा ० स्व॒स्तयै॑॥ छित्वा

पश्चात्। येन॒ भूय॒श्चरा॑त्य॒यं ० स्व॒स्तयै॑। छित्वा

उत्तरतः। येन॑ पू॒षा ० असा॑ः। छित्वाऽप उपस्पृश्य

सू०, दक्षिणतो माता ब्रह्मचारी वा॥ आनडुहे शकृत्पिण्डे यवान्निधाय तस्मिन् केशानुपयम्योत्तरया उत्वाय केशानिति उदुम्बरमूले दर्भस्तम्बे वा निदधाति॥

उ॒प्त्वाय॒ केश॒ान् ० सुव॑ः॥

सू०, क्षुरं प्रक्षाळ्य निदधाति। तेन त्र्यहं कर्मनिवृत्तिः॥ वरं ददाति॥

दक्षिणत आसीनाय ब्राह्मणाय वरं ददाति। अथावशिष्टाभिरद्भिश्शिरो नापितेन वापयित्वा स्नाप्याच्छाद्यालङ्कृत्याशिषो वाचयित्वा, उपस्थानं कुर्यात्।

अक्षराभ्यासः

कारिका – अथ क्रमप्राप्ताक्षरप्रारम्भविधिरभिधीयते॥ जन्मतः पञ्चमे वर्षे उत्तरायणे कुम्भमासं वर्जयित्वा शुक्लपक्षे द्वितीया-त्रितीया-पञ्चमी-सप्तमी-दशम्येकादशी-त्रयोदशीषु, गुरुशुक्रवारौ श्रेष्ठौ, रविवारि पूर्वाह्णे सोमवारेऽपराह्णे च श्रेष्ठः, बुधवारो मध्यः,
अश्विन्यार्द्रापुनर्वसुहस्तचित्रास्वात्यनूराधाश्रवणरेवतीषु नवतारासु, स्थिरराश्यः श्रेष्ठाः, उभयराशयो मध्यमाः, अष्टमे सर्वग्रहवर्जितेपञ्चमे पापवर्जेते अक्षरप्रारम्भं कुर्यात्॥ तथा च श्रीधरीये, उदग्गते भास्वति पञ्चमेऽब्दे प्राप्तेऽक्षरस्वीकरणं शिशूनाम्। सरस्वतीं विघ्नविनायकं च गुडोदनाद्यैरभिपूज्य कुर्यात्॥

कर्ता शुचौ समे देशे गोमयेनोपलिप्य सैकतं स्थण्डिलं कृत्वा, पालाशदण्डेन मृदं खात्वा, स्थण्डिलोपरि निधाय, आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य, **मम कुमारस्य समस्तविद्याप्राप्त्यर्थं अक्षरप्रारम्भं करिष्ये। तदङ्गत्वेन निर्विघ्नतासिद्ध्यर्थं गणपतिपूजां करिष्ये,** इति सङ्कल्प्य, गणपतिं गुरुं च संपूज्य, स्थण्डिलमध्ये सरस्वतीं पूजयेत्॥

ॐ भुवनमातः सर्ववाङ्मयरूपे आगच्छागच्छ, इति मन्त्रेणावाह्य, प्रणवेन अर्घ्यपाद्याचमनगन्धपुष्पधूपदीपाश्च दत्वा, पायसं गुडोदनं च निवेद्य, प्रदक्षिणनमस्कारान् कृत्वा, गुरुं वस्त्राभरणादिना संतोष्य, सरस्वतीविघ्नेशाचार्यान् त्रिः प्रदक्षिणं कृत्वा, आवाहनक्रमेण देवतामुद्वास्य, गुरुं प्राङ्मुखं उपविश्य, कुमारं प्रत्यङ्मुखमुपवेश्य, बिन्दुरहितप्रणवेन सह, **ॐ नमः शिवाय,** इति षडक्षरमुपदिश्य, अकारादिक्षकारान्तं पञ्चाशद्वर्णानुपदिश्य (वाचयित्वेर्थः), तथैव लेखयित्वा, ततः कुमारं प्राङ्मुखमुपवेश्य, लिखितं त्रिर्वाचयित्वा, लड्डुकादिभिर्ब्राह्मणान् संतोषयेत्॥

उपनयनम्

सू०, उपनयनं व्याख्यास्यामो गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यं वसन्तो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा॥

उपनयनकर्माङ्गं उदकशान्तिं अङ्कुरं प्रतिसरं अभ्युदयं पुण्यहं च कृत्वा। (अमुक)नक्षत्रे (अमुक)राशौ जातं शर्माणं इमं मम कुमारं उपनेष्ये॥ यज्ञोपवीतशुद्ध्यर्थं पुण्याहवाचनं करिष्ये॥ पुण्याहं कृत्वा, तत्तीर्थेन यज्ञोपवीतं कुमारं च प्रोक्ष्य, अनुज्ञां कुर्यात्॥ अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किंचिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य, (अमुक)नक्षत्रे ००० मम कुमारस्य श्रौतस्मार्तविहित-नित्यकर्मानुष्ठान-योग्यतासिद्धिं अनुगृहाण।

सङ्कल्पः। (अमुक)नक्षत्रे (अमुक०राशौ ००० मम कुमारस्य श्रौतस्मार्त ००० वृध्यर्थं मम कुमारेण यज्ञोपवीतं धारयिष्ये॥ ग्रहप्रीतिं कृत्वा॥ कुमारं तूष्णीं आचमनं कारयित्वा।

यज्ञोपवीतधारण महामन्त्रस्य, परब्रह्म ऋषिः। त्रिष्टुप्छन्दः। परमात्मा देवता। यज्ञोपवीतधारणे विनियोगः। आचार्यः कुमारसहिताभ्यां स्वकराभ्यां यज्ञोपवीतं धृत्वा। तन्मन्त्रं कुमारं वाचयन्नेव यज्ञोपवीतं धारयेत्।

य॒ज्ञो॒प॒वी॒तं प॑र॒मं प॒वित्रं॑ प्र॒जाप॑ते॒र्यत्स॑ह॒जं पु॒रस्ता॑त्। आ॒यु॒ष्य॑म॒ग्र्यं प्रति॑मुञ्च शु॒भ्रं य॑ज्ञोपवी॒तं बल॑मस्तु॒ तेजः॑॥ इति धारयित्वा,

पूर्ववत्तूष्णीमाचमनं कारयेत्॥ यज्ञोपवीतधारणमुहूर्तः सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु।

सू॰, कुमारं भोजयित्वा॥

95 क्षारलवणवर्जं घृतक्षीरमिश्रमन्नं भोजयेत्। द्विराचम्य।

सू॰, उष्णेन वायविति यजुषाऽपां संसर्जनाद्याकेशनिधानान्तम्॥

चौलवत् कृत्वा

सू॰, स्नातमग्नेरुपसमाधानादि॥

यत्रक्वचेति विधिनोल्लिख्य, लौकिकाग्निं प्रतिष्ठाप्य, अग्नेरुपसमाधानादि पात्र प्रयोग काले, "पात्र प्रयोगे तु कुशांबु-कूर्च-वस्त्राश्म-दण्डाजिन-मेखलाश्च दैव्यानि पात्राणि नियुज्य, पश्चाद्युजीत चामूनि सहोपनेता"। पवित्र करणाद्याज्यभागान्ते।

सू॰, पालाशीं समिधमायुर्दा इत्याधाप्य॥

96 अथ कुमारस्य दक्षिणे हस्ते पालाशीं समिधं प्रदाय तं गृहीत्वा॥

आ॒यु॒र्दा दे॑व ॰ ज॒रसे॑ नये॒मम्॥

"आधेहि" इत्याचार्यः। कुमारः तां प्रक्षिपेत्। आयुर्देऽग्नय इदम्।

---

95 कुमारं भुक्तिकाले तु गायत्रीं समुदीरयन्। आचार्यः स्वयमेवान्नं प्रोक्षयेदिति शौनकः॥

96 स्वाहा कारो न चायुर्दा इत्यत्र समिदाहुतौ। आधेहीत्येव मन्त्रान्ते वटुमाधापयेद्गुरुः॥

सू°, उत्तरेणाग्निं दक्षिणेन पदाऽश्मानमास्थापयत्यातिष्ठेति॥

[97] आतिष्ठेमं ॰ पृतनायतः॥

सू°, वासस्सद्यः कृत्तोतं रेवतीस्त्वेति द्वाभ्यामभिमन्त्र्य॥

[98] रेवतीँस्त्वा ॰ महित्वनम्॥

सू°, या अकृन्तन्निति तिसृभिः परिधाप्य॥

या अकृन्तन्नवयन् ॰ पोषमुप संव्ययस्व॥

सू°, परिहितं परीदं वास इत्यनुमन्त्रयते॥

परीदं वासो ॰ जीवन्॥

सू°, मौञ्जीं मेखलां त्रिवृतां त्रिः प्रदक्षिणमियम्॥

दुरुक्तादिति द्वाभ्यां परिवीय, इयं दुरुक्तात् ॰ मा रिषाम॥
नाभिदेशे ग्रन्थिं कृत्वा। [99] तौ मन्त्रौ कुमारौ वाचयित्वा, इयं दुरुक्तात् ॰
मा रिषाम॥

---

[97] अथोत्थाय कुमारोऽपि स्वाचार्यन्तु प्रदक्षिणम्।
आगम्योत्तरतस्तिष्ठेदग्निमाचार्यमन्तरा॥

[98] अश्मनि स्थापितो येन वासोऽपि परिधाय च। मेखलाजिनकर्माणि
तस्मिन्नेव तु कारयेत्॥

सू॰, अजिनमुत्तरं मित्रस्य चक्षुरिति॥

मि॒त्रस्य॒ चक्षु॒ः ॰ द॒धे॒ऽहम्॥ तं वाचयित्वा। मि॒त्रस्य॒ चक्षु॒ः ॰ द॒धे॒ऽहम्॥

सू॰, उत्तरेणाग्निं दर्भान् संस्तीर्य तेष्वेनमागन्त्रा समगन्महीत्यवस्थाप्य॥

आ॒ग॒न्त्रा ॰ गृ॒हेभ्यः॑॥ इति कुमारं प्रत्यङ्मुखमवस्थाप्य[100], स्वयं प्राङ्मुखस्तिष्ठन्, तन्मन्त्रं वाचयित्वा। आ॒ग॒न्त्रा ॰ गृ॒हेभ्यः॑॥

सू॰, उदकाञ्जलिमस्मा अञ्जलावानीय समुद्रादूर्मिरितित्रिः प्रोक्ष्य॥

आचार्यस्योदकाञ्जलिं कुमाराञ्जलौ तूष्णीमानीय। स॒मु॒द्रादू॒र्मिः ॰ न॒ आयन्॑॥ तेन जलेन त्रिः प्रोक्षति। सकृन्मन्त्रेण द्विस्तूष्णीम्। तं वाचयित्वा। स॒मु॒द्रादू॒र्मिः ॰ न॒ आयन्॑॥

सू॰, अग्निष्ट इति दशभिर्दक्षिणे हस्ते गृहीत्वा॥

[101] अ॒ग्निष्टे॒ ॰ आचा॒र्यस्तव॑॥ अन्ते कुमारस्य साङ्गुष्ठमुत्तानाम् दक्षिणं हस्तं गृहीत्वा।

---

[99] मौञ्ज्यजिनावस्थापन प्रोक्षणोत्थापनानि तु। समन्त्रमेतान्याचार्यः पूर्वं कृत्वाऽथवाचयेत्॥

[100] प्रत्यङ्मुखमवस्थाप्य सन्तिष्ठेत्प्राङ्मुखो गुरुः॥

[101] अन्ये तु सर्वमन्त्राणां हस्तग्रहणमिष्यते। देवताभ्यः परीदानं रक्षणाय पृथक्पृथक्॥

सू॰, अग्नये त्वा परिददामीऽत्येकादशभिः प्रतिमन्त्रं देवताभ्यः परीदाय॥

[102] अग्नयें त्वा परिददामि नारायण शर्मन्। ॰ पृथिव्यै त्वा सवैंश्वानरायै परिददामि नारायणशर्मन्।

सू॰, देवस्य त्वेति यजुषोपनीय॥

देवस्यं त्वा सवितुः प्रंसव उपंनये नारायण शर्मन्।
इत्यात्मसमीपमानीय।

सू॰, सुप्रजा इति दक्षिणे कर्णे जपति॥

सुप्रजाः ॰ पोषैंः॥

सू॰, ब्रह्मचर्यमागामिति कुमार आह॥

ब्रह्मचर्यमागामुपमा नंयस्व देवेनं सवित्रा प्रसूंतः॥ इति कुमार उच्चैर्ब्रूयात्।

सू॰, को नामासीति पृष्टं परस्य॥

को नामाँसि॥ इत्याचार्यः।

सू॰, असौ नामास्मीति प्रतिवचनं कुमारस्य॥

---

[102] अनुदात्तं भवेन्मन्त्रं सम्भुध्यन्तमसौ पदम्। उदात्तः प्रथमान्तस्तु नयेऽसाविति वर्जयेत्॥

नारायणशर्मा नामा॑स्मि॥ इति कुमारः।

सू°, अस्य ब्रह्मचार्यस्य साविति पृष्ठं परस्य॥

कस्य॑ ब्रह्मचा॒र्य॑सि नारायणशर्मन्॥ इत्याचार्यः।

सू°, प्राणस्य ब्रह्मचार्यस्मीति प्रतिवचनं कुमारस्य॥

प्रा॒णस्य॑ ब्रह्मचा॒र्य॑स्मि। इति कुमारः।

सू°, असावेषत इति सञ्चरासावित्यन्तं परो जपति॥

नारायणायण शर्मै॒ष ते॑ देव सूर्य ° ताङ्॑ स्व॒स्तिमनु॒सञ्च॑र नारायणशर्मन्॥ इत्याचार्यो जपित्वा।

सू°, अध्वनामिति प्रत्यगाशिषं चैनं वाचयति॥

103 अध्व॑नामध्वपते॒ श्रेष्ठ॒स्याध्व॑नः पा॒रम॑शीय॥

सू°, उक्तमाज्यभागान्तमत्रैनं योगे योगे तवस्तरमिति प्रतिमन्त्रमेका दशाहुतीर्हावयित्वा॥

104 कुमुरस्य हस्तं गृहीत्वा, योगे॑ योगे ° इन्द्र॑मू॒र्तये॒ स्वाहा॑॥ इन्द्रायेदम्।

---

103 प्रत्यगाशिषमन्त्राणां भवेद्वाचनमेव च।

इ॒मम॑ग्न आयु॑षे॒ ॰ यथाऽस॒त् स्वाहा॑॥ अग्निवरुणसोमादितिभ्यो विश्वेभ्यो देवेभ्य इदम्।

श॒तमिन्नु श॒रदो॒ ॰ गन्तो॒ः स्वाहा॑॥ देवेभ्य इदम्।

अ॒ग्निष्ट॒ आयु॑ः ॰ वसु॑भि॒रा द॑धातु॒ स्वाहा॑॥ अग्नीन्द्रमरुदादित्यवसुभ्य इदम्।

मे॒धां मह्यं॒ ॰ द॑दातु मे॒ स्वाहा॑॥ अङ्गिरोभ्यस्सप्तर्षिभ्यः प्रजापतयेऽग्नय इदम्।

अ॒प्स॒रासु॒ या इ॒ह स्वाहा॑॥ मेधायशोभ्यामिदम्।

इ॒मं मे॑ वरुण ॰ आच॑के॒ स्वाहा॑॥ वरुणायेदम्।

तत्त्वा॑यामि॒ ॰ प्रमो॑षी॒ः स्वाहा॑॥ वरुणायेदम्।

त्वन्नो॑ अग्ने॒ ॰ प्रमु॑मुग्ध्य॒स्मत् स्वाहा॑॥ अग्नीवरुणाभ्यामिदम्।

स त्वन्नो॑ ॰ एधि॒ स्वाहा॑॥ अग्नीवरुणाभामिदम्।

त्वम॑ग्ने भेष॒जꣳ स्वाहा॑॥ अग्नयेऽयस इदम्।

सू॰, जयादिप्रतिपद्यते॥

[104] योगादीन्वाचयन्नेव कुमारं हावयेत्खलु। द्वितीयचतुर्थौ ब्रूयादाचार्यो जुहुयाद्वटुः॥

शम्या अपोह्य, [105]अस्य मम कुमारस्य उपनयनहोमकर्मणि यजुर्भ्रेष(?)प्रायश्चित्तं करिष्ये। भुवः स्वाहा। वायव इदम्॥

अनाज्ञातमित्यादिपरिषेचनान्तं प्रणीताविमोकश्च कृत्वा,

अथ ब्रह्मोपदेशः। अनुज्ञा। नम॒ः सद॑से॒ ० नम॑ः पृथि॒व्यै। अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किंचिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य। (अमुक)नक्षत्रे (अमुक)राशौ जातस्य (अमुक)शर्मणोऽस्य मम कुमारस्य जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्ये वयसि अज्ञानतः पित्राद्युपेक्षया सवर्णाविर्णधात्री जनयित्राद्यनेकपरिपालिनीजनस्तन्यपानसहभो जनोच्छिष्टभोजनापाङ्क्तयभोजन सजातीय विजातीय निवासादिसंस्पर्शनतत्तत् कालशौचाभाव प्रभृतीनां सर्वेषां पापानां सद्यः अपनोदनद्वाराऽस्य मम कुमारस्य गायत्रीस्वीकरणे मम च गायत्रीं उपदेष्टुं योग्यता सिद्धिं अनुगृहाण॥

अस्य मम कुमारस्य ब्रह्मोपदेशमुहूर्तलग्नापेक्षया आदित्यादीनां नवानां ग्रहाणामानुकूल्यसिध्यर्थं यत्किञ्चिद्धिरण्यदानं करिष्ये। ग्रहप्रीतिं कृत्वा

सू°, अपरेणाग्निमुदगग्रं कूर्चं निधाय तस्मिन् शाष्ट्रभृदसीति यजुषोपनेतोपविशति॥

---

[105] यत्कर्मणि ब्राह्मणशब्द उक्तो भ्रेषोऽस्तिचेत्तत्र तथोपनीतौ। तत्कर्मवह्नौ भुव आहुतिः स्याद्भवेदनाज्ञातविधिर्द्वयं वा॥

कूर्च इति शिष्यः॥ सुकूर्च इत्याचार्यस्तं प्रतिगृह्य अपरेणाग्निमुदगग्रं निधाय तस्मिन्नुपविशेत्॥ रा॒ष्ट्र॒भृद॑स्याचार्यास॒न्दी मा त्वद्यो॑षम्।

अथ कुमारो दर्भेषु प्रत्यङ्मुख उपविश्य, आचार्यपादौ प्रक्षाल्य, गन्धादिभिरलङ्कृत्य, सुवर्णपुष्पं समर्प्य।

सू॰, पुरस्तात्प्रत्यङ्ङासीनः कुमारो दक्षिणेन पाणिना दक्षिणं पादमन्वारभ्याह सावित्रीं भो! अनुब्रूहि॥

सावित्रीं भो! अनुब्रूहि इति प्रार्थयेत्।

सू॰, तस्मा अन्वाह तथ्सवितुरिति, पच्छोऽर्द्धर्चशस्ततः सर्वां, व्याहृतीर्विहृताः पादादिष्वन्तेषु वातथाऽर्द्धर्चयोरुत्तमां कृत्स्नायाम्॥

ब्रह्मोपदेशक्रमः॥ ॐ भूः, तत्स॑वि॒तुर्वरे॑ण्यम्। ॐ भुव॑ः, भर्गो॑ दे॒वस्य॑ धीमहि। ओ३ सुव॑ः, धियो॒ यो न॑ः प्रचो॒दया॑त्। ॐ भूः, तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। ॐ भुव॑ः, धियो॒ यो न॑ः प्रचो॒दया॑त्। ओ३ सुव॑ः, तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो न॑ः प्रचो॒दया॑त्। इति कुमारस्य दक्षिणे कर्णे जपित्वा। तथैव तं वाचयित्वा। ॐ भूः, तत्स॑वि॒तुर्वरे॑ण्यं॒ ॰॰॰ दया॑त्। ब्रह्मोपदेशमुहूर्तः सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु।

सू॰, कुमारोऽवृधमिति मन्त्रेणोत्तरमोष्ठमुपस्पृशते॥

[106] अवृ॑धम॒सौ सौ॑म्य प्रा॒ण स्वं मे॑ गोपाय॥ उत्तरमोष्ठमुपस्पृश्य, आचम्य।

सू॰, कर्णौ ब्रह्मण आणीस्थ इति॥

[107] ब्रह्म॑ण आ॒णी स्थः॑॥

सू॰, दण्डं सुश्रव इत्यादत्ते पालाशोदण्डो ब्राह्मणस्य, नैय्यग्रोधस्कन्धजोऽवादग्रो राजन्यस्य, बादर औदुम्बरो वा वैश्यस्य, वार्क्षो दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति॥

सु॒श्रव॑ः सु॒श्रव॑सं मा कुरु॒ ॰ निधिगो॒पो भू॑यासम्॥

सू॰, स्मृतञ्च म इति सर्वव्रतो भूयासं इत्यन्त वाचयित्वा॥

स्मृ॒तं च॒ मेऽस्मृ॑तं च मे॒ ॰ तेना॒ह॑ सर्व॑व्रतो भूयासम्॥

सू॰, गुरवे वरं दत्वा॥

(हे) गुरो! वरं ते ददामि। [108]प्रति गृह्णामि इति प्रतिगृह्य। [109] अथ ब्रह्मोद्वासनम्॥ ब्रह्मन्! वरं ते ददामि।

---

[106] ओष्ठश्यावान्तपर्यन्तं स्पृश्यतेऽवृधमित्यथ। आचामेन्नेह नामास्ति कराभ्यां युगपच्छ्रुती॥

[107] कर्णोष्ठादित्यदण्डानां समन्त्रं वटुरेवतु।

[108] यत्तु प्रयोगान्तरे सावित्रादिप्रतिग्रहमन्त्राः उक्ताः। तदसाधु, देवावै वरुणमयाजयन्निति लिङ्गात्। यागीयप्रतिग्रह एव प्रतिग्रहमन्त्रजप इति॥

सू॰, उदायुषेत्युत्थाप्य॥

उदायुंषा ॰ अनुं॥ कुमारमुत्थाप्य, तद्वाचयेत्। उदायुंषा ॰॰॰ अनुं।

सू॰, तच्चक्षुरिति दशभिरादित्यमुपतिष्ठते॥

तच्चक्षुर्देवहिंतं ॰ सुर्यं दृशे॥ इत्याचार्यवाचितैरादित्यमुपतिष्ठेत्।

सू॰, यं कामयेत नायमच्छिद्येतेति तं यस्मिन् भूतश्च भव्यन्तेति दक्षिणे हस्ते गृह्णीयात्॥

यस्मिंन्भूतं ॰ मह्यं गृह्णामि नारायणशर्मन्॥

[110] सू॰, त्र्यहमेतमग्निं धारयन्ति क्षारलवणपर्जनञ्च, परित्वेति परिमृज्य, तस्मिन्नग्नये समिधमिति द्वादशभिर्मन्त्रैः समिध आदध्यात्॥

कुमारः प्राणानायम्य, ममोपात्त ॰॰॰ प्रीत्यर्थं, (प्रातः) समिध आधास्ये। अग्निमिध्वा, प्रज्वाल्य।

परिंत्वाऽग्ने ॰ ब्रह्मचारिभिंः॥ इत्यग्निं परिसमुह्य, ततः समन्तं प्रदक्षिणं तूष्णीं परिषिच्य।

---

[109] उपनीतौ विशेषेण तिष्ठेद्ब्रह्मोपदेशतः।तत्सन्निधौ च गायत्रीमुक्त्वा पश्चाद्विसर्जयेत्॥

[110] यावद्ब्रह्मोपदेशस्तु तावद्दक्षिणतो वटुः। औपनाय निकेशेषेकर्मण्युत्तरतो वटुः॥

अथ समिध आदधाति – अ॒ग्नये॑ स॒मिध॒माहा॑र्षं॒ सर्व॑व्रतो भूयास॒ꣳ स्वाहा।

[111] अथ तूष्णीं परिसमुह्य, तूष्णीं समन्तं परिषिच्य। स्वाहाँ। उपस्थानं करिष्ये।

यत्ते॑ अग्ने॒ तेज॒स्तेना॒हं ते॑ज॒स्वी भू॑यास॒ं यत्ते॑ अग्ने॒ वर्च॒स्तेना॒हं व॑र्च॒स्वी भू॑यास॒ं यत्ते॑ अग्ने॒ हर॒स्तेना॒हꣳ ह॑र॒स्वी भू॑यासम्॥ मयि॑ मे॒धां मयि॑ प्र॒जां मय्य॒ग्निस्तेजो॑ दधातु॒ मयि॑ मे॒धां मयि॑ प्र॒जां मयीन्द्र॑ इन्द्रि॒यं द॑धातु॒ मयि॑ मे॒धां मयि॑ प्र॒जां मयि॒ सूर्यो॒ भ्राजो॑ दधातु॥

अग्नये नमः॥ मन्त्रहीनं क्रियाहीनं भक्तिहीतं हुताशन। यद्धुतन्तु मया देव परिपूर्णं तदस्तु ते॥ प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै। यानि तेषामशेषाणां कृष्णानुस्मरणं परम्॥ अभिवादये। नमस्कारः।

मानं॑स्तो॒के तनं॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः। वी॒रान्मा नो॑ रुद्रभामि॒तो व॑धीर् ह॒विष्मं॑न्तो॒ नमं॑सा विधेम ते॥

---

[111] यत्तु। पुस्तकान्तरे, भूरादिचत्वारो मन्त्राः अधिकं लिखितः। तत्, उत्तरैर्मन्त्रैरित्यत्र अग्नये समिधमित्यादिभिः द्वादशभिर्मन्त्रैरिति संख्यायाः इयत्ता परिगणितत्वेन उपेक्ष्यं, अविहितहोमस्य निष्छलत्वात्।

मेधावी भूयासम्। तेजस्वी भूयासम्। वर्चस्वी भूयासम्। ब्रह्मवर्चसी भूयासम्। आयुष्मान् भूयासम्। अन्नादो भूयासम्। स्वस्ति भूयासम्।[112]

स्वस्तिश्रद्धायशःप्रज्ञां विद्यां बुद्धिं श्रियं बलम्। आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन। आचमनं कुर्यात्।

सू॰, ब्रह्मचार्यसीति संशास्ति॥

आचार्यः, ब्रह्मचार्यसि। कुमारः, बाढम्॥

आ॰, अपोऽशान। कु॰, बाढम्॥

आ॰, कर्म कुरु। कु॰, बाढम्॥

आ॰, मा सुषुंप्थाः। कु॰, बाढम्॥

आ॰, भिक्षाचर्यं चर। कु॰, बाढम्॥

आ॰, आचार्याधीनो भव। कु॰, बाढम्॥

मातरमेवाग्रे भिक्षेत भगिनीं वा॥ [113] **मातरमेवाग्रे भिक्षस्व** इति कुमारं प्रेषयेत्। अथ कुमारो मातरमभिवाद्य। **भवति! भिक्षां देहि,** इति प्रार्थ्य, मातृदत्तं भिक्षात्रयमाहृत्याचार्याय प्राह। **भैक्षमिदं** इति। तत्सुभैक्षमिति प्रति गृह्णीयात्। तत आशीर्वादादिकं कुर्यात्। दिनत्रयं सायं प्रातः समिदाधानं कुर्यात्।

---

[112] ललाटे हृदये दक्षिणभुजे वामभुजे नाभौ कण्ठे शिरसि इति तत्ततङ्गेषु रक्षां धृत्वा।

[113] मौञ्जीकर्मावसानेऽस्मिन्नामभैक्षं समाचरेत्

चतुर्थदिवसे प्रातः समिदाधानं कृत्वा, कुमारमभ्यज्य, स्नापयित्वा, माद्ध्याह्निक ब्रह्मयज्ञौ कारयित्वा, [114] आचार्येण सह प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य, पूर्वेणोत्तरेण वा पलाशवृक्षं त्रीण्युदगपवर्गाणि स्थण्डिलानि कल्पयित्वा, पुण्याहं कृत्वा, प्रोक्ष्य, अथ स्थण्डिलेषु यथाक्रमं प्रणवं श्रद्धां मेधां चावाह्य। आसनार्घ्यपाद्याचमनस्नान वस्त्रगन्धमाल्यधूपदीपबलींश्च दत्वाऽथोपतिष्ठते।

यश्छन्दंसामृषभो विश्वरूंपः। ॰ श्रुतं मे गोपाय॥ इति प्रणवम्॥

श्रद्धयाऽग्निः समिंध्यते। ॰ हविषां वर्द्धयामसि। इति सूक्तेन श्रद्धाम्।

मेधा देवी जुषमांणा ॰ जुषस्व द्रविंणो न मेधे। इत्यनुवाकेन मेधां चोपस्थाय।

अथ कुमारस्य ब्रह्मचर्यव्रतलोपप्रायश्चित्तार्थं कृच्छ्रप्रत्यम्नायहिरण्यदानं कृत्वा॥ पलाशमूले दण्डं विसृज्य। वस्त्रयज्ञोपवीतमेखलाजिनदण्डादीनि मन्त्रेण धारयित्वा।

सू॰, वासश्चतुर्थीं यस्य त इत्येतयाऽऽदत्तेऽन्यत्परिधाप्य॥

अथ कुमारो वासस्ते ददामीति पूर्वधृत वस्त्रमाचार्याय दद्यात्॥ अथाचार्यः। यस्यं ते प्रथमवास्यं॑ हरांमस्तं त्वा विश्वें अवन्तु देवाः। तं त्वा भ्रातंरः सुवृधो वर्द्धमानमनुंजायन्तां बहवः सुजातम्॥ इति तद्वासः प्रतिगृह्णीयात्। अथाचार्येण सहोदकधारापूर्वकं गृहमागच्छति। आशीर्वादं च कुर्यात्।

[114] अनुपाकृतवेदस्य कर्तव्ये ब्रह्मयज्ञके। वेदस्थाने तु गायत्री गम्यतेऽन्यत्समं भवेत्॥

अनुबन्धः

प्रसिद्धानि भागान्तरानि (आन्तानि)

मङ्गलसूक्तम्	तै॰सं॰ ३.२.८.४-४.७
पुरुषमेधः	तै॰ब्रा॰ ३.४
अच्छिद्रम्	तै॰ब्रा॰ ३.७
अश्वमेधम्	तै॰ब्रा॰ ३.८-३.९
काठकम्	तै॰ब्रा॰ ३.१०
त्रिणाचिकेतम्	तै॰ब्रा॰ ३.११-३.१२
अरुणप्रश्नः	तै॰आ १
पितृमेधः	तै॰आ॰ ६
तैत्तिरीयोपनिषत्	तै॰आ॰ ७-९